वकुलभूषणरूपकवितानम्

JAGGU VAKULABHŪṢAṆA

Drama
collecția.

746

॥ श्रीः ॥

श्री यदुशैलवासि
विद्याविशारद संस्कृतसेवासक्त कविकुलतिलक
राज्यप्रशस्ति-राष्ट्रपतिप्रशस्ति-परिष्कृत
श्रीबालधन्वि जग्गु वकुलभूषणमहाकविविरचितम्

वकुलभूषणरूपकवितानम्

(रूपकसङ्ग्रहः)

Published with the financial assistance from the
Rāshtreeya Sanskrit Samsthan
New Delhi

प्रकाशकः

बालधन्वि जग्गु आळ्वारैय्यङ्गार्यः
Anandanagar, Bangalore - 24
1993

Central Sanskrit University
CENTRAL LIBRARY
Rajiv Gandhi Campus

Vakulabhūṣaṇa Rūpakavitānam, a Collection of ten Sanskrit plays, by **Sri Alwar Iyengar**. Published by the author, 1993.

Price : Rs.46-00

No. of Copies : 1000

सर्वेऽधिकाराः ग्रन्थकृता स्वायत्तीकृताः

Copies can be had from :

1. बालधन्वि जग्गु आळ्वारैय्यङ्गार्यः
   No.8, 2nd Stage, M.S.H. Colony,
   Anandanagar, Bangalore - 24.
   Phone : 3331009

Lasertypeset & Printed at Vāgartha Printonics,
Bangalore-26. Phone: 604914.

Jaggu Alwar Iyengar
Vakulabhūṣaṇa



Born 1902 A.D.

CONTENTS

1.	Foreword	Dr. S.B. Varnekar
2.	Abhinandane	P.T. Narasimhachar
3.	'Śrī Vakulabhūṣaṇa' nā kaṇḍante	Jaggu Nārāyaṇa
4.	Vakulabhūṣaṇa padyapaddhatiḥ	R. Ganesh
5.	Kavi Praśasti	Raghunāthāchārya
6.	Acknowledgements	
7.	मुग्धकुन्तलम्	3
8.	प्रबुद्धप्रज्ञम्	39
9.	कौमुदीयम्	57
10.	दाशरथिदर्शनम्	71
11.	वीरसौभद्रम्	91
12.	स्यामन्तकम्	109
13.	वितीर्णामृतम्	189
14.	व्रतफलम्	215
15.	कलिकालुष्यम्	245
16.	मैरेयपारम्यम्	277
18.	Paper Reports	291
19.	List of works	297

प्रस्तावना

संस्कृतसाहित्यपर्यालोचनात्मकेषु आधुनिकप्रवन्धेषु प्रायः पण्डितराजजगन्नाथान्तं संस्कृत–साहित्यस्य निर्माणकालं मत्वा साहित्यपरिचयः सर्वत्र अदृश्यत। ततश्च कैश्चिद् महानुभावैः आधुनिकं जगन्नाथोत्तरं गतसंवत्सरशतकत्रयात्मके काले विलिखितं प्रकाशितं च विविधस्वरूपं प्रभूतं साहित्यं विषयीकृत्य केचन प्रबन्धाः प्रकाशिताः। तेन परःशतानाम् आधुनिकसाहित्यिकानां तत्तद्गुणमनोहरं साहित्यं जिज्ञासूनां परिचयविषयीभूतम्।

एतेषु आधुनिकसंस्कृतसाहित्यिकधुरीणेषु कर्णाटकीयः श्रीमान् जग्गूवकुलभूषणमहाशयः स्वीयेन ग्रन्थकर्तृत्वेन नूनं धुरि कीर्तनीयः। 1902 तमे क्रिस्ताब्दे लब्धजन्मना अनेन संस्कृतसारस्वतोपासकेन विगत – 90 वर्षमिते स्वजीवने महाकाव्य – खण्डकाव्य – चम्पू – स्तोत्रादिस्वरूपैः पञ्चत्रिंशदधिकैः ग्रन्थैः आधुनिक संस्कृतवाङ्मयमन्दिरे नूनं काऽपि प्रदीपशोभा व्यतन्यत। आळवारैय्यंगारकुले लब्धजनुः अयं कविभानुः महाकवेः जग्गूशिंगरार्यस्य पौत्रः श्रीमतो नारायणार्यस्य पुत्रः कौशिकगोत्रीयः यदुगिरि (मेलुकोटे) संस्कृतमहापाठशालायां साहित्याध्यापनकार्येण प्रभूतं यशः प्राप्तवान्। स्वायुषः 17 तमवर्षतः आरभ्य संस्कृतसाहित्यनिर्मितिकार्यम् अनेन महाभागेन समारभ्यत इति एतावन्मात्रः श्रीजग्गूवकुलभूषणमहाशयस्य वैयक्तिकः वृत्तान्तः मम विदितः आसीत्। स च मया स्वीये 'अर्वाचीनसंस्कृतसाहित्य' – इत्याख्ये मराठीप्रबन्धे तथा च संस्कृतवाङ्मयकोशस्य (हिन्दीभाषीयस्य) प्रथमे खण्डे समुल्लिखितः आसीत्।

स्वनामधन्यस्य अस्य साहित्यिकप्रवरस्य किमपि साहित्यं पठितुं मम समीहा आसीत्। परं ग्रन्थानामभावेन सा दरिद्रमनोरथवत् अपूरिता व्यतीयत।

अथ श्रीकृष्णजन्माष्टम्यां तिथौ (10–8–93) बेंगलूरुनगरतः डॉ. एस्.आर्. लीलामहाभागायाः पत्रमेकम् अकस्मादेव मया अधिगतम्। तत्र पत्रे 'यदुवंशचरितं, जयन्तिकेत्यादिगद्यकाव्यानां कर्तारः, अद्भुतदूतमित्यादि महाकाव्यानां, प्रसन्नकाश्यपं, प्रतिज्ञाकौटिल्यं, मञ्जुलमञ्जीरम् इत्यादीनां रूपकाणां च रचयितारः असंख्येयानां स्तोत्राणां च लेखकाः महाभागा एते श्री वकुलभूषणमहाकवयः अतीतनवतिवर्षदेशीयाः अधुनाऽपि काव्यालापविनोदेन कालयापनं कुर्वन्ति'' इति प्ररोचनात्मकं परिचयं पठित्वा तेन सार्धं प्रेषितं ''वकुलभूषणरूपकवितानम्'' नाम रूपकदशकसंग्रहं प्राप्य प्रभूतकार्यान्तरव्यग्रोऽपि अहं 'शतं विहाय भोक्तव्यम्'' – इति न्यायम् अनुसृत्य, चिराय हृदि संस्थितां समीहां पूरयितुमिव रूपकवितानैकतानमनाः अभूवम्।

अस्मिन् ग्रन्थे स्यामन्तकम् इति सप्ताङ्कं, मुग्धकुन्तलम् इति पञ्चाङ्कम्, प्रबुद्धप्रज्ञम्, वितीर्णामृतम्, व्रतफलम्, कलिकालुष्यम् इत्येतानि चत्वारि त्र्यङ्कयुतानि, तथा च कौमुदीयम्, दाशरथिदर्शनम्, वीरसौभद्रम्, मैरेयपारम्यम् इतीमानि चत्वारि द्व्यंकानि रूपकाणि सन्ति।

प्रतिरूपकं प्रास्तावनाम्

“नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः॥”

इति रूपककर्तुः परिचयः तथा च अन्ते

“भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद् गोब्राह्मणमण्डलाय कुशलं लोकोस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः सम्भृताः
सस्याढ्या धरणिश्च सन्तु समये, वर्षन्तु धाराधराः॥”

इति भरतवाक्यं, भासनाटकचक्रस्य इव अस्य नाटकवितानस्य एककर्तृकत्वं प्रमाणीकरोति।

अत्रत्ये मुग्धकुन्तले ज्ञानिमूर्धन्यस्य विष्णुचित्तस्य भूविवरोद्भूतायाः परमविष्णुभक्तायाः गोदायाः आश्चर्यरमणीया भक्तिकथा, प्रबुद्धप्रज्ञे देवदेवी-विप्रनारायणयोः प्रणयकथा, कौमुदीये कुमुदवल्ली परकालयोः बोधकथा, दाशरथिदर्शने वनवासात् प्रत्यागम्यमानस्य रामचन्द्रस्य दर्शनार्थं समुत्सुकस्य भरतस्य भावकथा, वीरसौभद्रे चक्रव्यूहभेदार्थम् अभिमन्योः रणप्रयाणकथा, स्यामन्तके श्रीमद्भागवतान्तर्गता स्यमन्तकमणिमूला सत्यभामा समुद्वाहकथा, वितीर्णामृते घण्टाकर्णाख्यस्य राक्षसस्य मोक्षप्राप्तिकथा, व्रतफले मालूरकविप्रस्य भगवद्भक्तिप्रभावकथा, कलिकालुष्ये पाश्चात्यशिक्षणस्य दुष्प्रभावेण उच्छृंखलतां गतयोः वाजपेयविप्रस्य कन्यापुत्रयोः भ्रष्टाचारकथा तथा च मैरेयपारम्ये मैरेयव्यसनासक्तेः जनान् परावर्तयितुं प्रयतमानस्य गान्धिमहात्मनः कल्पितकथा श्रीमता वकुलभूषणेन नाट्यतन्त्रानुसारं प्रयोगयोग्यतां नीताः सन्ति।

एतेषु सर्वेषु रूपकेषु पादोन-पंचशतमितानि (475) प्रसाद-हृद्यानि पद्यानि रूपककर्तुः कवनशक्तिं प्रकटयन्ति। एतानि सर्वाणि पद्यानि सुभाषितगुणेन नूनम् अलंकुर्वन्ति पात्राणां भाषणानि। गद्यरचना च सर्वथा सुखबोधा संस्कृताध्ययने अकृतभूरिपरिश्रमाणाम् अपि। एवंविधैः गुणैः अलंकृतानि एतानि रूपकाणि रङ्गमञ्चेऽपि प्रयोज्यमानानि हृदयहारीणि स्युः सहृदयानाम्। सर्वत्र रूपकेषु सात्त्विकतापूर्णानां सद्भावानां विलोभनीया अभिव्यक्तिः कवेः साधुशीलतां प्रद्योतयति।

आधुनिकैः साहित्यिकैः विरचितेषु संस्कृतनाटकादिषु प्राकृतभाषाप्रयोगः प्रायः नैव दृश्यते। केनचिद् उत्तरभारतीयेन नाटककृता प्राकृतस्थाने हिन्दीभाषा प्रयुक्ता इति सुष्ठु जानामि। ''यद्देशीयं भवेत् पात्रं तद्देश्यं तस्य भाषितम्'' इति नाट्यशास्त्रविदाम् आदेशः वर्तते। तदनुसारं यथास्थानं प्राकृतभाषा अवश्यं नाटकेषु उपयोक्तव्या। परं प्राचीनप्राकृतभाषापेक्षया आधुनिकीनां प्रादेशिक भाषाणां प्रयोगः (संस्कृतच्छायासनाथः) स्वागतार्हः स्यात् इति मे स्वीयं मतम्।

अतीतनवतिवर्षदेशीयस्य सन्ततसंस्कृतसारस्वतसेवानिरतस्य महाकवेः एतानि सुजनमनोहराणि रूपकाणि ग्रन्थरूपेण प्रकाशयितुं प्रयतमानया डॉ. एस्.आर्. लीला महोदयया प्रास्ताविकं किमपि लिखितुम् आदिश्य मयि नूनम् अनुग्रहः कृतः इति तां प्रति कार्तज्ञप्रकटनं मम कर्तव्यम् एव।

अनया रूपकात्मकसाहित्यसपर्यया सुप्रसन्ना सती गीर्वाणवाग् देवता कविप्रवरस्य जग्गूवकुलभूषणस्य यशोवितानं दिगन्तव्यापकतां नयतु इति प्रार्थ्य विरमामि।

श्रीधर भास्कर वर्णेकर

'प्रज्ञाभारती'

81, अभ्यंकर नगरम्

नागपुरम् – 440010.

॥ १५ आगस्ट–स्वातन्त्र्यदिनम् ॥

॥ १९९३ ॥

ಶ್ರೀಃ

ಅಭಿನಂದನೆ

ವಿದ್ವಾನ್ ಕವಿ ಪ್ರವರ ಶ್ರೀ ಜಗ್ಗು ಆಳ್ವಾರ್ ಅಯ್ಯಂಗಾರ್ಯರು ನನಗಿಂತ ಎರಡು ವರ್ಷ ಹಿರಿಯರು. ಆದರೆ ನಾವು ಬಾಲ್ಯದಲ್ಲಿ ಬಾಲಪಾಠದಿಂದ ಹಿಡಿದು, ಮಾಘ, ಭಾರವಿ, ನೈಷಧ ವರ್ಗದ ವರೆಗೆ ಸಹಪಾಠಿಗಳು. ಆ ನಂತರ ನಾನು ಇಂಗ್ಲಿಷ್ ವಿದ್ಯಾಭ್ಯಾಸಕ್ಕಾಗಿ ಮೈಸೂರು ಸೇರಿಕೊಂಡೆ. ಅವರು ಮಾತ್ರ ಸಂಸ್ಕೃತಾಭ್ಯಾಸವನ್ನೇ ಮುಂದುವರೆಸಿದರು.

ಶ್ರೀಯುತರು ಸಂಸ್ಕೃತವನ್ನುಳಿದು, ಕನ್ನಡ ಇಂಗ್ಲಿಷ್ ಇತ್ಯಾದಿ ಯಾವ ಭಾಷೆಯನ್ನೂ ಅಧ್ಯಯನ ಮಾಡಿದ್ದು ನನಗೆ ನೆನಪಿಲ್ಲ. ಅವರು ಸಂಸ್ಕೃತಕ್ಕೇ ಸಂಪೂರ್ಣವಾಗಿ ತಮ್ಮ ಮೇಧೆಯನ್ನೆಲ್ಲ ಅರ್ಪಿಸಿಕೊಂಡಿದ್ದಾರೆ.

ಶಾಲಾಕಾಲೇಜು ರಜೆದಿನಗಳಲ್ಲಿ ನಾನು ಮೇಲುಕೋಟೆಯಲ್ಲಿರುತ್ತಿದ್ದೆ. ಆ ದಿನಗಳಲ್ಲಿ ನಾವು ಪರಸ್ಪರ ಕಲೆಯುತ್ತಿದ್ದೆವು. ಅವರ ಯೌವನಾರಂಭದ ದಿನಗಳಿಂದ ಅವರು ರಚಿಸುತ್ತಿದ್ದ ಕೃತಿಗಳನ್ನು ಅವರ ಮುಖದಿಂದಲೇ ನಾನು ಆಸ್ವಾದಿಸಿದ್ದೇನೆ. ಸಹಜ-ಉತ್ಸಾಹ ಪೂರ್ಣ, ಅದಮ್ಯಚೇತನ ಅವರದು. ಅವರು ಕವಿಮಾತ್ರವಲ್ಲ ಸಹೃದಯರೂ ಹೌದು. ಸಜ್ಜನರು.

ಕಾಲನ ಹಿಡಿತಕ್ಕೆ ಸಿಕ್ಕಿ ದೇಹ ಜರ್ಝರಿತವಾದರೂ ತಮ್ಮ ತೊಂಭತ್ತೊಂದರ ಹರೆಯದಲ್ಲೂ ಹೊಸ ಎರಡು ನಾಟಕಗಳನ್ನು ರಚಿಸಿರುವುದು ನನಗೇನೂ ಅಚ್ಚರಿಯಾಗಿ ತೋರುವುದಿಲ್ಲ. ಅವರ ಕಾವ್ಯರಚನಾ ಸ್ಫೂರ್ತಿ ನಿರಂತರವಾಗಿ ಸ್ಫುರಿಸುತ್ತಿದೆ. ಈ ಸ್ಫೂರ್ತಿ ಎಂಥ ಚಿರಂತನವಾದ್ದೆಂಬುದಕ್ಕೆ ಅವರ 'ಈ ಕೃತಿಗಳೇ ಸಾಕ್ಷಿ', ಅವರ ಮನೆತನದ ಅಧಿದೇವತೆ ಶ್ರೀ ಹಯಗ್ರೀವರ ಅನುಗ್ರಹ ಅವರಿಗೆ ಪರಿಪೂರ್ಣವಾಗಿ ಇದೆ.

ಇವರಂತೆಯೇ ಇವರ ಅಣ್ಣಂದಿರು ಶ್ರೀ ಜಗ್ಗು ಶಿಂಗ್ರೈಯ್ಯಂಗಾರ್ ಸಹ ಮಹಾಪ್ರತಿಭಾವಂತರು. ಅವರೂ ಅನೇಕ ಸಂಸ್ಕೃತ ಕತಿಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ.

ಜಗ್ಗೂ ವಕುಳ ಭೂಷಣ ಕಾವ್ಯನಾಮದಿಂದ ಖ್ಯಾತರಾಗಿರುವ ಶ್ರೀ ಆಳ್ವಾರ್ ಅವರು ತಮ್ಮ ನೂತನ ವಧುವನ್ನು ಕುರಿತು ರಚಿಸಿದ ಒಂದು ಪದ್ಯ ತನ್ನ ಚಲುವಿನಿಂದ ಈಗಲೂ ನನ್ನ ನೆನಪಿನಲ್ಲಿ ನೆಲೆಸಿಬಿಟ್ಟಿದೆ. ಮದುವೆ ಸಂದರ್ಭ. ವಧೂವರರು ಉರುಟಣೆ ಆಡುವ ಸಮಯ. ಗಂಡನ ವಕ್ಷಸ್ಥಲಕ್ಕೆ ವಧು ಗಂಧ ಪೂಸುವ ಸನ್ನಿವೇಶ. ಆ ಪದ್ಯ ಹೀಗಿದೆ :-

ಪಟೀರರಸಲೇಪನಂ ಕುರು ವರೋರಸಿ ದ್ರಾಕ್ ಪ್ರಿಯಾತ್
ವಿಹಾಯ ಭಯಮಿತ್ಯಸೌ ಸ್ವಜನ ಸಂಗ ಸಂಚೋದಿತಾ ।
ಅಮಂದ ಮಧುರ ಸ್ಮಿತಾ ಕ್ಷಿತಿಕೃತಾತಿಲೋಲೇಕ್ಷಣಾ
ಪ್ರಚಾಲಿತ ಸುಮಸ್ತಕಾ ಕರೋತಿ ಪ್ರಿಯಾ ಮೇ ಮುದಂ ॥

ನನ್ನ ಸ್ನೇಹಿತರಾದ ಪ್ರೊಫೆಸರ್ ತೀ.ನಂ.ಶ್ರೀ ಅವರು ಸಂಸ್ಕೃತ ಸುಭಾಷಿತಗಳನ್ನು ಸಂಗ್ರಹಿಸಿ ಅನುವಾದಿಸಿ ಪ್ರಕಟಿಸಿದ್ದಾರೆ. ಆ ಗ್ರಂಥದಲ್ಲಿ ಮುಕ್ತಕ ಶ್ಲೋಕಗಳ ಭಾಗದಲ್ಲಿ ಈ ಪದ್ಯವನ್ನು ಸೇರಿಸುವಂತೆ ಸಲಹೆ ನೀಡಿದ್ದನ್ನು 'ಶ್ರೀ' ಅವರು ಅತ್ಯಂತ ಪ್ರೀತಿಯಿಂದ ಅಂಗೀಕರಿಸಿ ಪ್ರಕಟಿಸಿದ್ದಾರೆ.

ಶ್ರೀ ಆಳ್ವಾರ್ ಅವರ ತೇಜಸ್ವಿನಿಯಾದ ಧರ್ಮಪತ್ನಿ ಸಹ ಸದಾ ಪತಿಮನೋನುಕೂಲೆಯಾಗಿ ಅವರ ಕಳೆಯನ್ನೂ ಜೀವೋತ್ಸಾಹವನ್ನೂ ವರ್ಧಿಸುತ್ತಿದ್ದಾರೆ. ನನ್ನನ್ನು ಕಂಡರೆ ದಂಪತಿಗಳಿಬ್ಬರಿಗೂ ತುಂಬ ಆದರ. ಆ ಪ್ರೀತಿ ಸಾಮಾನ್ಯದ್ದಲ್ಲ. ಅವರಿಬ್ಬರನ್ನೂ ನೆನೆಸಿದಾಗ ನನಗೂ ಅದೇ ಸ್ಫೂರ್ತಿ ಉಂಟಾಗುತ್ತದೆ.

ಸಂಸ್ಕೃತದ ಪಂಚಮಹಾಕಾವ್ಯಗಳು, ನಾಟಕಗಳು ಮತ್ತು ಬಾಣನ ಕಾದಂಬರಿಯ 'ರೀತಿ' ಗಳು ಇವರ ಕೃತಿಗಳಲ್ಲಿ ಹೊಳಹು ಹಾಕಿವೆ. ವಕುಳ ಭೂಷಣರ ಇತ್ತೀಚಿನ ಕೃತಿಗಳ ಪ್ರಕಟನೆಯ ಸುದ್ದಿಕೇಳಿ ಆನಂದವಾಗಿದೆ. ಅವರಿಗೆ ನನ್ನ ಸ್ನೇಹಪೂರ್ಣ ಆಲಿಂಗನದ ಜತೆಗೆ ಅಭಿವಾದನಗಳು.

ಪು.ತಿ.ನರಸಿಂಹಾಚಾರ್

॥ ಶ್ರೀಮತೇ ಹಯಗ್ರೀವಾಯನಮಃ ॥

'ಶ್ರೀ ಜಗ್ಗು ವಕುಳಭೂಷಣ' ನಾ ಕಂಡಂತೆ

I

ನಮಗೆಲ್ಲ ಅವರು ಆಳ್ವಾರಣ್ಣ. ಅವರಣ್ಣ ರಾಮಾಂಜಣ್ಣ, ಅವರಿಗೂ ಅಣ್ಣ ಜಗ್ಗು ಶಿಂಗ್ರೈಯ್ಯಂಗಾರ್ ಮಾತ್ರ ಜಗ್ಗು ಅಣ್ಣ. ಈ ಮೂವರೂ ನಮ್ಮ ದೊಡ್ಡಪ್ಪನವರ ಮಕ್ಕಳು. ನನಗೆ ಇವರೆಲ್ಲ ಒಡಹುಟ್ಟಿದವರಲ್ಲ ಎಂಬ ತಿಳುವಳಿಕೆ ಬರುವ ಕಾಲಕ್ಕೆ ಹದಿನಾಲ್ಕು ತುಂಬಿಹೋಗಿತ್ತು. ಆವರೆಗೆ ನನ್ನ ಒಡಹುಟ್ಟಿದ ಇಬ್ಬರು ಅಣ್ಣಂದಿರೂ ಈ ಮೂವರು ಅಣ್ಣಂದಿರೂ ನೇರ ಒಡಹುಟ್ಟಿದವರೆಂಬ ಭಾವನೆಯೇ ನೆಲೆ ನಿಂತಿತ್ತು. ನಮ್ಮ ತೀರ್ಥರೂಪರನ್ನು ಆ ಮೂವರೂ 'ಶಿತ್ತಯ್ಯ' (ಚಿಕ್ಕಪ್ಪ) ಎಂದು ಸಂಬೋಧಿಸುತ್ತಿದ್ದರೂ ಸಹ ಅವರು ಬೇರೆಯೆಂಬ ಭಾವನೆ ತಲೆಗೆ ಹತ್ತಿದ್ದಿಲ್ಲ. ಅಂತಹ ಕೌಟುಂಬಿಕ ಪರಿಸರ ಅಂದು ನೆಲೆಸಿತ್ತು. ನಾನು ನಮ್ಮ ಮನೆಯಲ್ಲಿ ಕಡಕುಟ್ಟಿ, ಅಂದರೆ ಕೊನೆಯ ಪುತ್ರ. ಈ ಎಲ್ಲ ಅಣ್ಣಂದಿರ ಪ್ರೀತಿ ವಾತ್ಸಲ್ಯ ನನಗೆ ಏಕಪ್ರಕಾರವಾಗಿತ್ತು.

ನಾನು ಸಂಸ್ಕೃತ ಪಾಠಶಾಲೆಯಲ್ಲೂ, ಮಿಡಲ್ ಸ್ಕೂಲಿನಲ್ಲೂ ಬೆಳಗ್ಗೆ ಮಧ್ಯಾಹ್ನ ವ್ಯಾಸಂಗ ಮಾಡುತ್ತಿದ್ದೆ. 1942, 43 ರಲ್ಲಿ ಈ ಆಳ್ವಾರಣ್ಣ ಪಾಠಶಾಲೆಯಲ್ಲಿ ನನಗೆ ಅಧ್ಯಾಪಕರಾಗಿದ್ದರು. ಅವರ ಕಾವ್ಯಮಯ ರಸಭರಿತ ಪ್ರವಚನದ ವೈಖರಿ ನಮಗೆ ತಲೆಗೆ ಏರುತ್ತಿರಲಿಲ್ಲ. ಮಾತೆತ್ತಿದರೆ 'ಗಡವ' ಎಂದು ಬಯ್ಯುತ್ತಿದ್ದರು. ಅವರ ಬಾಯಲ್ಲಿ ಈ ಒಂದು ಬಯ್ಗುಳದ ಶಬ್ದ ಬಿಟ್ಟು ಇದುವರೆಗೆ ಬೇರೆ ಶಬ್ದ ಪ್ರಯೋಗವಾದುದನ್ನು ನಾನು ಕೇಳಿಲ್ಲ. ಸದಾ ಸರ್ವದ ಅವರ ಕಾವ್ಯಕಲ್ಪನಾಲೋಕದಲ್ಲೇ ತೇಲಾಡುತ್ತಿದ್ದ ಜನ ಅವರು. ಹೇಳಿಕೊಟ್ಟ ಪಾಠ ನಮ್ಮ ತಲೆಗೆ ಹತ್ತಲಿಲ್ಲವೆಂದಾಗ ಮತ್ತೆ ಮತ್ತೆ ಅದನ್ನು ಬಿಡಿಸಿ ಬಿಡಿಸಿ ಹೇಳಿಕೊಡುತ್ತಿದ್ದರು. ಜತೆಗೆ 'ಗಡವ' ಶಬ್ದ ಪ್ರಯೋಗವೂ ಆಗುತ್ತಿತ್ತು. ಆಗಿನ 'ಧ್ವನಿ' ಮಾತ್ರ ಬೇರೆ. ಮೆಚ್ಚುಗೆಯ ಧ್ವನಿ ಅದಾಗಿರುತ್ತಿತ್ತು.

ನನಗೆ ಸುಮಾರು ಐದು ಆರು ವರ್ಷವಿದ್ದಿರ ಬಹುದು. ನಮ್ಮ ತಂದೆ ಮಡಿಯುಟ್ಟು ಕಚ್ಚೆಪಂಚೆ ಕಟ್ಟುವಾಗ ಹಾಗೂ ವಿಧಿವತ್ತಾಗಿ ನಾಮಧಾರಣೆ ಮಾಡುವಾಗಲೆಲ್ಲ ನನ್ನನ್ನು ಬಳಿಯೇ ಕೂಡಿಸಿಕೊಂಡು ಅಮರ-ಶಬ್ದಗಳ ಪುನರಾವರ್ತನೆ ಮಾಡಿಸುತ್ತಿತ್ತು. ನನಗೆ ಇದೊಂದು ಕಠಿಣ ಶಿಕ್ಷೆಯೆಂಬಂತೆ ಭಾಸವಾಗುತ್ತಿತ್ತು. ಆ ವೇಳೆಗೆ ಆಳ್ವಾರಣ್ಣ ಕೈಯಲ್ಲಿ ಒಂದು ಕರಡು ಹಿಡಿದುಕೊಂಡು ಬರುತ್ತಿದ್ದರು. ನಾನೂ ಪ್ರತಿಸಲವೂ ಅದನ್ನೇ ಬಯಸುತ್ತಿದ್ದದು. ಅವರು ಬಂದರೆ ನನಗೆ ಈ ಕಠಿಣ ಶಿಕ್ಷೆಯಿಂದ ಮುಕ್ತಿ. ಆದರೆ ವಿಮೋಚನೆ ಮಾತ್ರ ಇಲ್ಲ. ಕುಳಿತ ಸ್ಥಳ ಬಿಟ್ಟು ಕದಲುವಂತಿಲ್ಲ. ಆಳ್ವಾರಣ್ಣ ತಮ್ಮ ಕಾವ್ಯರಚನೆಯ ಭಾಗಗಳನ್ನು ತಮ್ಮ ಚಿಕ್ಕಪ್ಪನವರಿಗೆ ಓದಿ ಒಪ್ಪಿಸುತ್ತಿದ್ದರು. ನನಗೂ ಸಹ ಚಿಕ್ಕವನಾದರೂ ಅವರ ಕಲ್ಪನಾವಿಹಾರ ಬಹು ರೋಚಕವಾಗಿರುತ್ತಿತ್ತು. ಕಾವ್ಯರಸವನ್ನು ಆಸ್ವಾದಿಸುವ ಪಾತ್ರತೆ ಲಬ್ಧವಾಗದ ವಯಸ್ಸು. ಒಮ್ಮೆ ಅವರ ಯಾವುದೋ ಒಂದು ಕಲ್ಪನೆ ನನಗೆ ಸುಳ್ಳಾಗಿ ತೋರಿತು. ಆ ಕೂಡಲೇ ನಾನು ''ಆದೌ ಜ್ಯೋತಿಷಿಕಾನ್ಪ್ರಣಮ್ಯ ಭುಜಯೋರಾಸ್ಫಾಲ್ಯ ಪೌರಾಣಿಕಾನ್ ಆಲಿಂಗ್ಯಾಥ ಕವೀನ್ ಪ್ರಸಾದ್ಯ ಭಿಷಜಃ...'' ಎಂಬ ಶ್ಲೋಕ ಒದರಿಬಿಟ್ಟೆ. ಆಗ ಮೊದಲೇ ಕೆಂಪು ಬಣ್ಣದ ಆಳ್ವಾರಣ್ಣನ ಮುಖ ಕೋಪದಿಂದ ರಂಗೇರಿ ಉರಿಯುವ ಜ್ವಾಲೆಯಾದದ್ದು, ಈ ನನ್ನ ಮಾತಿಗೆ ನಮ್ಮಪ್ಪ ನನ್ನನ್ನು ಕಾಲಿಂದ ಝಾಡಿಸಿ ಒದ್ದು ಇದ್ದಲ್ಲಿಂದ ಹೊರಹಾಕಿದ್ದು ಎಂದೂ ಮರೆಯದ ನೆನಪಾಗಿ ಉಳಿದಿದೆ. ನೆನಪಾದಾಗಲೆಲ್ಲ ಒಂದು ರೀತಿ ಆನಂದವೇ ಆಗುತ್ತದೆ.

ಈ ಆಳ್ವಾರಣ್ಣ ಪ್ರತಿದಿನ ಬೆಳಗ್ಗೆ 5.30 ಕ್ಕೆ ಎದ್ದು, ಕೆರೆಗೆ ಹೋಗಿ ಪಂಚೆಗಳನ್ನು ಒಗೆದುಕೊಂಡು, ಸ್ನಾನಮಾಡಿ ಬಟ್ಟೆಗಳನ್ನು ಮಡಚಿ ಗಟ್ಟಣೆಮಾಡಿ ತಲೆಯ ಮೇಲಿಟ್ಟುಕೊಂಡು, ತಲೆತುಂಬ ಹರಡಿಕೊಂಡಿದ್ದ ದಟ್ಟವಾದ ಜುಟ್ಟಿನ ಕೂದಲನ್ನು ಒಂದು ಕೈಯ ನಾಲ್ಕು ಬೆರಳುಗಳಿಂದ ಹರವುತ್ತಾ ಒಣಗಿಸಿಕೊಂಡು ದಾರಿ ನಡೆಯುತ್ತಿದ್ದ ರೀತಿ ಈಗಲೂ ಕಣ್ಣಿಗೆ ಕಟ್ಟಿದಂತಿದೆ. ಬೆಳಗ್ಗೆ 7 ಗಂಟೆಗೆ ಪಾಠಶಾಲೆಗೆ ಹೋದರೆ 10 ಗಂಟೆಗೆ ಮನೆಗೆ ವಾಪಸ್. ಮತ್ತೆ ಮಧ್ಯಾಹ್ನ 3 ಗಂಟೆಯಿಂದ 5 ಗಂಟೆಯವರೆಗೆ ಪಾಠಶಾಲೆ. ಈ ನಿಯಮಬದ್ಧ ಕ್ರಮ ಅವರು ಅಧ್ಯಾಪಕ ವೃತ್ತಿಯಿಂದ 'ವಿನಾ

ನಿವೃತ್ತಿವೇತನ' ನಿವೃತ್ತರಾಗುವವರೆಗೂ ನಡೆದು ಬಂದಿತ್ತು. ಈ ಮಹಾಪಾಠಶಾಲೆ ಮುಜರಾಯಿ ಇಲಾಖೆಯ ಆಡಳಿತಕ್ಕೊಳಪಟ್ಟಿದ್ದ ಕಾರಣ ಅವರಿಗೆ ನಿವೃತ್ತಿವೇತನ ಲಭಿಸಲಿಲ್ಲ. ಅದಕ್ಕಾಗಿ ಅವರು ಹೋರಾಟ ಮಾಡಲೂ ಇಲ್ಲ.

II

ರಂಗ-ಕಲಾಸಕ್ತಿ

ಶ್ರೀ ವಕುಳ ಭೂಷಣರ ರಂಗಾಸಕ್ತಿ ಅವರ ಅನೇಕ ಸಮಕಾಲೀನ ಸಂಸ್ಕೃತ ಸಾಹಿತಿಗಳಿಗೆ ತಿಳಿದಿರಲಿಕ್ಕಿಲ್ಲ ಹಾಗೆಯೇ ಅವರ ವರ್ಣಚಿತ್ರ ರಚನಾ ಕೌಶಲವೂ ಸಹ. ಅವರು ಒಳ್ಳೆಯ ಈಜುಗಾರರೂ ಹೌದು.

ಮೇಲುಕೋಟೆಯ ಸಂಸ್ಕೃತ ಮಹಾಪಾಠಶಾಲೆಯಲ್ಲಿ ಒಂದು ವಿದ್ಯಾರ್ಥಿಸಂಘ ಇತ್ತು (ಈಗಲೂ ಇರಬಹುದು). ಆ ಸಂಘದ ವತಿಯಿಂದ ಪ್ರತಿ ದ್ವಾದಶಿಯಂದು ಸಂಜೆ ಶಾಲೆ ಮುಗಿದ ಮೇಲೆ ವಿದ್ಯಾರ್ಥಿಗಳಿಂದ ಪಠ್ಯೇತರ ಚಟುವಟಿಕೆವಳ ಸಭೆಯೊಂದು ನಡೆಯುತ್ತಿತ್ತು. ಅಂತ್ಯಾದಿ ಸ್ಪರ್ಧೆ, ಚರ್ಚಾಕೂಟ, ಸ್ವಕವನವಾಚನ, ಆಶುಕವಿತೆ ಇತ್ಯಾದಿ ಕಾರ್ಯಕ್ರಮಗಳು ಇರುತ್ತಿದ್ದುವು. ಶಾಲೆಯ ಎಲ್ಲಾ ಉಪಾಧ್ಯಾಯರೂ ಈ ಸಭೆಗಳಲ್ಲಿ ಕಡ್ಡಾಯವಾಗಿ ಹಾಜರಿರುತ್ತಿದ್ದರು. ಈ ಸಂಘದ ವಿದ್ಯಾರ್ಥಿಗಳಿಂದ ವರ್ಷಕ್ಕೊಂದು ನಾಟಕ ಕೂಡ ಪ್ರದರ್ಶನ ಕಾಣುತ್ತಿತ್ತು. ಈ ನಾಟಕಗಳನ್ನು ಆಳ್ವಾರೈಯ್ಯಂಗಾರ್ಯರೇ ನಿರ್ದೇಶಿಸುತ್ತಿದ್ದರು. ಅವರೇ ರಚಿಸಿದ ಕೆಲವು ನಾಟಕಗಳೂ ಆಗ ಅಭಿನಯಿಸಲ್ಪಟ್ಟ ನೆನಪು ನನಗಿದೆ. ರಂಗ ನಿರ್ದೇಶನದ ಅನುಭವವಿದ್ದುದರಿಂದಲೇ ಅವರ ನಾಟಕ ಕೃತಿಗಳೆಲ್ಲವೂ ಪ್ರಯೋಗಾರ್ಹತೆಯನ್ನು ಪಡೆದಿವೆಯೆಂದು ಘಂಟಾಘೋಷವಾಗಿ ಹೇಳಬಹುದು.

III

ಆಳ್ವಾರಣ್ಣ ತಮ್ಮ ರಚನೆಗಳನ್ನೆಲ್ಲ ದೋಷರಹಿತವಾಗಿಸಬೇಕೆಂಬ ಉದ್ದೇಶದಿಂದ ತಮ್ಮ ವಿದ್ಯಾಗುರುಗಳೂ ಚಿಕ್ಕಪ್ಪನವರೂ ಆದ ಮಹಾವಿದ್ವಾನ್

ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ಯರಲ್ಲಿ ಪಠಿಸಿ ತೋರಿಸುತ್ತಿದ್ದರು. ಕೆಲವೊಂದು ಬಾರಿ ಇಬ್ಬರ ನಡುವೆ ಕಲಹವೇ ನಡೆದಿದೆಯೆಂಬಷ್ಟು ಬಿರುಸಿನ ಚರ್ಚೆ ನಡೆಯುತ್ತಿತ್ತು. ಅಂತಿಮವಾಗಿ ಆಳ್ವಾರಣ್ಣ ತಿದ್ದುಪಡಿಯನ್ನು ಒಪ್ಪಿಕೊಂಡು ತಮ್ಮ ಕೃತಿಯಲ್ಲಿ ಸೂಕ್ತ ಬದಲಾವಣೆ ಮಾಡಿಕೊಳ್ಳುತ್ತಿದ್ದರು. ಅಷ್ಟೇ ಅಲ್ಲ ಅವರ ಹಿರಿಯಣ್ಣ ಶಿಂಗ್ರೈಯ್ಯಂಗಾರ್ಯರು (ಮಾಧ್ಯಮಿಕ ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಪಂಡಿತರಾಗಿ ಸೇವೆ ಸಲ್ಲಿಸುತ್ತಿದ್ದರು.) ರಜೆದಿನಗಳಲ್ಲಿ ಬಂದಾಗ ಅವರಿಗೂ ತಮ್ಮ ನೂತನ ಕೃತಿಗಳನ್ನು ಓದಿ ತೋರಿಸಿ ಚರ್ಚೆ ಮಾಡುತ್ತಿದ್ದರು. ಆ ದಿನಗಳಲ್ಲಿ ಸಹೋದರರ ನಡುವಣ ಅನ್ಯೋನ್ಯತೆಯನ್ನು ಕಂಡು ಕರುಬದ ಜನರೇ ಇರಲಿಲ್ಲ. ರಾಮಾಂಜಣ್ಣನವರೂ ಸಹ ಹೆಚ್ಚಿನ ವ್ಯಾಸಂಗ ಮಾಡದಿದ್ದರೂ ಸಾಕಷ್ಟು ಜ್ಞಾನ ಸಂಪಾದನೆ ಮಾಡಿದ್ದರು. ಅವರೂ ಸಹ ಈ ಸಾಹಿತ್ಯಿಕ ಚರ್ಚೆಗಳಲ್ಲಿ ಪಾಲ್ಗೊಂಡಿದ್ದುಂಟು. ಅವರು ತುಂಬ ವಿನೋದ ಪ್ರಿಯರು. ಅತ್ಯಂತ ಹಾಸ್ಯರಸಭರಿತವಾದ ಸ್ವಕಪೋಲ ಕಲ್ಪಿತ ಕತೆಗಳನ್ನು ಕನ್ನಡದಲ್ಲಿ ಹೇಳುತ್ತಿದ್ದರು. ಅಲ್ಲಿಂದಲ್ಲಿಗೇ ಆ ಕತೆಗಳು ವಾತಾವರಣದಲ್ಲಿ ವಿಲೀನಗೊಳ್ಳುತ್ತಿದ್ದವು. ಅವರು ಹಲವು ಸ್ವಾರಸ್ಯಕರವಾದ ಪದ್ಯಗಳನ್ನು ರಚಿಸಿ ಹೇಳುತ್ತಿದ್ದರು. ಅವೆಲ್ಲ ಬರಹರೂಪ ಕಾಣದೆ ನೆನಪಿನಲ್ಲಿ ಮಾತ್ರ ಉಳಿದಿವೆ.

ರಾಮಾಂಜಣ್ಣನವರಿಗೆ ಸಂಗೀತದ ಜ್ಞಾನ ಅಪಾರವಾಗಿತ್ತು. ಅವರ ಪಿತೃವರ್ಯ ಶ್ರೀ ತಿರುನಾಪ್ಪೆರುಮಾಳ್ (ಆದಿನಗಳಲ್ಲಿ ಬದುಕಿದ್ದವರೆಲ್ಲ ಅವರನ್ನು ಹಾಗೆಯೇ ಸಂಬೋಧಿಸುತ್ತಿದ್ದರಂತೆ) ಅವರಿಂದ ಆನುವಂಶಿಕವಾಗಿ ಪಡೆದುಕೊಂಡಿದ್ದ ವಿದ್ಯೆ ಅದು. ದೇವಸ್ಥಾನದಲ್ಲಿ ಸಹಸ್ರನಾಮಾರ್ಚನೆಯ ವೇಳೆಯಲ್ಲಿ ಸ್ತೋತ್ರಪಾರಾಯಣ ಸೇವೆ ಈಗಲೂ ನಡೆಯುತ್ತದೆ. ಮುಕುಂದಮಾಲೆ, ಆಳವಂದಾರ್‌ಸ್ತೋತ್ರ ಇತ್ಯಾದಿ ಸ್ತೋತ್ರಗಳನ್ನು ರಾಗಯುಕ್ತವಾಗಿ ಇಬ್ಬರು ಅಥವಾ ಎರಡು ಜೋಡಿ ಹಾಡುತ್ತಾರೆ. ಸ್ತೋತ್ರದ ಪೂರ್ವಾರ್ಧವನ್ನು ಹಾಡುವ ರಾಗದಲ್ಲೇ ಉತ್ತರಾರ್ಧ ಹಾಡಿ ಮುಗಿಸಬೇಕು. ಈ ಕೈಂಕರ್ಯದಲ್ಲಿ ಅಣ್ಣತಮ್ಮಂದಿರಾದ ಜಗ್ಗು ತಿರುನಾರಾಯಣ ಅಯ್ಯಂಗಾರ್ ಮತ್ತು ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ ಅವರುಗಳು ಖ್ಯಾತರಾಗಿದ್ದರು. ರಾಮಾಂಜಣ್ಣನವರು ಈ ಸ್ತೋತ್ರಪಾರಾಯಣದಲ್ಲಿ ಅತ್ಯಂತ ಭಕ್ತಿ ಪೂರ್ವಕವಾಗಿ ಹಾಡುತ್ತ ಹಲವಾರು ಭಕ್ತಜನರ ಕಣ್ಣಲ್ಲಿ ಕೋಡಿ ಹರಿಸಿದ್ದುಂಟು.

ರಾಮಾಂಜಣ್ಣ ಮತ್ತು ಆಳ್ವಾರಣ್ಣ ಇಬ್ಬರೂ ಕೂಡಿ ಚೆಲುವರಾಯ ಸ್ವಾಮಿ ದೇವಸ್ಥಾನದ ಅಮ್ಮನವರ ಗುಡಿಯ ರಂಗ ಮಂಟಪದಲ್ಲಿ ಹಲವಾರು ವರ್ಷಕಾಲ ಪುರಾಣ ಪ್ರವಚನ ನಡೆಸುತ್ತಿದ್ದರು. ರಾಮಾಂಜಣ್ಣ ರಾಗಭರಿತವಾಗಿ ಓದುವುದು, ಆಳ್ವಾರಣ್ಣ ಕನ್ನಡಾನುವಾದವನ್ನು ರಸಭರಿತವಾಗಿ ವರ್ಣಿಸುವುದು. ಕುರುಹಿನ ಶೆಟ್ಟಿ ಜನಾಂಗದವರು, ಒಕ್ಕಲಿಗರು ಈ ಪ್ರವಚನದ ಶ್ರೋತೃಗಳಾಗಿದ್ದರು. ಭಾರತ, ಭಾಗವತ, ಹರಿವಂಶ, ರಾಮಾಯಣ ಮೊದಲಾದ ಪುರಾಣಗಳನ್ನೆಲ್ಲ ಸಾಮಾನ್ಯ ಜನಕ್ಕೂ ಮನಮುಟ್ಟುವಂತೆ ಹೇಳಿ ತಿಳಿಸುತ್ತಿದ್ದರು.

ಈ ಪ್ರವಚನವೂ ಸಹ ಆಳ್ವಾರಣ್ಣನವರಿಗೆ ಅನೇಕ ವೇಳೆ ಕಾವ್ಯರಚನಾ ಸ್ಫೂರ್ತಿಯ ಚಿಲುಮೆಯಾಗಿರುತ್ತಿತ್ತು.

ಆಳ್ವಾರಣ್ಣನವರ ಕೃತಿಗಳಲ್ಲಿ ಕೆಲವೊಂದನ್ನು ಹಸ್ತಪ್ರತಿಯ ರೂಪದಲ್ಲಿ ಡಾ|| ಡಿ.ವಿ.ಜಿ. ಅವರಿಗೂ 'ಜೀವನ' ಸಂಪಾದಿಸುತ್ತಿದ್ದ ಅಣ್ಣ ಮಾಸ್ತಿಯವರಿಗೂ ತಂದು ತಲುಪಿಸಿ, ಅವರು ಓದಿದ ನಂತರ ಹಿಂದಿರುಗಿ ಪಡೆದು ಊರಿಗೆ ಕೊಂಡೊಯ್ದು ವಾಪಸು ಮಾಡಿದ ಸೌಭಾಗ್ಯ ನನ್ನದಾಗಿತ್ತು. ಡಾ|| ಡಿ.ವಿ.ಜಿ. ಅವರಿಗಂತೂ ನಮ್ಮ ಇಡೀ ವಂಶದ ಬಗ್ಗೆ ಅಪಾರವಾದ ಅಭಿಮಾನ. 1963-64 ರ ಸುಮಾರು ಆಳ್ವಾರಣ್ಣ ಮೇಲುಕೋಟೆ ಬಿಟ್ಟು ಬೆಂಗಳೂರಿಗೆ ಬಂದು ನೆಲೆಸಿದ್ದರು. ಡಾ|| ಡಿ.ವಿ.ಜಿ. ಯವರು ಒಮ್ಮೆ ಪ್ರಾಸಂಗಿಕವಾಗಿ ಮಾತಾನಾಡುತ್ತ ಮೇಲುಕೋಟೆಯಲ್ಲಿ ವಕುಳಭೂಷಣರು ಚೆನ್ನಾಗಿದ್ದಾರೆಯೇ ಎಂದು ನನ್ನನ್ನು ಕೇಳಿದರು. ಆಳ್ವಾರಣ್ಣ ಬೆಂಗಳೂರಿಗೇ ಬಂದು ನೆಲೆಸಿದ್ದಾರೆಂದು ತಿಳಿಸಿದೆ. ಒಡನೆಯೇ ಡಿ.ವಿ.ಜಿ., ''ನಾನೊಮ್ಮೆ ಅವರನ್ನು ನೋಡಬೇಕು, ಮಾತಾಡಬೇಕು, ದಯವಿಟ್ಟು ನೀನು ಅವರನ್ನು ನಮ್ಮ ಮನೆಗೆ ಒಮ್ಮೆ ಕರೆತರುತ್ತೀಯಾ ನಾರಾಯಣ'' ಎಂದು ಕೇಳಿದರು. ''ಈ ಬೇಡಿಕೆಯಾಕೆ, ನೀವು ಅಪ್ಪಣೆ ಮಾಡಿ, ನಾನು ಕರೆತರುತ್ತೇನೆ'' ಎಂದೆ. ಅದಕ್ಕವರು ''ನಿನಗೆ ಅಪ್ಪಣೆ ಮಾಡಬಹುದು. ಆದರೆ ವಕುಳ ಭೂಷಣರಂತಹ ದಿವ್ಯಚೇತನಕ್ಕೆ ಅಪ್ಪಣೆ ಮಾಡುವ ಯೋಗ್ಯತೆ ನನಗಿಲ್ಲ ಕಣಯ್ಯ. ಅವರಲ್ಲಿ ಪ್ರಾರ್ಥನೆ ಮಾತ್ರ'' ಎಂದರು.

ಇದಾದ ನಾಲ್ಕೈದು ದಿನಗಳಲ್ಲಿ ಆಳ್ವಾರಣ್ಣನನ್ನು ಡಿ.ವಿ.ಜಿ. ಅವರ ಮನೆಗೆ ಕರೆದೊಯ್ದೆ. ಡಾ|| ಡಿ.ವಿ.ಜಿ. ಮನೆಯೊಳಗಿಂದ ಅಭ್ಯುತ್ಥಾನ ಮಾಡಿ ಬಾಗಿಲಿಗೇ ಬಂದು ಅಣ್ಣನನ್ನು ಸ್ವಾಗತಿಸಿದರು. ಆ ಸಮಯ ಡಾ|| ಜಿ.ಪಿ.ರಾಜರತ್ನಂ ಸಹ ಅಲ್ಲಿದ್ದರು. ಅವರಂತೂ ಅಣ್ಣನವರಿಗೆ ದೀರ್ಘದಂಡ ಪ್ರಣಾಮವನ್ನೇ ಮಾಡಿಬಿಟ್ಟರು.

ಆಳ್ವಾರಣ್ಣನವರಿಗೆ ಡಾ|| ಡಿ.ವಿ.ಜಿ. ಯವರಂತಹ ದೊಡ್ಡ ವ್ಯಕ್ತಿ ತಮ್ಮ ಕೃತಿಗಳನ್ನು ನೋಡಿಯಾದರೂ ನೋಡಿರಬಹುದೇ ಎಂಬ ಶಂಕೆ ಇತ್ತು. ''ನನ್ನ ಈ ಪುಸ್ತಕವನ್ನು ಅವಲೋಕಿಸಿದ್ದೀರಾ?'' ಎಂದು ಒಂದು ಪ್ರಕಟಿತ ನಾಟಕವನ್ನು ಅವರ ಕೈಗಿತ್ತರು. ಸ್ವಲ್ಪವೇ ದಿನ ಮೊದಲು ಅದೇ ಪುಸ್ತಕವನ್ನು ನಾನು ಡಿ.ವಿ.ಜಿ. ಅವರಿಗೆ ತಲುಪಿಸಿದ್ದೆ.

ಒಡನೆಯೇ ಡಿ.ವಿ.ಜಿ. ಯವರು ತಾವು ಮೆಚ್ಚಿಕೊಂಡಿದ್ದ ಆ ಗ್ರಂಥದಲ್ಲಿನ ಒಂದು ಪದ್ಯವನ್ನು ಹೇಳಿ, ''ನೋಡಿ ವಕುಳ ಭೂಷಣರೇ, ನಾನು ಅವಲೋಕನ ಮಾಡಿಲ್ಲ, ಆಲೋಡನ ಮಾಡಿದ್ದೇನೆ'' ಎಂದರು. ಆಳ್ವಾರಣ್ಣನವರಿಗೆ ಅಂದು ಆದ ಆನಂದಕ್ಕೆ ಇತಿಮಿತಿಯೇ ಇರಲಿಲ್ಲ. ಬಹಳ ಹೊತ್ತು ಅವರುಗಳ ನಡುವೆ ಕಾವ್ಯಾಲಾಪ ನಡೆಯಿತು. ಸರಿರಾತ್ರಿ ವೇಳೆಗೆ ಆಳ್ವಾರಣ್ಣನನ್ನು ಮನೆ ತಲುಪಿಸಿ ಬಂದೆ.

ಆಳ್ವಾರಣ್ಣನಿಗೆ ನಿಸರ್ಗಪ್ರೇಮ ಆಜನ್ಮ ಅಂಟಿದ್ದು. ಅವರಿಗೆ, ಸೂರಿನಡಿ ಕುಳಿತಾಗ ಉಂಟಾಗದ ಕಾವ್ಯಸ್ಫೂರ್ತಿ, ಸೂರ್ಯನಡಿ ಬಟ್ಟಬಯಲಲ್ಲಿ ಕುಳಿತಾಗ ಅವಿಚ್ಛಿನ್ನ ಸ್ರೋತೋ ರೂಪರಾಗಿ ಉಕ್ಕಿ ಹರಿಯುತ್ತಿತ್ತು ಎಂದು ಅವರೇ ಕೆಲವೊಮ್ಮೆ ಹೇಳಿದ್ದನ್ನು ಕೇಳಿದ್ದೇನೆ.

ಚಿಕ್ಕವಯಸ್ಸಿನಲ್ಲಿ ಪರ್ಯಟನವನ್ನೇ ಮಾಡದಿದ್ದ ವಕುಳ ಭೂಷಣರಿಗೆ ಪರ್ಯಟನದ ಅನುಭವಗಳೆಲ್ಲ ಸಾಕ್ಷಾತ್ಕಾರವಾದಂತೆ ಒಳಗಣ್ಣಿನಿಂದ ನೋಡುವ ಸೂಕ್ಷ್ಮಮತಿಯನ್ನು ದೇವರು ಅನುಗ್ರಹಿಸಿದ್ದನೆಂಬುದರಲ್ಲಿ ಸಂದೇಹವೇ ಇಲ್ಲ.

ಅವರು ಶುದ್ಧ ಸಂಸ್ಕೃತವೊಂದನ್ನಲ್ಲದೆ ಬೇರೆ ಯಾವ ಭಾಷೆಯನ್ನೂ ಶಾಸ್ತ್ರವತ್ತಾಗಿ ಅಧ್ಯಯನ ಮಾಡಲಿಲ್ಲವಾದ ಕಾರಣ ಅವರ ಕವಿತಾ ಪ್ರೌಢಿಮೆಯೆಲ್ಲ ಪರಿಶುದ್ಧವಾಗಿ ಪರಂಪರಾಗತ ಶೈಲಿಯಲ್ಲೇ ಅಭಿವ್ಯಕ್ತಗೊಂಡಿದೆ. ಅವರು ಸಂಸ್ಕೃತದಲ್ಲೇ ಚಿಂತಿಸಿ ಸಂಸ್ಕೃತದಲ್ಲೇ ರಚನೆಮಾಡುವ ಅಪರೂಪದ ಕವಿ. ಕನ್ನಡದಲ್ಲೋ ಇಂಗ್ಲಿಷ್‌ನಲ್ಲೋ ಚಿಂತಿಸಿ ಸಂಸ್ಕೃತದಲ್ಲಿ ಕವಿತ್ವ ಮಾಡುವ ಕಸರತ್ತು ಇವರ ಕಾವ್ಯಗಳಲ್ಲಿ ಗೋಚರಿಸುವುದಿಲ್ಲ. ಇವರ ಕೃತಿಗಳು ಕಲಬೆರಕೆಯಿಲ್ಲದ ಪರಿಶುದ್ಧವಾದ ಸರಳ ಸರಸ ಕಾವ್ಯಗಳೆಂಬುದರಲ್ಲಿ ಎರಡು ಮಾತಿಲ್ಲ.

IV

1902 ನೆ ಇಸವಿ. ಪ್ಲೇಗ್ ಮಹಾಮಾರಿ ದೇಶಾದ್ಯಂತ ಕಾಡುತ್ತಿದ್ದ ಸಮಯ. ದಿವ್ಯಕ್ಷೇತ್ರವೆಂದು ಮೇಲುಕೋಟೆಯನ್ನು ಮನ್ನಾಮಾಡಲು ಅದೇನು ಧರ್ಮದೇವತೆಯೇ! ಹೇಳಿ ಕೇಳಿ ಮಹಾಮಾರಿ. ಮನೆ ಮನೆಯಲ್ಲೂ ಇಲಿಗಳು ಸತ್ತು ಬೀಳುತ್ತಿದ್ದುವು. ಇಲಿ ಸತ್ತು ಬಿದ್ದ ಮನೆಯವರೆಲ್ಲ ಒಕ್ಕಲೆತ್ತಿ ಬೆಟ್ಟವಿಳಿದು ಬಯಲಿಗೆ ಹೋಗಿ ನೆಲೆಸುತ್ತಿದ್ದರು. ಅಲ್ಲಿ ಹೊಲಗಳಲ್ಲಿ ನೀರಿನಾಸರೆ ಇರುವ ಸ್ಥಳಗಳಲ್ಲಿ ಗುಡಿಸಲು ಹಾಕಿಕೊಂಡು ಬದುಕು ತಳ್ಳುತ್ತಿದ್ದರು. ಅದೇ ಸಮಯದಲ್ಲಿ ಜಗ್ಗೂ ಕುಟುಂಬದವರು ಸಹ ಊರು ತೊರೆದು ಕೊಡೆಕೊಪ್ಪಲು ಎಂಬ ಹೆಸರಿದ್ದ ಸ್ಥಳಕ್ಕೆ ಹೋಗಿ ಗುಡಿಸಲು ಕಟ್ಟಿಕೊಂಡು ವಾಸಿಸುತ್ತಿದ್ದರು. ಶ್ರೀ ತಿರುನಾರಾಯಾಣ ಅಯ್ಯಂಗಾರ‍್ಯರ ಧರ್ಮಪತ್ನಿ ಶ್ರೀಮತಿ ಶಿಂಗಮ್ಮನವರು ಆಗ ಪೂರ್ಣ ಗರ್ಭಿಣಿ. ಅದು ಅವರ ಮೂರನೆಯ ಗರ್ಭಧಾರಣೆ. ಬಿಸಿಲು, ಗಾಳಿ, ಮಳೆಗಳಿಗೆ ತೆರೆದುಕೊಂಡು ನಿಂತ ಪ್ರಕೃತಿಯ ಮಡಿಲಾಗಿತ್ತು ಕೊಡೆಕೊಪ್ಪಲು. ಅಲ್ಲಿ ಅಡಿಗಬ್ಬಿಗಾಗಿ ಸಗಣಿ ಕಲೆಸಿ ಬೆರಣಿ ತಟ್ಟಲು ಉದ್ಯುಕ್ತರಾಗಿದ್ದಾಗ ಶಿಂಗಮ್ಮನವರಿಗೆ ಆ ಬಿಸಿಲ ಬಯಲಲ್ಲೇ ಪ್ರಸವವಾಯಿತಂತೆ. ಕುಟುಂಬದ ಇತರ ಹೆಂಗಸರು ಪ್ರಸವದ ಉಪಚಾರಗಳನ್ನೆಲ್ಲ ನೆರವೇರಿಸಿದರಂತೆ. ಹೀಗೆ ಬಟ್ಟಬಯಲಲ್ಲಿ ಜನಿಸಿದವರು ವಕುಳ ಭೂಷಣರು.

ಆವರಣವೊಂದರ ಎಲ್ಲೆಕಟ್ಟಿಲ್ಲದ ಮುಕ್ತವಾತಾವರಣದಲ್ಲಿ ಹುಟ್ಟಿದ್ದರಿಂದಲೇ ಅವರು ಪ್ರಕೃತಿಯೊಂದಿಗೆ ಬೆರೆತಂತೆ ತಮ್ಮ ಕಾವ್ಯಗಳಲ್ಲಿ ಪ್ರಕೃತಿವರ್ಣನೆಯನ್ನು ಕಣ್ಣಿಗೆ ಕಟ್ಟುವಂತೆ ಬಿಡಿಸಿದ್ದಾರೆಂದರೆ ಅತಿಶಯೋಕ್ತಿಯಲ್ಲದ ಅತಿಶಯೋಕ್ತಿಯೇ ಸರಿ.

ಜಗ್ಗು ನಾರಾಯಣ
ಪತ್ರಕರ್ತ

||श्रीः||

।। जग्गुवकुलभूषणपद्यपद्धतिः ।।

इह खलु नवतिवसन्तसन्तानपादपसन्ततिकान्तिकन्दलितकविकुलवतंसो जग्गुकुलभूषणो वकुलभूषणकविः स्वकीयेन पद्यविद्यावैदुष्येण कर्णाटककटकमेव न केवलं किन्तु समग्रमपि संस्कृतसंस्कृतं राष्ट्रं च समाकर्षति सुधां वर्षति च। अस्य कविवरस्य रूपकाणि विशेषतया संख्याबाहुल्येन गुणगौरवेण च शुद्धपद्धत्यापि परां प्रसिद्धिमधिवसन्ति। प्रायः सरसकविषु दाक्षिणात्येषु वर्तमानेषु कविरयमेष नानानाटकनिर्माता विख्यातात्मा च। अस्य रूपकचक्रमवक्रमपि वक्रोक्तिविलसितं, चक्राह्वयमपि कुमुदानन्दसंबन्धितं, कुमुदानन्दसम्बन्धितमपि सदास्वादसम्भावितं चक्रिचरणचारणचक्रवर्तित्ववर्तिप्रदीप्तप्रदीपिकाप्रख्यं मुख्यं च सुतरां दरीदृश्यते। बहुविधसौन्दर्यसिन्धुकल्लोलवेल्लितमिदं सारस्वतसौभाग्यं विद्वद्रसिकानां धिषणाकषपट्टिकासु प्रोन्मथितं स्वकीयं सुवर्णपूर्णत्वं, तपनीयकमनीयतां, जातरूपरूपश्रियं, हाटकपाटवं अभिव्यञ्जयितुं स्वतःसमर्थं च सिद्धमपि प्रबुद्धमपि वर्तमानसंस्कृतसाहितीबालातपमजानद्भिः जगन्नाथोत्तरगीर्वाणीदर्शविमर्शने एव निबद्धदृष्टिभिः कृष्टिभिश्च कृत्स्नं न प्रस्तूयमानं विचिकित्सितमिति खेदप्रपञ्चप्रपञ्चनेन अलम्। यतः कालो निरवधिर्विपुला च पृथ्वीति युक्तमाख्यातं भावभूतीनां विभूतिविषये भवभूतिना कविना।

सम्प्रति वकुलभूषणस्य वकुलभूषणमिव विमर्दव्यक्तसौरभ्या भासमानाऽसमाना भारती नैकगुणगणितमस्तोकं स्वारस्यं लास्यमिव

बिभर्त्यपि कथमिव सा सारवती सरस्वती पद्यपद्धत्यां समन्वितपदा पदे पदे अलोकमोहकं बिब्बोकं तनोतीति यथामति मथ्नीमः।

पद्यपद्धतिर्नाम छन्दोयाने वागर्थव्यापारो वा वृत्तशरीरे शब्दार्थात्मव्यापृतिरिति। तथापि प्रधानतयाऽत्र छन्दोगतिः पदगतिश्च कथं पद्यगतिं श्रवणपुटमधुरां धुरि साधयतः इत्येव मीमांसा। यतः यमातादिगणप्रधाना छन्दः पदगतिः सुबन्ततिङन्तादिशब्दप्रधाना भाषापदगतिः कथं च लयान्वितं वा लयरहितं वा वैविध्यात्मकमपि हृद्यपरिचितिचमत्कृतं गमनं स्वसमवायसंयोजनशय्याप्रक्रियया साधयतः सरसविधिनेति परीक्षा खलु कवेः पद्यविद्याविद्याधरत्व निरूपणे परमं प्रमाणं प्रतितिष्ठति। अत्र एको हि गुरुः कथं संयुक्ताक्षरत्वात्, अनुस्वारत्वात्, विसर्गात् दीर्घत्वाद्वा विभिन्नः परिणमति श्रुतिप्रसादने व्यञ्जकत्वेऽपीति समारभ्य लाघवं वर्णेषु वा गौरवं च तत्तदुत्पत्तिस्थानक्रमात्कीदृशं वितरति वैशद्यमिति जिज्ञासा जीवातुभूता वरीवर्ति। व्यञ्जनस्वरयोर्वर्गीयावर्गीययोः प्रकृष्टा मैत्री, मृदु-परुष विभागयोर्वादित्वं संवादित्वं च कथं फलन्तीति च विज्ञानं वेदितव्यम्। वृत्तानां समत्वासमत्वे, द्रुतमध्यविलम्बितमिश्र गतयः, संकलितावर्ततिश्रचतुश्रखण्डमिश्रसंकीर्णगतयः सामाहृत्य कमपि नूतनं परिभाषाप्रपञ्चं रचयन्ति। तेषां विनियोगविभागसंयोग प्रयोगसौदर्यं कथं कविना साधितमित्यपि विमर्शनं परंप्रामुख्यमधितिष्ठति।

अथ समारभ्यते पद्यपद्धतिप्रस्थानं वकुलभूषणकवेः सरसौचित्य सार्थवाहनीयमानमसमानं च।

श्लोक एव पुण्यश्लोकः पद्यविद्याप्रपञ्चे। अनुष्टुप्वंशवतंसोऽयं कुटुम्बाभिधानेनैव सार्थकातिव्याप्तिसौभाग्यं बिभ्रति। कविना

वकुलभूषणेन बहुधा प्रस्तावनासु प्रयुक्तोऽयं पद्यबन्धः। क्वचिन्नांदीरूपेण, क्वचित् वर्णनवेगेन, क्वचिद्ध्रस्वव्याख्यानेन सनाथीकृतश्च श्लोकः।

यथा कंसहिंसानिर्हिंसाय मधुरां मधुराननः।
प्राप्य माल्यकृतो माल्यैरञ्चितः पातु नस्स्वभूः॥

(मुग्धकुन्तलं I-1)

पद्यमिदं वस्तुनिर्देशकं यमकझंकृतं प्रासरासान्वितं च गोदायाः पुष्पमालाग्रथनमिव संश्लिष्टं पुष्टमपि रसार्थेन क्षेमेन्द्रमाधुरीं स्मारयति।

कविं बुधं विलोक्यैव लक्ष्मीरुद्वेजिता स्वयम्।
दूरं धावति संत्यज्य कामिनीव नपुंसकम्॥ (व्रतफलं II-8)

वैयासिकगन्धि वृत्तमिदं 'सुवृत्तविलक' कारमतानुसारमुपदेश योग्यं साधु साधयति पाटवम्। व्यस्तपदघटनापि सन्निवेशपोषकमिति नास्ति सन्देहलेशः।

एकादशाक्षरघटितेषु समवृत्तेषु शालिनी मदशलिनी कुम्भिनीव गम्भीरगतिः सम्भालनशक्तियुक्तानामेव वश्या गुरुगुम्भिता च।

बन्धुर्दाराः पुत्रमित्रादिकं च श्रीमान् सर्वं वासुदेवो मदीयम्।
बन्धुत्वेनाभासमानैः किमन्यैः संसारोर्मिक्लेशसंवर्धकैस्तैः॥

(मुग्धकुन्तलं I-8)

गहनं च वस्तुगौरवमनुसृत्य निबद्धमिदं वृत्तं व्यस्तपदप्रस्तर पथवत्सुगमं चापि विशदमैकान्तिकमात्रयोग्यम्। अत्र तात्त्विकप्रसङ्गः, भगवच्छरणागतिः, महाविश्वासः तथा संसारसागरसंत्रासस्वरूपं

सर्वमपि वृत्तस्यास्य प्रारम्भिकगुरुचतुष्टयेन तथा यतिस्थानेन सुदृढेन च अनुगम्यमानविलम्बितगतिगन्धितोत्तरार्धेन प्रकटितम्। पद्यस्योत्तरार्धे प्रधानतया भासमानैः ऐकारैश्च लोकस्य क्लेशात्मकव्यवसायः प्रदर्शितः।

अस्मिन्नेव रूपके विद्यमानं दोधकवृत्तं यदप्रचुरं काव्येषु प्रयोक्तं कविनानेन स्वच्छन्दोऽभिज्ञतानिदर्शनाय (I-11)

तदनन्तरमत्रैव दृश्यमानं रथोद्धतावृत्तं स्वीयसंकलनगतिं (तिश्र-खण्डयोः) सलयं प्रतिपादयत् वनस्थलीस्वारस्यं तनुते।

पारिजाततरुशाखिकाग्रतश्शोणवृन्तकुसुमानि वायुना।
चालिता विनिपतन्ति भूतले माधवार्चनविडम्बकान्यहो॥

(I-12)

उत्प्रेक्षा प्रोक्षितमिदं पद्यं रीतिरसत्वेन कालिदासीयमेव। अस्यैव वृत्तस्य रुचिप्राचुर्यं रसनेन्द्रियविषयं श्रवणेन्द्रियाधीनं कारितं पद्येनानेन;

शाकसूपघृततेमनोदनं तिंत्रिणीरसविशेषदानतः।
लाजकं विततपर्पटं तथा पायसं च परिवेषितं गुणैः।

(कौमुदीयम् II-2)

प्रायः संयुक्ताक्षरविहीनं मध्यगतिगण्यमिदं वृत्तं विप्राणां भोजनवृत्तं त्वरितपथे गच्छदपि सावधानदीर्घाक्षरैः विरलकर्कशाक्षरैः रसभोजनमिव निरूपयति। पूर्वार्धस्य दीर्घसमासत्वं भोजनारम्भे क्रियमाणाहमहमिकयाऽविरतचर्वणं चोत्तरार्धस्य व्यस्तघटना भोजनान्ते क्रियमाण मंदमन्दचर्वणं व्यञ्जयितुं क्षमे।

आर्षत्वध्वनने श्लोकच्छन्दसः कनीयदिव चकास्ति किलोपजाति वृत्तम्। कविनानेन कलिकालुष्यरूपके आर्षत्वाभिनव्यत्वयोः वैदृश्यं कल्पयितुमिव सूत्रधारमुखे पद्यद्वयं प्रस्तुतम्। तत्रैकम्;

सत्कर्म कर्तुं जनता न सज्जा जारत्वचौर्यैकरतानृतोक्तिः।
अराजकं हन्त जगद्धनार्थं परस्परं हन्ति भयात्मिका भूः॥

(I-2)

सरलतया निरलंकृतमिदं वृत्तं छान्दसस्वरूपोद्दीपने समर्थं च स्फोटयति रूपकस्येतिवृत्तवैचित्र्यम्। प्रायः सर्वेऽपि शब्दाश्चात्र प्रयुक्ताः यादृच्छिकभावं चिन्वन्ति च निर्वेदस्फुरणे शक्ताः। द्वादशाक्षरघटितेषु वृत्तेषु कवेः प्रीतिर्द्रुतविलम्बिते भूरि भाति।

उदयपर्वतशृङ्गगतो रविर्निजकरैः परिनुन्नतमःपटः।
भ्रमरझंकृतिवाद्यमनोहरः कमलिनीमनुरञ्जयति प्रियाम्॥

(कौमुदीयम् I-10)

अनर्घभास्वरमिदं समासोक्तिसमासन्नं प्रसन्नं पद्यं नुदति मनांसि रससागरे। प्रातः कालोचितं वृत्तं खंडिताप्रसादनरतं भीतिप्रीतिप्रपन्नं कान्तं कमलिनीकान्तं स्वकीयद्रुतविलम्बितगत्या समर्थं साक्षात् कारयति।

तथा च कलिकालुष्येऽपि शुनकपोतवर्णनावसरे हृद्यविधौ द्रुतविलम्बितमेव रसलम्बितं नियुक्तम्।

क्रकचसन्निभदन्तपरम्परः किसलयारुणचिक्कणजिह्विकः।
मसृणशुभ्रतनूरुहमञ्जुलः पटुतराक्षियुगोऽरुणनासिकः॥ (II-2)

पूर्वार्धे सादृश्यमूलालंकारश्चोत्तरार्धे स्वभावोक्तिरपि पद्यशिल्पस्योपकारिणौ। सामान्यं च प्रायिकं तिरस्कार्यवस्त्वपि कथमत्र कमनीयगतिगण्ये वृत्ते श्रुतिमतिप्रणयालंकारसंस्कारे च सज्जं चेतोहरं भवतीति निदर्शितम्। प्रायेण मधुरसमासपद्धतिरेव कविना वृत्तस्यास्य निर्वहणे सर्वत्र सम्भाविता।

संस्कृतसाहित्ये वंशस्थविलस्य यावती ख्यातिर्न तावतीन्द्रवंशस्य। परं जगुवंशभूषणस्यास्य चोपेन्द्रवंशकीर्तनकौशलस्य प्रीतिरिन्द्रवंशे हि।

वितीर्णामृतस्य नान्दीपद्यमेव साक्ष्यत्र।

त्यक्त्वान्यदैवान्निजपादमानसान् यः प्रापयत्यात्मविशुद्धिसम्पदम्।
कारुण्यपाथोनिधिमम्बुजेक्षणं वन्दे मुकुन्दं तमशेषपोषणम्॥

(I-1)

वृत्तेऽस्मिन् पादादिमगुरुर्लयसामर्थ्यं समत्वेन साधयति। तस्माद्ध्येयेऽपि माधुरीं धुरि प्रकाशयति।

रूपकेऽस्मिन् इन्द्रवंशोपजातिवृत्तयोस्संयोगरूपेण किमप्यर्धसमं (वा विषमं, यतः उपजातिरिन्द्रोपेन्द्रवज्रात्मिका) वृत्तं प्रयुक्तम्। ईदृशः प्रयोगः प्रायेण भगवत्पादैराचार्यशङ्करैरपि विवेकचूडामणौ कृत एव। तद्यथा कवेरस्य वृत्तम्;

दृष्ट्वा भवन्तं परिपूतमानसाः सेवापराः पुष्पफलप्रदानैः।
ते मन्यमाना ननु धन्यतां हृदि स्मरन्ति पूर्वार्जितभाग्यपङ्क्तिम्॥

(I-15)

अत्रेदं वैशिष्ट्यं यन्निर्विरामलयात्मकेन्द्रवंशपादौ विषमस्थाने सविरामलयात्मकोपजातिपादौ समस्थाने समागत्य पाठ्ये वा क्षिप्रगेयेऽपि पारिपूर्ण्यं कल्पयन्ति च पद्यस्यपूर्वोत्तरार्धयोरन्ते कर्षणात्मकालपनाय व्यवधिमपि दिशन्तीति।

पञ्चमात्रालयात्मकं, खण्डगतिगण्यं, यगाणात्मकं भुजङ्गप्रयातवृत्तं स्फूर्जत्पूरिपूरप्रकारं भावोद्वेगनिर्भरं तीव्रं च।

जगत्सृष्टिरक्षाविनाशादिकार्यं तदायत्तमेव श्रुतिस्तुत्य एषः।
स्वसङ्कल्पमात्रेण पुत्रं च लब्धुं समर्थः किमर्थं तपःक्लेशितोऽत्र॥

(वितीर्णामृतम् II-2)

पद्यमिदं विद्युत्तरङ्गितं कालिदासीयवाक्यं 'केनापि कामेन तपश्चचारं' नामकं स्मारयति। सामान्यतया प्रासानुप्रासप्लावितं भवति भुजङ्गप्रयातम्। किन्त्वत्र न तथा। यतः सलयानि वृत्तानि सशब्दालङ्काराणि प्रायः क्लेशयन्त्यर्थरसिकान्। विशिष्य पद्यमिदं ध्वनिनिर्भरम्। यदत्र स्वसङ्कल्पमात्रेण.... इत्यादि प्रद्युम्नस्तु काम एव च सोऽपि सङ्कल्पयोनिरिति मनसिज इति ख्यातः। वेदेऽपि 'कामस्तदग्रे समवर्तताधी' त्यादिभिः सूचितानुसारं परमरञ्जकमिदं भावव्यञ्जनायनं रसायतनञ्च।

त्रोटकं वा तोटकमिति यत्कीर्तितं सगणचतुष्टयपुष्टं चतुश्रगतिगमकितं चतुर्मात्रात्मकं वृत्तं तालबद्धेष्वन्यतमम्।

किमिदं किमिदं भगवान् भवनात् चलितः किमितः परमत्र गृहे।
वसतिर्मम नैव मता तदहं निवसामि पवित्रगृहे प्रयतः॥

(कलिकालुष्यम् II-15)

अत्र व्यस्तपदेषु बहुधा तत्तद्गणमात्रगात्रेषु संस्पन्दित यान्त्रिकत्वात्संसूचितसत्यव्रतचित्तक्षोभः सर्वथा ध्वनिरागिभिर्न विस्मर्यते।

औपच्छन्दसिकापि कवेः प्रियं वृत्तम्। वियोगिन्यपरवक्त्रा पुष्पिताग्राख्य वृत्तत्रयकुटुम्बे सदस्यत्वेन चतुर्थमिदमपि वृत्तमौपच्छन्दसिकाख्यं साम्यं बिभर्ति यदर्धसमगतिगीतम्।

मृगराजमहं वने चरन्तं मृगयायां विशिखेन तं निहत्य।
हरणे परकन्यकाजनानां निपुणं हन्मि रणे क्षणेन कृष्णम्॥

(स्यामन्तकम् III-6)

पद्येऽस्मिन् महती पदपटुता च दीप्तिरुत्तप्तकाञ्चनकल्पा सुचिरं रञ्जनाय सज्जनानां भवेताम्। प्रायेण व्यस्तपदपुञ्जितमिदं निपुणं व्यनक्ति प्रसेनस्य लाघवं यच्छ्रीकृष्णवैषयिकम्।
तथा च लघुलघूनि पदानि प्रत्यरं प्रभावयन्ति पात्रमनस्तत्त्वम्।

मञ्जुभाषिणीवृत्तमपि मञ्जुभाषिणं वकुलभूषिणं कविभूषणं विपुलं समाकर्षति वर्षति च सुधामधुरशब्दमरन्दममन्दम्। स्यामन्तके प्रणयलेखनमेकं वृत्तेनानेन निबद्धं कवेश्चातरीशेखरीभूतं चकास्ति नितान्तम्। मञ्जुभाषिणी नूनं प्रणयभाषिणी।

भवदीयघोरविरहातुरं प्रिये विविधप्रसूननिचयं प्रदर्श्य माम्।
मधुमास एष मदनानलाकुलं प्रतिभाति हन्त गिलतीव साम्प्रतम्॥

(IV-7)

नाम्ना समाम्नातमिदं वृत्तं सन्दर्भेऽस्मिन् स्वारस्यं सम्यगुद्धिपय तीति न वक्तव्यमेव प्रत्येकतया।

तथा च कलिकालुष्ये मुग्धबालकवर्णनावसरे नियुक्तं वृत्तमिदमेव निजया पंचमात्रात्रिमात्रामिश्रितसङ्कलितगत्या उल्लासमनन्यं विन्यस्य प्रतिपादान्त्यविसर्गाणां निसर्गसौन्दर्यं दर्शयति।

असितानुमिश्रमधुवषर्णकुन्तलः समुदञ्चदिन्दुनिभकान्तवक्त्रकः।
पृथुबाहुसक्थितलरेखिकाञ्चितः स्खलितांघ्रिरेष कतिचिद्रदांकुरः॥
(II-6)

पद्यमिदं निजार्थेनापि मनोज्ञं च स्वभावोक्तिशक्तम्। प्रायेण समस्तपदपल्लवप्रफुल्लितमिदं पद्यलतावितानं अनुनासिकबाहुल्येन सूचितबालालापं तत्कैशोर्यगमनमिव ललत्पदं मुहुर्मुहुरामोदयति। ईदृशं ललितवृत्तं कथं रणतांडवं कर्तुं क्षममित्यस्यैव कवेः वीरसौभद्रगतमिदमपरं पद्यं पश्यामः।

प्रलयप्रचण्डपृषदश्वसत्वरस्तरवारिदीर्णपरवारणव्रजः।
शरवर्षशीर्णपटुघोटकच्छटो विकटक्रमोद्भटभटावमर्दनः॥

अत्र परुणवर्णानां मूर्धन्यानां, ऊष्मवर्णानां च संयुक्ताक्षरबाहुल्य जाटिल्यं प्रचण्डतया वीरवैखरीमौखर्यं प्रतिपादयति। रेफान्विताः प्रलय - प्रचण्ड - दीर्ण - शीर्णादयश्च शब्दाः कार्कश्यं गुणात्मकत्वेन योजयन्ति।

वसन्ततिलकवृत्तं वृत्तवनान्तरे वसन्तमाकन्दश्रियमावहति। कविरयं बहुनिष्णातो वृत्तस्यास्य निर्वहणे। भासस्येव कवेरस्यापि रूपकाणि वसन्ततिलकप्रचुराणि। भोज इव रत्नाकर इव वसन्ततिलकप्रियतान्वितोऽयमपि। प्रायेण स्पष्टयतिविवर्जितं मध्यमगति युतं गुरुलघुसंख्यासमत्वसंपन्नं वृत्तमिदं वसन्ततिलकं संस्कृतसाहित्यस्य

स्फूर्तिद्योतकमिति नातिशयोक्तिः।

वर्षोरुनीरपरिषिक्तसमस्तचेल
निम्नोन्नताङ्गपरिदर्शितदेहमौग्ध्या।
केशाग्रनिःसृतजलार्द्रनितम्बबिम्ब
बाहुद्वयस्थगितपीनपयोधरेऽयम्॥ (प्रबुद्धप्रज्ञम् II-2)

वर्षाकालस्य दुर्दम्यस्वरूपं च रूपमवार्यरम्यं देवदेव्याश्च युगपद्दर्शयदिव वृत्तमिदं घोषगम्भीरं तरसा सरसकालं प्रतिपादयति। पयोधरशब्दगतश्लेषोऽपि हृद्यः। प्रतिपादेषु दण्डायमानसमास धोरणाप्यसाधारणा निर्विरामवर्षाकालविजृम्भणं द्योतयति।

स्वभावोक्तिरूपेण मृगराजस्य वर्णनात्मकमपरमिदं पद्यं छन्दोराजविराजितमिवेति नास्ति काप्यत्युक्तिः।

जिह्वाञ्चलेन जठरं चरणोदरं च
संलिह्य शश्वदवलीढविशालघोणः
उद्धूतपिङ्गलसटाजटिलांसदेशो
निद्रोत्थितो हरिरयं विवृतायतास्यः॥ (स्यामंतकम् III-12)

पद्येऽस्मिन् आरोहणावरोहणक्प्रमेण समासविन्यासः, सकृद्गौडपाञ्चालीरीतिः, सूक्ष्मतरप्राणिजीवनपरिशीलनदृष्टिः सर्वे आहत्य कामपि कान्तिमापादयंति।

प्राकृतेऽपि प्रकृतिसुन्दरप्रावीण्यं प्रदर्शयति कविरयमप्राकृत संस्कारसंस्कृतोऽपि। प्रायेण संप्रति वर्तमानेषु संस्कृतरूपकसम्प्रदाय मविच्छिन्नं रक्षति। तत्पश्यतामिदमेकं प्राकृतपद्यम् —

संफुल्लरम्मकमळअदळोअणो सो
णीलाळओ जळदमंसळणीळकाओ।
तेल्लोक्कणाहसुळणाहकिळीडकोडि
संजुड्ढदिव्वचळणो महुरो अकल्लो॥ (स्यामन्तकं I-3)

अस्य विमर्शनव्याख्या निरवश्यकेति मे मतिर्यतः सहजतया राजशेखरीयलीलया प्रवहितेयं कविता न कस्य मुदाय दायं ददात्यमृतं प्राकृतकाव्यमिति (अमिअं पाउअ कव्वम्) ?

सप्तदशाक्षरघटितेषु वृत्तेषु पृथ्वी हि कवेः प्रतिभापृथ्वीं राज्ञीव शासत्यस्मिन् रूपकचक्रे इति सुलभतया वयमनुमिमहे। उत्साहमोहिनी चटुलचमच्चयतुरगतिमुंफिता पृथ्वी लयसमर्थापि लयरहितवृत्तानां शिल्पमनल्पं वहति।

शिरीषसुमकोमलं स्थपुटमांसलं मञ्जुलं
नवोज्ज्वलकनद्रुचिप्रसृतकान्तलावण्यकम्।
शरीरमिदमद्य ते न हि दृशाऽनया
वीक्षितुं सकीकसमहं कथं कथय वत्स ! शक्नोम्यहम्॥
(दाशरथिदर्शनम् II-25)

अत्र श्रीराम–भरतयोर्मिलनमिव स्पष्टयतिस्थानसन्धानं च सकौतुकं द्वयोः परस्परसंदर्शनमपि ललितललितैः शब्दैः प्रतिपादितम्। मञ्जुललकारांत्यानि पदानि पादे प्रथमे च समस्तपदप्लाविते पादे द्वितीयेऽपि पद्यनिर्मितिशालीनता प्रतिभाति। वृत्तस्यास्य नादामोदं रणद्ध्वनिगुणप्रावीण्यं समनुभवितुं एते पद्ये अलमिति निश्चयः।

जटाजटिलमस्तकैर्भसितधूलिसन्धूलितैः
त्रिशूलदृढमुष्टिभिः कतिपयैर्गणैः संवृतः।

मृगेन्द्रकिटिमर्कटप्रभृतिवन्यनानामुखैः
प्रलोलकृशकीकसैर्बहुगणैश्च भूतैर्वृतः ॥
ध्वनत्पटहतलगप्रचुरकिङ्कणीसंवृत-
स्वपादपटुनर्तनैर्विविधवन्यचर्मावृतैः ।
कराहितसमुज्ज्वलत्पृथुलदीपकैः कुब्जकैः
वृतश्च नटनोत्कटैः कतिपयैर्गणैर्भीकरैः ॥

(वितीर्णामृतं II-7,8)

अत्र पद्यद्वयेऽपि तृतीयाविभक्तिप्रचुराणि पदानि किमपि वैयाकरणसौंदर्यं च ऐकार प्रचुरशीक्षामाधुर्यं च सिञ्चन्ति। नटराजस्य, भूतनाथस्य, भवस्य चाष्टमूर्तेः साक्षात्कृतिः केन वाऽन्येन प्रकारेण भवितुमर्हति ? गौडीरीतिश्च ताण्डवचण्डसुन्दरकर्म मर्मप्रकाशने शक्ता। प्रतिपादारम्भे स्फुटं संघटितजगणजागरणं प्लुतिमेव तनोति पठनावसरे।

अस्मिन्नेव सन्दर्भे कवेः कमनीयच्छन्दः कौशलनिरूपण साक्षित्वेन संस्कृतनाटकेषु वैरल्ये समापतितानि कानिचन वृत्तानि प्रकृतग्रन्थे प्रोक्तानि सोदाहरणं निर्दिश्यन्ते। मिश्रेति गतिमाश्रित्य त्रिमात्रा–चतुर्मात्रात्मिकाप्यक्षरगणघटिता मल्लिकामाला कामपि वासन्तमल्लिकामालेव सौरभं वितरति।

तद्यथा;

काहलध्वनिमर्दलाहतिपटहसन्ततिजर्झरी
डिण्डिमारवभेरिभाङ्कृतिपणवटाङ्कृतिमिश्रितः ।
स्फोटिताण्डकटाहजोत्कटडमरुकप्रतिनादभाक्
दिक्तटप्रतिरावगुम्भनघोरविसृमरनिस्स्वनः ॥

(वितीर्णामृतं II-6)

(पद्येऽस्मिन् अक्षरगणसंख्या यथालक्षणं नानुसृतापि लय–गतिकमनीयतां मिश्रगणनया परिपालिताऽनवद्या।)
पञ्चचामराख्यमिदमपरमपि वृत्तं सद्वृत्तमिव श्लाध्यम्।

कपर्दिने विमर्दिने सुघट्टितोग्रमर्दल-
प्रवृद्धचण्डताण्डवाय चण्डिकाकुटुम्बिने।
स्फुटानटद्विशङ्कटोदरेभतुण्डदन्तिने
करोटिकूटमालिने प्रचण्डतीक्ष्णशूलिने॥

(वितीर्णामृतं II-22)

अत्र विकटमूर्धन्याक्षरबन्ध एव निटिलाक्षवैचित्र्यं चित्रयति। तिश्रगत्यात्मकोऽयं लयः स्वभावद्रुतातिशयत्वात्ताण्डवचण्डतां सम्यक् ध्वनति। तथा च पद्यमिदं यच्छ्रीकृष्णकृतशिवस्तुतिरूपेण कुर्वता परमवैष्णवेनापि कविवरेणानेन परसमयसम्मानं स्थाने कृतं कृतकृत्यतायै।

एवमेव मात्राजात्यन्तर्गता चार्याप्रभेदात्मिका गीती च मुग्धकुन्तले स्निग्धकान्त्या प्रयुक्ता।

असकृन्नर्तितपाणिर्भाजनपुष्पं गुणेन संयोज्य।
अभिनवमधुरां मालां कथमिव बध्नासि वर्णशबलाङ्गीम्॥

(II-4)

आर्या विषमपादान्विता; किन्तु गीतिकेयं अर्धसमपादात्मिका। तस्मादत्र सामरस्याधिक्यं दृश्यते। सुलभश्लेषाश्लिष्टं पद्यमिदं गेयप्रबन्धरूपे गुणगरिमाणं गृह्णाति। यान्त्रिकतालाघातबद्धताप्यत्र यतिव्रतानुष्ठानेन निरस्ता।

संस्कृतसाहित्यस्य सर्वाङ्गसौन्दर्यं, पूजनीयगाम्भीर्यं, माधुर्यं च स्त्रैणदूरमपि साक्षात्कर्तुं शार्दूलविक्रीडितमेकमेवालम्। नाटकेषु राज्ञिकमिदं वृत्तं कविनानेन बहुषु स्थलेषु समर्थतया निर्मितं च वर्मीकृतं सारकवितायै। सर्वरसव्यञ्जकघनतायुतमिदं वृत्तं गहनतायाः पर्यायरूपमिव चकास्ति।

वेणीं कृष्णभुजङ्गभोगसदृशीं सेयं दधाना सुता
तारुण्यारुणगण्डपालिरलिकारालस्फुरत्कुन्तला।
आवद्धामलचीनवर्मविशदस्फीतोच्चवक्षोरुहा
पुंसो वेषधरा करात्तपटला चागुल्फचण्डातका॥

(कलिकालुष्यम् II-10)

इति समसामयिकवस्कुविडम्बनमारभ्य;

प्राणायामपरो निरन्तरजपप्रस्पन्दमानाधरो
दीर्घाक्षावलिसंप्रवर्तनकरो नाहं वरो ब्राह्मणः।
क्षीवक्षत्रियधर्षणैकनिकषः कीर्तिप्रसूनप्रसूः
स्वर्नारीपरिरम्भसौख्यजननी सेयं समिन्मे महः॥

(वीरसौभद्रम् I-11)

इति महाभारतमहावस्तुसन्तुलनक्षमवीररसात्मकं यत्पूर्वार्धे शान्तमुत्तरार्धे शृङ्गाराद्भुतवात्सल्याद्यंगितया वीरमपि संस्फुरितं निरूप्यमाणविस्तीर्णपर्यन्तं वा;

मन्दस्पन्दितगन्धवाहतरला नीलालकाद्यालिका
चिन्तानिस्तरलायितासितमनोहारीक्षणा निश्चला।
दन्तच्छेदकपोलपालिरमलग्रीवात्तमुक्तासरा
ज्योत्स्नाकल्पदुकूलमञ्जुलतनुर्मन्द्राग्यतस्तिष्ठति॥

(स्यामन्तकं VI-5)

इति मार्गसाहित्यसहजाभिजात शृंगार सीमान्तं वा निजबाहुचतुष्टयं प्रसरति शार्दूलविक्रीडितमिदं शार्दुलविक्रीडितमिव कवेरस्य चित्तगुहान्तरे, काव्यकान्तारे च। दीर्घाक्षरविन्यासः, तुलासन्तुलनतुल्यगुरुगौरवनिर्धारः, अक्लिष्टसमासग्रथनचातुरी, मितयतिनोदनमित्यादिगुणाः मकुटायमानाः विलसन्ति प्रौढवृत्तनिर्वहण वेलायाम्।

अन्यानि हरिणी–शिखरिणी–मालिनी–वंशस्थादीनि क्वचित्कतयाऽत्र रूपकचक्रे प्रयुक्तानि नाद्य विवेचितानि यतः दिङ्मात्रदर्शनोद्यमोऽयम्। कविवरस्यास्य रूपकाण्यपराणि विपुलानि च अद्भुतदूतमहाकाव्यं चान्यानि चम्पूस्तोत्ररूपाणि काव्यानि समस्तान्यपि समाकलटय कार्यमिदं वृत्तविनियोगमीमांसाध्ययनं खलु। यत्प्रौढपरिशोधनमहाप्रबन्धविषयोऽयं कथमिव टुण्टुकस्य लेखनस्यास्य ग्रासायेति मत्वा सविनयवन्दनशतपुरस्सरं विरमणमेव वरम्। अतः कविवृद्धं च साहितीसिद्धममुं सरलया कवितया स्तुत्वा समापनीयमिदमुपहारात्मकं वाक्प्ररोचनम्।

नानावृत्तकलायत्तचित्तो वकुलभूषणः।
तथापि सर्वदा याति सद्वृत्ते चैकमात्रके॥

वकुलभूषण भाषितसाहिती
विकलतारहिता च हिता सदा।
कवनपद्धतिपार्श्वगकल्पक-
प्रविलसत्फलवद्रुचिरा चिरा॥

शतावधानी.आर्. गणेशः

प्रशस्तिः

कालिदासकवितल्लजसूक्तेः
भावमौक्तिकसमुद्भवशुक्तेः ।
पूरणं वकुलसौरभसान्द्रं
कं न हर्षयति भो विबुधेन्द्रम् ।।

अभिज्ञानशाकुन्तलीयं स्ववाक्यैः
कथाशेषमत्यन्तहृद्यैः विवृण्वन् ।
कविर्नाटकान्तं कवित्वं किलेति
प्रसिद्धिं व्यधादात्मनीमां कृतार्थाम् ।।

इति एकशिलानगरस्थनल्लान् चक्रवर्ति रघुरनाथाचार्यः ।

ACKNOWLEDGEMENTS

The Author is greatful to the following scholars and friends for their respective unique contribution in the publication of this book 'Vakulabhūṣaṇrūpakavitānam.'

Dr. Shridhara Bhaskara Varnekar,
"Prajñābhārati", the eminent poet scholar of Nagpur for his kind foreword.

Sri P. T. Narasimhachar, the renowned Kannada poet and my great friend for his encouragement.

Vidwan Jaggu Sudarshanācharya, an eminent scholar and my younger brother for his invaluable help in correcting the proofs.

Shatāvadhāni R. Ganesh, my young friend and budding scholar for his revealing analysis of some of the verses contained in this volume.

Dr. B.S. Ramakrishna Rao, for preparing the press copies.

Sri Janardana Hegde of Aksharam, Bangalore, for suggesting certain improvisations in some of the verses.

Sri R. Nagaraja, Artist, for his suggestive and beautiful cover design.

Sri Jaggu Narayana, my younger brother for his nostalgic sketch of my good old days at Melukote.

The editors of THE HINDU, THE TIMES OF INDIA and UDAYAVANI, for their kind attention to a sanskrit scholar.

My family members, specially my sons and daughters-in-law for their affectionate co-operation.

Dr. S.R. Leela of N.M.K.R.V College, my young friend and guide in the matter of publication, for preparing the press copies, going through the proofs and supervising the printing work.

Vāgartha Printonics, Bangalore, for their neat and elegant job of Typesetting and Printing.

मुग्धकुन्तलम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

विष्णुचित्तः

नकुलिका

भटः

अर्चकः

शर्मा

गोदा

राधा

कृष्णः

मुग्धकुन्तलम्

॥ प्रथमोऽङ्कः ॥

कंसहिंसानिहिंसाय मधुरां मधुराननः ।
प्राप्य माल्यकृतो माल्यैरञ्चितः पातु नस्स्वभूः ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः – (साञ्जलिबन्धं)
एवमार्यमिश्रान् विज्ञापयामि –
नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये)

वटपत्रे शयं वन्दे कटुसंसारनाशकम् ।
तटिदाभश्रिया जुष्टं स्फुटपद्मायतेक्षणम् ॥ ३ ॥

सूत्रधारः – (आकर्ण्य) किन्नु खल्विदं मयि विज्ञापनैकताने शब्द इव । (नेपथ्याभिमुखमवलोक्य साञ्जलिबन्धं) अये, ज्ञानिमूर्धन्यो विष्णुचित्तः–
मृत्स्नोर्ध्वपुण्ड्रनिटिलस्तुलसीसरोज–
बीजाक्षमाल्यपरिकर्मितकन्धरोऽयम् ।
आजानुबद्धवसनश्च पुरश्शिखो
द्रागभ्येति पुष्पवनमुच्चखनित्रपाणिः ॥ ४ ॥

(इति निष्क्रान्तः)

॥ प्रस्तावना ॥

(ततः प्रविशति यथानिर्दिष्टो विष्णुचित्तः)

वि.चित्तः – (परितो विलोक्य सानन्दम्) हन्त–

तुलसीजलशीतलालवाले
विलसत्यायतपत्रपुञ्जमुग्धा।
भगवद्वनमालिकासकाशं
सहसा मोहयुतेव गन्तुकामा॥ ५॥

(सस्मितमस्तकान्दोलनं) दृगासेचनकदर्शनीयम्–

विश्वम्भरेयं तुलसीवनच्छला–
दाभाति चञ्चद्धरितांशुकाञ्चिता।
गन्धातिभव्या वटपत्रशायिने
सज्जा स्थिताकल्पयुतेव निश्चला॥ ६॥

(पुरतो दत्तदृष्टिः) आचरणीयमस्य चम्पकतरोः आलवालम्।
(इति खनित्रेण क्षितितलं खनन्नेपथ्याभिमुखमवलोक्य) किन्तु खल्विदं जरती वकुलिका तावदित एवागच्छतीव, दयनीयेयं–

दण्डावलम्बा धृतशुक्लचेला
पद्माक्षमालाञ्चितशुष्ककण्ठी।
निर्दन्तवक्त्रा पलिताल्पकेशी
स्खलद्गतिश्श्रान्ततनुर्नताङ्गी॥ ७॥

(ततः प्रविशति यथानिर्दिष्टा वकुलिका)

वकुलिका – (मन्दमुपसृत्य गमनश्रममभिनयन्ती) किन्तु खल्विदं भगवन्, वर्णी निरन्तरमपि श्रमजीवी संवृत्तोऽसि। तदितःपरं गृहमेधी भवितुमर्हति भवान्।

वि.चित्तः – (खननं विसृज्य सोच्छ्वासहासं) अम्ब, मत्सकाशादधिगतोपनिषदर्थाऽपि किमेवं ब्रवीषि ?

वकुलिका – आम, भगवत्कैङ्कर्यपरिवर्धनाय ब्रवीमि, सापत्येन आचार्येण भवितव्यमिति।

वि.चित्तः – (सस्मितं) मौग्ध्यमेतत्। शृणु तावत्–

बन्धुर्दाराः पुत्रमित्रादिकञ्च
श्रीमान्सर्वं वासुदेवो मदीयम्।
बन्धुत्वेनाभासमानैः किमन्यैः
संसारोर्मिक्लेशसंवर्धकैस्तैः॥ ८॥

तदलमनेन गृहमेधित्वेन। शृणु तावदिदमपि पुष्पोपवनमिदमेव ममापत्यं खलु, निर्वर्तयाम्यनेनैव भगवत्कैङ्कर्यं; पुष्पमालाप्रियो हि भगवान्। (सस्मितं) मम तावद्बहून्यपत्यानि, इतः पश्य–

केरलीतरुणिगण्डपाटलां
कोमलच्छदविकस्वरां तताम्।
कण्टकिस्थलसरोजिनीशिखा–
बन्धुरां सुमततिं विलोकय॥ ९॥

इतस्तावद्दत्तदृष्टिर्भव–

ततवितानितवल्लिपरम्परा
प्रचुरजातिसुमावलिकोरकम्।
उपवनं हसतीव रदावलिं
प्रकटयद्धवलामवलोकय॥ १०॥

इतः पश्य—

चम्पककोरकपङ्क्तिरनल्पा
शाखिषु भाति रमापतयेऽत्र।
गोपुरसन्निभभाजनक्लृप्त—
प्रोज्ज्वलदीपशिखावलिकल्पा॥ ११॥

अवलोकय तावदिह—

पारिजाततरुशाखिकाग्रत—
श्शोणवृन्तकुसुमानि वायुना।
चालिता विनिपतन्ति भूतले
माधवार्चनविडम्बकान्यहो॥ १२॥

इतस्तावत्—

मरुवकान्तरवर्धितमल्लिका—
व्रततिजालसुमावलिमञ्जुलम्।
मरकतान्तरबद्धसुमौक्तिकं
स्थलमिवेदमहो प्रतिभासते॥ १३॥

एवमेव सन्ति बहूनि। एतदखिलावलोकनेन एतत्परिवर्धनेन चानन्दमनुभवन्कालमतिवाहयामि। अन्यदपि महदानन्दकरम्—

कुसुमापचयं कुर्वन् बध्नन् मालां च मञ्जुलाम्।
अर्पयन्वासुदेवाय सन्तुष्टः किमतः परम्॥ १४॥

वकुलिका – अहो, आचार्यस्य धन्यतमता, विषयेषु निस्स्पृहता च।

(नेपथ्ये शिशुरोदनध्वनिः)

वि.चित्तः -- (सविस्मयं नेपथ्याभिमुखमवलोक्य) हन्त, किन्नु खलु मदुपवने शिशुरोदनध्वनिः ? (निर्वर्ण्य) महदिदमाश्चर्य–

निबिडदलविताने प्रोन्नतायास्तुलस्याः
मृदुलतरमृदाढ्ये मूलदेशे शयानः।
अरुणकिसलयकल्पे रोदनारक्तवक्त्रः
शिशुरयममितौजाश्चालिताङ्घ्रिर्विभाति॥ १५॥

(इत्युपसृत्य) किन्नु खलु? अम्ब वकुलिके, क्षिप्रमायाहि।

वकुलिका -- (मन्दमुपसृत्य विलोक्य च सविस्मयं) अहो, महदिदमाश्चर्यं–

विकचकमलनेत्रः कुन्तलैः कान्तशीर्षः
मृदुलचलितपाणी रक्तबिम्बाधरोष्ठः।
पृथुलवलितरङ्गव्याप्तसक्त्थिस्समुद्य--
द्विधुरुचिरुचिरोऽयं स्त्रीशिशुः कोमलाङ्गः॥ १६॥

अचिरप्रसूत इव! कयापि वृषस्यन्त्या सुरसुन्दर्या कृतमेतद्भवेत्; मेनकयाप्येवमेव कृतं हि।

वि.चित्तः – वकुलिके, नैवं स्यात्। दृश्यते खलु भूविवरं, तद्भूम्युदरात्सीतोवोद्भूतस्स्यात्।

वकुलिका – (सस्मितं) तर्हि आचार्यो जनकचक्रवर्ती, तदादाय शिशुमेनं पोषयितुमर्हत्याचार्यः।

वि.चित्तः – (कराभ्यां शिशुमादाय) वकुलिके, अपि नामेयमपि समुद्वहेद्भगवन्तं जानकीव रामचन्द्रम्।

वकुलिका – (सहासं) तर्हि आचार्येणापि जनकेनेव शुल्कत्वेन स्थापनीयं शिवशरासनम्।

वि.चित्तः – मास्तु शुल्कवार्ता, स्वयमेवासाद्य भगवानुद्वहत्येनाम्।

वकुलिका – तदपि भवेदेव, यद्भवत्करलालिता भवदन्नपुष्टा भवदनुग्रहपात्रं च।

वि.चित्तः – यथा भगवतस्सङ्कल्पः।

वकुलिका – (शिशुं निर्वर्ण्य) मुग्धकुन्तलोऽयं शिशुः।

वि.चित्तः – अत एव गोदेति नाम कर्तुमभिलषामि।

वकुलिका – रमणीयमिदं नाम।

वि.चित्तः – (शिशुं शिरस्याघ्राय) वकुलिके, इयं तावत्–

गोदा साधारणी नारी भवितुं नार्हति ध्रुवम्।
लक्षणानि तथा सन्ति विष्णुयोग्या सुमोपमा॥ १७॥

वकुलिका – तत्सत्यमेव। अस्या अयोनिजत्वमेव तत्सूचयति।

वि.चित्तः – (सचिन्तस्तिष्ठति)

वकुलिका – किन्नु खल्विदं चिन्तयतीवाचार्यः ?

वि.चित्तः – न किमप्यन्यत्–

पर्णमन्दिरमहो मम कुब्जं
भुग्नशीर्णपटलेन निगूढम्।
वर्षवातरविघृष्टिनिवासं
वासयामि पृथुकं कथमत्र॥ १८॥

इति चिन्तितम्।

वकुलिका – (सस्मितं) अहो, वात्सल्यरज्जुबद्धोऽस्मदाचार्यः। भगवन्, क्व गतोऽद्य वटपत्रशायी ?

वि.चित्तः – तत्सत्यमेव। अस्य शिशोस्स्पर्शमात्रेण महान्प्रेमबन्धो बाधते माम्। हन्त! ममैवैवं यदि किं ब्रवीमि गृहमेधिनां स्थितिं–

प्रसूतापत्या सा सततमपि तत्पोषणरता
सुखं स्वीयं त्यक्त्वा प्रतिनिशमहो जागृतिकृशा।
बहिःप्राणं मत्वा तदतिनियमेनौषधिधृता
जगत्सर्वं खल्वेतदिति हृदये नन्दति भृशम्॥ १९॥

(ततः प्रविशति भटः)

भटः – (साञ्जलिबन्धं)भगवन्,पाण्ड्यभूपालोभवदागमनमनुपालयति।

वकुलिका – (सावेगं) हन्त, शिशुरयं कस्यापि राज्ञो भवेत्, अत एव समाह्वयतीति मन्ये।

वि.चित्तः – (भटमवलोक्य) किमर्थम्?

भटः – न जाने। शिबिका प्रेषिता द्वारि सज्जा वर्तते। तदागच्छतु भगवान्।

वि.चित्तः – मास्तु शिबिका, गच्छतु भवान्, अहमागमिष्यामि।

भटः – (सविनयं) यथादिशति भगवान्। (निष्क्रान्तः)

वकुलिका – हन्त, किं पदा गच्छत्यार्यः?

वि.चित्तः – अथ किम्?

वकुलिका – आचार्य, भीतास्मि, किं वा कुर्याद्राजेति।

वि.चित्तः – (सौदास्यं) अस्ति खलु वटपत्रशायी। आयाहि वकुलिके, उटजमेव गच्छामः।

(इति शिशुहस्तो वकुलिकया सह निष्क्रान्तः)

॥ इति प्रथमोऽङ्कः॥

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति दीर्घकुञ्चिकागुच्छपाणिरर्चकः)

अर्चकः -- (ऊर्ध्वमवलोक्य) हन्त-

क्रमविगलितरागो व्याप्तमान्ध्यं निरस्यन्
प्रसृमरकिरणौघैस्तापयन् लोकमेनम्।
मुररिपुरचिताज्ञापालनायेव भास्वान्
उदयशिखरिशृङ्गान्मन्दमायाति नाकम्॥ १॥

तदविलम्बितं गन्तव्यं भगवन्मन्दिरम्। (परिक्रम्य नेपथ्याभिमुखमवलोक्य) अये, शतकन्यादानशर्मा तावदित एव आगच्छतीव। अयं तु बदरीक्षेत्रयात्रार्थं गतः कदा वा प्रतिनिवृत्तः! (सस्मितं) हन्त अनपत्योऽयं शतकन्यादाननामधेयः।

(ततः प्रविशति शतकन्यादानशर्मा)

शर्मा - किन्नु खलु, प्रस्थित इव भगवन्मन्दिरम्।

अर्चकः - अथ किम्? गन्तव्यं खलु, स्यादेतत्। कदा समागतो बदरीक्षेत्रयात्रायाः?

शर्मा - पूर्वेद्युः।

अर्चकः - अपि नाम सुगमा सरणिः?

शर्मा - श्रमसाध्यं गमनम्।

अर्चकः - कथं वर्तते हिमवान्?

शर्मा - किं ब्रवीमि-

क्वचिद्रजतसन्निभः क्वचिदनल्पहेमप्रभः
क्वचिद्रुचिरकाननः क्वचिदुदारनीरस्रुतिः।
क्वचित्तुहिनपूरितः क्वचिदगाधगर्ताकुलः
विभाति हृदयङ्गमो हिमगिरिर्विशालाकृतिः॥ २॥

अर्चकः – ममापि दिदृक्षा, जिगमिषा च।

शर्मा – अवश्यं गन्तव्यम्।

अर्चकः – दिष्ट्या तावदेव श्रमकरीं यात्रां निर्वर्त्य बहोः कालात्प्रतिनिवृत्तोऽसि।

शर्मा – अत एव पृच्छामि, विष्णुचित्तविषये किंवदन्तीम्।

अर्चकः – किं तत्?

शर्मा – पाण्ड्यभूपालसभां गतः तत्र वादेन तत्त्वनिर्णयं कृत्वा नरपतिनिहितं शुल्कमङ्गीकृतवानिति।

अर्चकः – (सस्मितं) किमिदानीं पृच्छसि, पञ्चषवत्सरेभ्यः प्रागेव संवृत्तमिदम्।

शर्मा – गुरुमुखमनधीत्यैव प्राह वेदानशेषानिति महदिदम् आश्चर्यम्।

अर्चकः – अन्यदप्याश्चर्यकरं संवृत्तम्।

शर्मा – किं तत्?

अर्चकः – तस्य तुलसीकानने भूम्युदरादुद्गतः कोऽपि स्त्रीशिशुः।

शर्मा – महदिदमाश्चर्यम्! अपि नाम स एव पोषयति ताम्?

अर्चकः – अथकिम्। विष्णुचित्तस्तु तस्याः गोदेति नाम कृतवान्। सापि सौन्दर्यखनिः भगवद्भक्ता च।

शर्मा – अन्यदपि श्रूयते। सन्तुष्टेन राज्ञा तावत्तपनीयमयी भगवद्वासुदेवप्रतिमापि समर्पितेति।

अर्चकः – आम, तया प्रतिमया क्रीडति गोदा। हन्त, महान्कालः संवृत्तः गच्छामि तावन्भगवन्मन्दिरम्। (निष्क्रान्तः)

शर्मा – हन्त, को वा वेत्ति पुरुषभागधेयं–

अधीतवान्नैव गुरोस्सकाशा-
द्विद्याः खनित्रैककरस्सदापि।
क्षेत्रे स्थितो राजसभाजितश्च
विचित्रमेतद्भगवत्कृपैव॥ ३॥

(निष्क्रान्तः)

॥ शुद्धविष्कम्भकः ॥

(ततः प्रविशति कुसुममालां बध्नन्निजोटजगतो विष्णुचित्तः, कनकवासुदेवप्रतिमापुरतो निषण्णा षड्वत्सरदेश्या गोदा च)

वि.चित्तः – वत्से, उत्तिष्ठ भोजनाय।

गोदा – मास्त्विदानीं भोजनम्। तात कथं बध्नासि मालाम्? मम तावन्नैवं भवति-

असकृन्नर्तितपाणिः
भाजनपुष्पं गुणेन संयोज्य।
अभिनवमधुरां मालां
कथमिव बध्नासि वर्णशबलाङ्गीम्॥ ४॥

वि.चित्तः – अभ्यासेन साध्या वत्से।

गोदा – (सानुनयं) तात, अहमपि बध्नामि मम भगवदर्थम्।

वि.चित्तः – (सहासं) तव भगवानन्यः, मम भगवानन्यः किमु?

गोदा – आम, वटपत्रशायी तव भगवान्, अयं तावद्वासुदेवो मम भगवान्। (इति प्रतिमामालिङ्गति)

वि.चित्तः – मैवं वत्से, सर्वत्र एक एव भगवान्, नानारूपेण प्रकाशते।

गोदा – किमर्थमेवम् ?

वि.चित्तः – अस्मदर्थम्।

गोदा – तर्हि मदर्थमेवं प्रकाशते। (इति प्रतिमामादाय चुम्बति)

वि.चित्तः – (समन्दस्मितं) धृष्टासि। गच्छ भोजनाय। पश्य, मध्याह्नवेलापि सन्निहिता–

तपति रविरयं मयूखजालैः
क्षितितलमुज्ज्वलमण्डलो नभोऽग्रे।
अपगतजनचार एष पन्थाः
प्रसरति नैव खगो न नादलेशः॥ ५॥

अम्ब वकुलिके, किमपि खाद्यं देहि वत्सायै। अहं तावदर्पयित्वा वटपत्रशायिने मालामिमां प्रत्यागच्छामि। (इति मालामादाय निष्क्रान्तः)।

वकुलिका – उत्तिष्ठ वत्से! परिवेषयामि।

गोदा – नाहमश्नामि, मम भगवान्वासुदेवः क्षुधितस्तिष्ठति प्रातरारभ्य। तस्मै न किमपि निवेदितम्।

वकुलिका – तर्हि तस्मै निवेद्य दुग्धमिदं पिब तावत्। (दुग्धचषकं दत्त्वा) वत्से, गृहपृष्ठे तावत्कदलीपलाशं विलूय नेष्यामि। (निष्क्रान्ता)

गोदा – (दुग्धपात्रं कराभ्यां प्रतिमापुरतो गृहीत्वा) कृष्ण, वासुदेव, यशोदानन्दन, दुग्धमिदं पिब, पिब कृष्ण, कुतस्तावत्तूष्णीं तिष्ठसि? किमु मयि क्रोधः! प्रातरारभ्य न किमपि दत्तमिति? इतः परं नैवं कुर्यां, गृहाण चषकं, पिब दुग्धमिदम्। (सबाष्पं)

त्वय्यपीतदुग्धे नाहं पिबामि। कृपया पिब कृष्ण, कथाप्रसङ्गे मत्तातेनाभिहितं कृष्णस्य दुग्धे तावत् महानभिलाषः, चौर्येणाऽपि गोकुले पिबति स्मेति। तदलं कोपेन, गृहाण।

(ततः प्रविशति वकुलिका)

वकुलिका – (कुड्यान्तर्हिता विलोक्य स्वगतं) किन्नु खल्विदम्! विष्णुचित्तोऽपि नैवम्। बालापीयम् अतिशेते भक्त्या अस्मदाचार्यम्।

गोदा – (सबाष्पगद्गददैन्यं)–

नाहं पिबामि यदुनाथ दयापयोधे!
त्वामन्तरा ननु भवांच्छ्रितवत्सलो हि।
यद्यप्यहं त्वमितदोषमयी तथापि
स्वीयेयमित्यनुगृहाण पुनीहि नाथ॥ ६॥

(इतिबाहुभ्यांप्रतिमाजङ्घायुगलमालिङ्ग्यप्रतिमाचरण-योर्मस्तकं निधाय प्रणमति)

वि.चित्तः – (प्रविश्य सचिन्तं मन्दं परिक्रम्य) हन्त, बालापि वत्सा ज्ञानिमूर्धन्या। अत्याश्चर्यकरमिदं जायमानैव भगवतः कटाक्षपात्रमिति ज्ञायते–

तद्ध्यानैकपरायणा स्थिरमतिस्तन्नामजीवातुका
तत्संश्लेषणकांक्षिणी तदनुगश्रीसूक्तिबद्धादरा।
तन्मूर्तिस्नपनानुलेपनपरिष्कारादिसक्ता सदा
हे दामोदर भक्तवत्सल कृपाकारेति कूजत्यहो॥७॥

(मन्दमुपसृत्य) वत्से, किन्नु खल्विदम्! उत्तिष्ठ।

वकुलिका – (उपसृत्य) आचार्यवर्य, किं ब्रवीमि, कथं कथयेयमस्या भक्तिपारवश्यं–

भगवद्वैभवमग्ना परवशहृदया निरन्तरप्रीत्या।
कृत्याकृत्यविवेकस्रस्ता मनुते पतिं शिशुः प्रतिमाम्॥

दत्तं दुग्धमपि नैव पीतं, कृष्णप्रार्थनैकताना तावदेवं वर्तते।

वि.चित्तः – (गोदां पाणिभ्यामुत्थाप्य) वत्से, दुग्धमपि वा पिब तावत्।

गोदा – (चेलाञ्चलेन बाष्पमुन्मार्जयन्ती सगद्गदं) तात, वासुदेवेन नैव पीतं खलु, कथमहं पिबामि?

वि.चित्तः – वत्से, कथं पिबति प्रतिमा? भवत्या पीते च दुग्धे सन्तुष्यति स भगवान्।

गोदा – किमेवमभिधीयते? क्षुधितस्तिष्ठति भगवान्। पश्य तात, क्षुधितस्तिष्ठति मम वासुदेवः, किं न पश्यसि तात–

ग्लानिं मुखे भगवतोऽस्य निरीक्ष्य तात
क्षीरं पिबेयमहमद्य कथं प्रसह्य।
दामोदरस्य मृदुलोदरभुग्नरेखाः
पश्य क्षुधा परिलसन्ति निमग्नकुक्षेः॥ ९॥

वि.चित्तः – मुग्धे, नित्यतृप्तः खलु स भगवान्, किमनेन? भक्ततुष्टिरेव तत्तुष्टिः। भगवांस्तु दृष्ट्वा तृप्यति, शृणु तावत्–

क्षुत्पिपासादिकं तस्य पूर्णकामस्य चक्रिणः।
नैव किन्तु स्वभक्तानां जिह्वास्वश्नाति तत्कृते॥ १०॥

सर्वान्तर्यामी खलु भगवान्, तदायाहि भोजनाय।
(निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः॥

॥ तृतीयोऽङ्कः॥

(ततः प्रविशति पुष्पोपवने कुसुमान्यपचिन्वन् विष्णुचित्तः)

वि.चित्तः – किमिति ब्रवीमि मद्भाग्यविशेषम्–

उद्यानक्षितिसम्भवा व्रततिवद्वाक्पुष्पसौरभ्यतः
श्रीनन्दात्मजमानसं हृतवती तल्लाभकांक्षाकुला।
मालेवाम्बुजलोचनोरसि सदा वासाभिलाषोन्मुखी
नानालङ्कृतिमञ्जुला भगवतो गोदा गुणैस्संयुता॥१॥

जगत्येतादृशापत्यलाभाय खलु वाञ्छन्ति गृहमेधिनः।
(प्रविश्य)

वकुलिका – अपि नाम सर्वाण्यपि कुसुमान्यपचितानि?

वि.चित्तः – एकं नारिकेलसम्पुटकमापूरितं कुसुमैः, अपचेतव्यं किञ्चिदवशिष्टं वर्तते। किं करोत्युटजे गोदा?

वकुलिका – किमन्यत्, स्नात्वा प्रतिमापुरतः तिष्ठति। आचार्य–

मुग्धा जाता तव तु दुहिता दर्शनीयाङ्गयष्टिः
रूपेणाद्य प्रथितमदनप्रेयसीं धिक्करोति।
आचार्यस्तद्वरविचयने बद्धदीक्षो भवेद्धि
प्रायो लोके दुहितृपितृता क्लेशदात्री हि पित्रे॥२॥

वि.चित्तः – सत्यमभिहितं भवत्या। सा पुनः वासुदेवमन्तरा अन्यं पुरुषाङ्कुरमपि चक्षुःप्रान्तेनापि नेक्षे इति प्रतिज्ञातवती। किं करोमि ?

वकुलिका – (सस्मितं) सा तून्मत्तेति किमाचार्योऽप्युन्मत्तः संवृत्तः ? कथमिव चर्मचक्षुषा द्रष्टुमशक्यो भगवानुद्रोढुं शक्यते ? स तु भगवान्केवलशब्दप्रमाणमात्रसमधिगम्यो हि।

वि.चित्तः – अम्ब, वक्तुमेवं न शक्यते। तद्भक्तिपराकाष्ठामनु-सन्धाय प्रत्यक्षतामधिगच्छेदपि। स भगवान् दयालुः खलु। पाण्ड्यभूपालगजाधिरूढस्य मम तावत् प्रत्यक्षीभूतो हि परमकारुणिकस्स भगवान्। तदैव तद्दिव्यमङ्गलविग्रहदर्शनपरवशीकृतमानसेन मया तावन् मङ्गलाशासनगाधास्तत्रैव गीताः।

वकुलिका – को वा जानाति तस्य महिमातिशयम् ? भवेदप्येवम्।

वि.चित्तः – वकुलिके, अहं तावदुटजं यास्यामि। मन्दमायातु भवती। (इति नारिकेलसंपुटकद्वयमादाय परिक्रम्योटज द्वारमुपसृत्य) कथमात्मानमलङ्करोतीवेयम् ? तदत्रैवान्तर्हितः पश्यामि। (इति तथा कृत्वा) दृगासेचनकरूपेयं–

सीमन्तपार्श्वविनिबद्धमनोज्ञनील–
धम्मिल्लमूलपरिवेष्टितपुष्पमाला।
कुंच्या कृताञ्जनमनोहरदीर्घनेत्र–
प्रान्ता विलोकयति दर्पणमेत्य वक्त्रम्॥ ३॥

स्पृहणीयदर्शनं मुखमण्डलं वत्सायाः–

नासामूलतलार्पिताल्पशशभृत्तुल्याच्छमृत्स्नाकला–
कान्तावालतलप्ररोपितलसत्सिन्दूररेखालिकम्।
उद्यच्चन्द्रकनत्कपोलनिहितस्फीतेतरस्थासकं
नासाग्रप्रचलत्सुमौक्तिकफलप्रच्छायबिम्बाधरम्॥ ४॥

अलङ्कारप्रिया खल्वियं–

चूर्णकुन्तलपरम्परा सिता
स्वर्णपट्टसदृशेऽलिके तते
पंकजभ्रमसमागता चलत्–
षट्पदावलिरिवावभासते॥ ५॥

हन्त, पांड्यभूपालप्रवितीर्णानि सर्वाण्यप्याभरणानि धृतवती गोदा।

गोदा – (प्रतिमापुरतः स्थित्वा साञ्जलिबन्धं) भगवन् वासुदेव, कृष्ण, अपि नाम ते तावदहमिदानीं भोग्या? यदि भोग्या, अङ्गीकुरु, पश्य माम्। पुण्डरीकनयनः खलु भवान्। (सबाष्पगद्गदं) नाथ, किमर्थं मौनमवलम्बसे? न खलु ते तावदस्मिन्वस्तुनि आशयः–

दीनास्म्यहं श्रितजनार्तिहर! प्रसीद
तां द्रौपदीं प्ररुदतीमबलामनाथाम्।
गोविन्द! रक्षितवतस्तवपादमूलम्
आश्रित्य पाहि कृपयेति भवन्तमद्य॥ ६॥

यांचे, तदेहि, तव किङ्करतां प्रदेहि
    तां रुक्मिणीं सपदि तद्गतमानसस्त्वम्।
आहर्तुमागत इवैहि ममोपकण्ठ-
    मत्रास्ति नैव तव तु प्रतिकूलसेना॥ ७॥

उद्वोढुं जानकीं नाथ यादृशस्ते परिश्रमः।
नात्र तादृग्विधः कोऽपि तदङ्गीकुरु मामपि॥ ८॥

(सवैलक्ष्यं) किन्नु खलु, वटपत्रशायीव। (सगद्गदाञ्जलिबन्धं) भगवन्, किन्नु खल्विदम्? अनुगृहीतास्मि, धन्यास्मि। हन्त ते माया! किमभिहितम्? मच्छिरोमाल्यमपेक्षितम्? इदमहं प्रेषयिष्यामि। (इति निजधम्मिल्लमालामादाय भगवदर्थं विनिहिते मालाभाजने निक्षिपति।)

वि.चित्तः – (अवलोक्य) किन्नु खल्विदम्? (सहसोपसृत्य, पुष्पभाजनमवलोकयन् सानुतापं स्वगतं) भगवदर्थं विनिहितं सर्वमपि माल्यं दूषितं खलु। (प्रकाशं) किमद्य कर्तव्यम्? (सदैन्यबाष्पानुतापं)

भगवंस्तव नास्ति माल्यमेकं
    दुहिता दूषितवत्यशेषमेतत्।
अपराधममुं क्षमस्व बन्धो!
    कृपया मे दुहितुः प्रमादवृत्तम्॥ ९॥

हन्त, किं करोमि, कथं वर्ते, कथं वानेन चक्षुर्हतकेन द्रक्ष्यामि मालाविरहितं भगवन्तम्? अनया तावत्किं व्यवसितम्? न कदाप्येवं कृतमनया। न कदापि चिन्तितं च मयाप्येवमनया क्रियत इति। कथमद्य यास्यामि भगवन्मन्दिरं रिक्तहस्तः?

गोदा – (सभयकम्पं) तात, किं मया कृतम्?

वि.चित्तः – (सबाष्पानुतापं) न किमप्यम्ब, सर्वमपीदं निर्माल्यं संवृत्तमिति।

गोदा – (सबाष्पगद्गदाञ्जलिबन्धं) न मयाऽपराद्धं तात। मच्छिरोमाल्यमपेक्षितवान्वटपत्रशायी।

वि.चित्तः – किमभिहितं, भवन्निर्माल्यमपेक्षितं भगवता। (स्वगतं) कथं प्रत्येमि? इयं तावद्बाल्यमारभ्य ज्ञानिमूर्धन्या। अपि नाम स्यादेवमपि?

(नेपथ्ये)

सत्यमभिहितं गोदया, मया तावत्तन्निर्माल्यमेवापेक्षितं–

तदुपभुक्तमनल्पसुगन्धव–
न्मम तु भोग्यतमं वनमाल्यवत्।
अत इतःपरमानय तादृशीं
ननु बिभर्मि सुमस्रजमादरात्॥ १०॥

वि.चित्तः – (आकर्ण्य) हन्त, किन्नु खल्विदम्? हा हतोऽस्मि, भगवन्, भवदभिमतविरुद्धोऽभवम्। हन्त, पापीयान् अहम्। (सबाष्पं)

अपराधपात्रमासं
भगवद्भागवतेषु हन्त धिङ्माम्।
कथमिव परिहारोऽस्य
श्रीमन्नावेदयात्मपरिशुद्धिम्॥ ११॥

(साञ्जलिबन्धं) अम्ब गोदे, क्षमस्व माम्। कृपया क्षमस्व मामपराधिनम्। मुधा तावदन्यथा चिन्तितं त्वयि। महानपराधोऽयम्। अम्ब कल्याणि–

भगवति कृतमपराधं
  क्षमते कृपया स तु श्रीमान्।
भागवते विहितस्य
  प्रायो नास्त्येव हन्त परिहारः॥ १२॥

गोदा – (सबाष्पगद्गदं) हन्त तात, किमेवमभिधीयते? किमपराद्धं भवता?

वि.चित्तः – (उच्चै रुदन्) ज्ञानभक्तिजननि, मम मातः, किमपराद्धमिति? अम्ब, किमपराद्धमिति किं ब्रवीमि? महापराधी खलु पापीयानहम्। हुं, किं बहुना, हृदयपरिपाकमन्तरा निरन्तरकृतेनापि भगवत्कैङ्कर्येण किं प्रयोजनम्? हन्त! धिङ्माम्। भवद्धृदयपरिपाको नास्ति खलु मयि, मुधा वयसा वृद्धोऽहम्। भवती तावत्, ज्ञानेन वृद्धा। तत्क्षमस्व मदीयमपराधम्। (इति दण्डवत्प्रणमति, गोदा सावेगमपसरति)

वकुलिका – (प्रविश्य, उपसृत्य) किन्नु खल्विदम्? वत्से, कुतो बाष्पः? (इति गोदायाः कुन्तलं परामृशन्ती) किमु तातेन किमप्यभिहितम्?

गोदा – (कर्णौ पिधाय) शान्तं पापं, शान्तं पापं, न कदाप्यभिधास्यति मामयं तातः। अम्ब, मा पृच्छ तावदेवम्। (इत्यवनतमुखी तिष्ठति)

वकुलिका – किन्नु खल्वेतत्, उत्तिष्ठत्वाचार्यः, किं संवृत्तम्?

वि.चित्तः – (उत्थाय) अम्ब, वकुलिके, पापीयानहम्। भागवतमूर्धन्यायां गोदायामन्यथा चिन्तितम्। एतस्य निदानं तावन्मम ज्ञानित्वाभिमान एव। महान् अपराधोऽयम्।

वकुलिका – किं तत्?

वि.चित्तः – भगवदभिमतमेतच्छिरोमाल्यं निर्माल्यमिति निन्दितम्।

वकुलिका – (चिबुकेपाणिमाधाय) हन्त भोः, गोदायाश्शिरोमाल्यमपेक्षितं किमु वटपत्रशायिना? अनिर्वचनीयमाश्चर्यम् इदम्। किं ब्रवीमि महिमातिशयमस्याः? सत्यं, सर्वभक्तवर्गापेक्षया प्रतीक्ष्येयम्। (सबाष्पगद्गदं) अम्ब गोदे, धन्यास्मि भवद्दर्शनेन। (इति मन्दमञ्जलिं बध्नाति)

गोदा – एवं न ब्रूयात्। वटपत्रशायी तावदेक एव सर्वजगत्प्रतीक्ष्यः।

वि.चित्तः – अम्ब गोदे, सानन्दं समर्पयामि भगवते वटपत्रशायिने पुष्पमाल्यमखिलमपि–

कृतापराधोऽप्यहमद्य गोदे
भवत्सुसम्बन्धविशेषधन्यः।
त्वद्भुक्तमाल्यानि समर्प्य तस्मै
द्रक्ष्यामि सानन्दमुखं मुकुन्दम्॥ १३॥

(इति पुष्पभाजनमादाय निष्क्रान्तः)

वकुलिका – अम्ब, नहि ते क्षुत्, स्थितासि सर्वदा प्रतिमापुरतः।

गोदा – **तन्नामामृतपानेन सौहित्यं सर्वदा मम।**
किमन्याभ्यवहारैस्तद्बुभुक्षैव न जायते॥ १४॥

वकुलिका – तत्सत्यमेव। तथापि प्रकृत्यनुगुणं कर्तव्यं खलु, तदेहि भोजनाय।

गोदा – अपि नाम निवेदितं भगवते?

वकुलिका – किन्नु खलु, अनिवेद्य भगवते परिवेषयामि किम्? तदेहि।

गोदा – तातोऽप्यायातु नाम।

वकुलिका – स त्वाचार्यः –

भगवद्दर्शनमग्नो
नहि जानात्यतिगतं कालम्।
आनन्दबाष्पदिग्धः
तिष्ठति रचिताञ्जलिर्मुग्धः॥ १५॥

गोदा – आम्। कस्य वा न भवेदेवम्?
(इति वकुलिकया सह निष्क्रान्ता)

॥ इति तृतीयोऽङ्कः॥

॥ चतुर्थोऽङ्कः॥

(ततः प्रविशति पुष्पोपवनस्था निजसख्या राधया सह गोदा)

गोदा – हला, पश्येमां तुलसीम्–

अस्मत्तातकराभिवर्धितवती सेयं तुलस्यादरा–
त्सौरभ्यप्रकटीकृतात्मपरमानन्दा सदन्नाशनात्।
एवं वृद्धिमवाप्य साधु भगवत्कैङ्कर्यधौरेयता–
माप्नोतीति जनाय शंसनपरेवाभाति सान्द्रच्छदा॥१॥

राधा – इयं तुलसी तावदुन्नमितमस्तका भवतीमादरात्पश्यतीव। स्यादेतत्, किमर्थं भवती साक्षात्पुष्पोपवनमुपगता?

गोदा – अद्य तावत्स्वहस्तेनैव पुष्पाण्यपचित्य भगवते समर्पणीयानीति।

राधा – अद्य को विशेषः ?

(गोदा लज्जां नाटयति)

राधा – मह्यं निवेदयितुमपि जिह्रेषीव। किन्नु खल्विदम् ?

गोदा – न खलु हसति भवती ?

राधा – सन्तुष्यामि।

गोदा – मम तावत्परिणयः।

राधा – वरः कः ?

गोदा – वनमाली।

राधा – कथं वनमाली ? मुग्धे, स तु वञ्चकः किं भवतीं परिणेष्यति ?

गोदा – एवं जानामि।

राधा – कथं प्रत्ययः ?

गोदा – स्वप्नवृत्तान्तेन प्रत्येमि।

राधा – हन्त, कीदृशस्स्वप्नः ?

गोदा – हला, किं ब्रवीमि ? चिन्तितमपि कण्टकितमातनोति गात्रम्।

राधा – शृणुमस्तावत्कथं स्वप्न इति ?

गोदा – शृणोतु भवती–

नानासुगन्धिकुसुमावलिमाल्यपाणि–
रुद्वाहयोग्यरचितातिमनोज्ञवेषः।
आनन्दफुल्लनलिनायतलोचनोऽयं
श्रीमानदृश्यत मया स्वपने मुकुन्दः॥ २॥

राधा – महदिदमाश्चर्यम्। ततस्ततः ?

गोदा – लाजाहुतौ हुतभुगुद्गतधूमलेखा–
कल्माषिते मम दृशौ परिवीक्ष्य कृष्णः।
तन्मार्जनाय मुकुरं स्वकरेण धृत्वा
सन्दर्श्य चेलकमदात्स्वपने तु मह्यम्॥ ३॥

राधा – तेन परिणयो भविष्यति। सत्यम्। ततः ?

गोदा – लाक्षारुणांघ्रिमथ सप्तपदीशिलायां
विन्यासितं करगृहीतमनन्तनाम्ना।
लज्जाभरानतमुखी पुलकाञ्चिताङ्गी
स्वप्नेऽन्वलोकयमहं सखि चित्रमेतत्॥ ४॥

राधा – हला गोदे, धन्यासि। ततस्ततः ?

गोदा – शुक्लांशुकाहितवितानविशालचञ्च–
न्मुक्ताकलापजुषि चित्रितकायमाने।
आतोद्यनादमुखरीक्रियमाणकाष्ठे
डोलामकल्पयदहो स्वपने द्वयोश्च ॥ ५॥

राधा – आरम्भे कथं स्वप्नः ?

गोदा – तीर्थोदकैर्द्विजवरार्पितकुम्भनीतैः
नानापटीरघनसारवरातिभोग्यैः।
संस्नापितालिभिरहं खलु मङ्गलार्थं
धम्मिल्लबद्धकुसुमा स्वपने त्वभूवम्॥ ६॥

राधा – हला गोदे, अहं तावदेवमवैमि–
स्वप्ने यद्यपि दृष्टवान्स भगवान्नानास्वरूपोज्ज्वलः
सत्येवञ्च स वञ्चनैकनिरतः प्रत्येतुमर्हो न हि।
पूर्वं वामनरूपतो बलिमपि स्वांघ्रिश्रितं वञ्चना–
व्यापारेण रसातलं समनयत्कारुण्यलेशं विना॥७॥

गोदा – हन्त! एवम्? उदन्तमेनं श्रुत्वा कम्पते मे हृदयम्। किमद्य कर्तव्यम्?

राधा – तस्मै मा स्पृहय।

गोदा – (सावेगं) हला राधे, किमेवं वदसि? तं विना नाहं प्राणिमि।

राधा – तर्हि किमद्य कर्तव्यम्?

गोदा – तत्प्राप्त्यै व्रतमाचरितुमिच्छामि।

राधा – पश्यामस्तावत्तेन वा स तु वशीभविष्यतीति।

(प्रविश्य विष्णुचित्तः)

वि.चित्तः – अहो, धनुर्मासोऽपि सन्निहितः–

जडमयः पवनो हिमबन्धुरः
प्रचलति प्रतिदिक्तटतोऽनिशम्।
उषसि शुभ्रघनावलिवर्द्धिमं
प्रसरति प्रतिरुद्धजनेक्षणम्॥ ८॥

(इत्युपसृत्य) अम्ब गोदे, किमद्याप्यत्रैव तिष्ठसि?

गोदा – पुष्पाण्यपचिनोमि तात।

वि.चित्तः – अलं पुष्पापचयेन, अवशिष्टमपचिनोम्यहम्। गच्छतु भवत्युटजम्।

गोदा – (सानुनयं) तात, किमपि कर्तुमिच्छामि।

वि.चित्तः – किं तदम्ब? विशदं निवेदय।

गोदा – व्रतं चरिष्यामि।

वि.चित्तः – किमर्थम्?

गोदा – भगवत्प्राप्त्यर्थम्।

वि.चित्तः – वत्से–

हिमकरम्बितवायुरयं तनुं
सुतनु कम्पयति प्रसरन्मुहुः।
पृथुलकम्बलिनामपि दुस्सहः
श्रममयं कथमाचरसि व्रतम्॥ ९॥

गोदा – श्लाघ्यतमो हि मासोऽयं व्रताचरणाय। किञ्च, मासानां मार्गशीर्षोऽस्मीति भगवतैवानुगृहीतं खलु।

वि.चित्तः – तत्सत्यम्। श्रमसाध्यमित्यभिहितं, गच्छोटजम्।

गोदा – तात, भवदनुग्रहाच्छ्रमसाध्यमपि सुसुखं प्रचलिष्यति। (इति राधया सह निष्क्रान्ता)

वि.चित्तः – हन्त, वत्सायाश्चित्तदार्ढ्यम्। भगवत्प्राप्तित्वरायाः कार्यमेतत्। प्रचलतु नाम। अहो सायं सन्ध्याप्युपनता।

पतत्रिनिकरो नभस्यतिरवं स्वनीडं प्रति
प्रडीनचटुलो व्रजत्यचलगं सुशोणं रविम्।
नमन्ति विहितार्घ्यका द्विजवरास्सरस्तीरगाः
ज्वलन्ति भगवद्गृहे मुकुलवत्प्रदीपाङ्कुराः॥ १०॥

(परितो विलोक्य) हन्त–

नीराजनं भगवतः प्रचलत्सभक्ति
द्रष्टुं जना भगवदावसथं प्रयान्ति।
घण्टारवोऽपि पुरवासिजनानिवारा–
दाकारयत्यचिरमेव तदीक्षणार्थम्॥ ११॥

तदहमपि यास्यामि भगवन्मन्दिरम्।

(इति निष्क्रान्तः)

॥ इति चतुर्थोऽङ्कः॥

॥ पञ्चमोऽङ्कः ॥

(ततः प्रविशति निजोटजस्थो विष्णुचित्तः ।)

वि.चित्तः – (बहिरागत्य प्राचीं दिशमवलोक्य) अहो, उषःकालोऽपि सन्निहितः–

प्रालेयसन्ततिनिगूढतया नितान्तं
प्राचीदिगुद्भवदहस्करशोणकान्त्या।
आरुण्यलेशयुतपाण्डरचीनचेल–
विस्तारितोज्ज्वलतिरस्करिणीव भाति॥ १॥

(उटजाभ्यन्तरमवलोक्य) हन्त, गोदा तावत्प्रागेव प्रबुद्धेव।

वकुलिका – (वेपमाना प्रविश्य) हन्त, शीतलो वातो बाधते माम्। (कृतजृम्भा) आचार्य, गोदा तावत्तदैव प्रबुद्धा सिष्णासुः प्रस्थिता सरसीम्।

(नेपथ्ये प्रबोधनध्वनिः)

वि.चित्तः – (नेपथ्याभिमुखमवलोक्य) नाद्यापि गता सरसीम्। पश्य तावत्–

नूत्नधन्विनगरं व्रजं तथा
तन्निवासरसिकास्तु योषितः।
गोपिका वटदलेशयं तथा
कृष्णमात्मनि विधाय साम्प्रतम्॥ २॥

उषसि तुहिनसान्द्रे त्यक्तशय्या प्रबुद्धा
प्रतिगृहमुपगम्य प्रोक्ततन्नामधेया।
अररसुघटितत्वाद्द्वारितिष्ठन्त्यभीक्ष्णं
स्वपनरतसखीरुद्बोधयत्यादरात्सा॥ ३॥

वकुलिका – अहो, वत्साया दृढसङ्कल्पता–

जडवातकम्पिततनुः बहिः कथं
सुखसुप्तबन्धुरसखीगृहाङ्कणे।
प्रतिबोधनैकनिरता सखीततेः
स्थितवत्युषस्यधिकृतव्रता सुता॥ ४॥

वि.चित्तः – सा तु मनुते तावदस्मत्सरसीं यमुनाम्।

(नेपथ्ये)

उत्तिष्ठ कुन्तलि मुधा स्वपिषि प्रियेण
साकं कवाटमपवारय सार्गलं ते।
स्नातुं प्रयाहि यमुनां सहसा सखीभि–
रातोद्यपाणिभिरितो व्रतसाधनाय॥ ५॥

वकुलिका – हन्त, प्रतिद्वारमेवं तिष्ठति वत्सा।

(नेपथ्ये)

प्रांशुं त्रिविक्रममहर्मनसा स्मरन्त्यः
स्नात्वा कलिन्दतनयासलिले पवित्रे।
त्यक्ताञ्जनाखिलपरिष्कृतयो विशुद्धाः
कृष्णाप्तये वयमिदं व्रतमाचरामः॥ ६॥

वि.चित्तः – (आकर्ण्य) क्लेशदायी खलु वत्सायाः प्रयत्नोऽयम्। गृहाभ्यन्तरे सुखसुप्ताः, कथं वा समुत्तिष्ठन्ति हिमकरम्बितशीतलवातबहुले तावदुषसि? तथापि नैवोज्झति निजप्रयत्नम्।

(पुनर्नेपथ्ये)

नन्दात्मजस्य भवनं समुपेत्य तत्र
द्वाःपालकानुमतिमप्युपलभ्य मन्दम्।
नीलापयोधरतटे सुखसुप्तमारा-
त्कृष्णं प्रबोधयितुमद्य वयं प्रयामः॥ ७॥

वि.चित्तः – (नेपथ्याभिमुखमवलोक्य) किन्नु खल्विदम्? अनेनैव पथा यमुनां प्रयान्तीव। अम्ब वकुलिके, अहं तावत्कुसुमापचयाय पुष्पोपवनं यास्यामि। (इति निष्क्रान्तः)

(ततः प्रविशति सखीभिः परिवृता गोदा)

गोदा – हला राधे, अपि नाम गायामो भगवन्नाम?

राधा – महान्प्रमोदः, आरभ्यतां नाम।

वकुलिका – अहं तावद्यास्यामि वकुलकुसुमगुम्भनायोटजम्। (निष्क्रान्ता)

गोदा – **जय नन्दसुताश्रितवत्सल हे**
जय गोपीजनमानसहंस हरे।
जय गोवर्धनधरगोपपते
जय गोपाल जयाच्युत कृष्ण हरे॥ ८॥

(सर्वाः सतालं तथा गायन्ति)

गोदा – (सखीभिस्सह परिक्रम्य) हला राधे, सन्निहिता यमुना-

यमुना प्रवहत्यसितायतजीवनभृ-
द्भगवद्यदुनाथतनुत्विडपाहरणा।
कमलालिविडम्बितकृष्णविलोचनका
पृथुलोर्मिनिदर्शिततद्भुजदण्डयुगा॥ ९॥

राधा – अहो, स्पृहणीयदर्शना यमुना।

गोदा – (आत्मनश्शिरसि तत्तीर्थोदकं संप्रोक्ष्य साञ्जलिबन्धं)

यमुने त्वयि सोऽपि वासुदेवो
नितरां स्निह्यति गाहते भुजाभ्याम्।
परिरम्भणदस्ततोहमद्य
त्वयि गाहे तदवाप्तयेऽनुबन्धात्॥ १०॥

(इति सखीभिर्जलावगाहनमभिनयति)

राधा – हला गोदे–

अलिकरचितपुण्ड्राबद्धधम्मिल्लपुष्पा
विरहलुलितमुग्धा मुग्धगम्भीरवक्त्रा।
विशदमृदुलचेला कण्ठसंसक्तमाला
सुवलयमणिबन्धा कृष्णमावर्जयाशु॥ ११॥

गोदा – मुग्धे, स तु वञ्चक इत्युक्तं भवत्या। किमनेनालङ्कारेणावर्जितो भवेत्?

राधा – अद्य तावद्भवतीमवलोक्य भवदधीनो भवत्येव।

गोदा – (दीर्घं निःश्वस्य) न मे विश्वासः।

राधा – न तथा–

गोपीभिर्यमुनातटे स भगवान्क्रीडैकतानः पुरा
तत्संश्लेषणदिव्यगानमुरलीवादादिभिर्मोदयन्।
ज्योत्स्न्यां मञ्जुलकौमुदीधवलिते सूर्यात्मजासैकते
रासक्रीडनतत्परो वलयितस्ताभिश्चकाशे खलु॥१२॥

स्वतन्त्रः खलु सः यथाभिलषितमाचरति। तद्भवत्सौन्दर्यवशीकृतमानसः समागच्छेदपि भवतीम् उद्वोढुम्।

गोदा – (दीर्घं निःश्वस्य)–

रुक्मिणीसत्यभामादिमहिष्योऽष्ट ततोऽपि वा।
किमहं सुन्दरी राधे कथं प्रत्येमि तन्मनः ॥ १३ ॥

राधा – न तथा। तव दूरीकृतदेवतान्तरता तावत्समाकर्षति तन्मनः। तदलं चिन्तया।

गोदा – (विचिन्त्य) हला राधे, देवतान्तरसाह्यमन्तरा तत्प्राप्तिर्दुर्लभेति मन्ये।

राधा – हन्त, किन्नु खल्विदम्? देवतान्तराश्रयणमपि कर्तुमिच्छतीव।

गोदा – आम। भगवल्लाभार्थं तदाश्रयणे को दोषः? तद्विरचय सैकते मण्डलं, मन्मथपूजामाचरिष्यामः।

राधा – यथा रोचते भवत्यै। (इति मण्डलं लिखति)

गोदा – (सखीभिस्सह कुसुमैरभ्यर्च्य सप्रदक्षिणाञ्जलिबन्धं) ननु सकलचराचराभिनन्दित, कुसुमशर, वशीकृतसर्व लोकशम्बरारे, नमस्ते–

अघटितघटनादाक्ष्यं
त्वयि मन्मथ वर्तते नूनम्।
अभ्यर्थये भवन्तं
तद्योजय शौरिणैनां माम्॥ १४॥

(इति ध्याननिमीलितलोचना क्षणमिव स्थित्वा मन्दं नेत्रमुन्मील्य सानन्दबाष्पं) किन्नु खल्विदम्? हला! राधे, पश्य तावत्–

पीताम्बरो नवपयोधरकान्तिरेषः
हस्ते विधाय मुरलीं मधुरस्मितास्यः।
केयूरहारकटकादिविभूषिताङ्गः
पीयूषवर्षमिव मे तनुते दृशोर्हि॥ १५॥

कृष्णः – (समन्दस्मितं) अयि गोदे–
भुक्तोज्झितं माल्यमहं विधार्य
तद्भोग्यतावश्यमनास्त्वदीयम्।
संश्लेषमिच्छन्सहसाऽऽगतोस्मि
व्रतं किमर्थं कठिनं करोषि॥ १६॥

(इति गोदायाः पाणिं गृह्णाति। गोदा सलज्जमवनत-मुखी तिष्ठति)

(प्रविश्य विष्णुचित्तः)

वि.चित्तः – किन्नु खलु, नाद्याप्यागता गोदा। (इति दूरादवलोक्य) धन्योऽस्मि ! हन्त, भगवान्वासुदेवः–

पुण्डरीकनयनः पुरातनः
चण्डभानुसदृशद्युतिर्हरिः।
खण्डनाय तमसां मदीयता–
शेमुषीप्रसरतामिहास्त्यहो॥ १७॥

(इत्युपसृत्य दण्डवत्प्रणम्य सबाष्पगद्गदाञ्जलिबन्धं) भगवन्, गोदासम्बन्धाद्धन्योऽस्मि। कृतकृत्योऽस्मि। अनुगृहीतोऽस्मि। इदानीमलभं जन्मसाफल्यम्।

वकुलिका – (वकुलमालाहस्ता प्रविश्यावलोक्य च) किन्नु खल्विदं–

धन्या गोदा मुररिपुमिमं पाणिना तं गृहीत्वा
लज्जानम्रा व्रतकृशतनुस्तेजसा भासमाना।
जीमूतस्य प्रचुरसलिलस्योपकण्ठे स्थिराभा
संसक्ताङ्गी तडिदिव ददत्कान्तिरस्यापि चित्रम् ॥१८॥

(उपसृत्य) धन्याऽभवम्। (इति प्रणम्य) यदनेन चक्षुषा पश्यामि भगवन्तं तावदीदृशम्। आचार्य, उक्तं खलु भवत्करलालिता भवदन्नपुष्टा भवदनुग्रह–भाजनञ्च गोदा भगवतः पाणिं गृह्णाति इति। दिष्ट्या तथैव संवृत्तम्। भवत्सम्बधात्समुत्तीर्णा गोदा।

वि.चित्तः – न तथा वक्तव्यम्। अम्ब, मुग्धकुन्तले गोदे, वकुलमाल्यमेतत्समर्पय वासुदेवकण्ठे। प्रकाशतां तावदनेनायं वकुलभूषणः। (इति गोदाहस्ते वकुलमालामर्पयति)

(गोदा सानन्दबाष्पं वासुदेवकण्ठे वकुलमालामर्पयति)

वि.चित्तः – अम्ब गोदे, पूर्णकामेन परिगृहीता पूर्णकामासि। किं ते भूयः प्रियमुपहरामि ?

गोदा – तात–

भगवान्वासुदेवो मां कृपाब्धिश्रितवत्सलः।
अङ्गीचकार कारुण्यात्किमितोऽप्यस्ति मे प्रियम्॥ १७॥

तथापीदमस्तु –

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः।। १६।।

(निष्क्रान्तास्सर्वे)

।। इति पञ्चमोऽङ्कः ।।

जग्गूवकुलभूषणमहाकविकृतं
मुग्धकुन्तलम् नाम नाटकं
सम्पूर्णम्।

प्रबुद्धप्रज्ञम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः
देवदेवी
मन्दारिका
विप्रनारायणः
शिष्यः शार्ङ्गरवः
नागरिकस्यालौ
रङ्गनाथः

प्रबुद्धप्रज्ञम्

॥ प्रथमोऽङ्कः ॥

भोगीन्द्रभोगशयनं कमलायताक्षं
श्रीमद्विभीषणकरार्चितपादपद्मम्।
धावत्कवेरतनयालहरीपरीतं
श्रीरङ्गनाथमनिशं शरणं व्रजामि॥ १॥

(ततः प्रविशति सूत्रधारः)

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि –

नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये किङ्किणीनादः)

अये, मयि विज्ञापनव्यग्रे शब्द इव। पश्यामि तावत्। (नेपथ्याभिमुखमवलोक्य) आं ज्ञातम्। चोलनरपतेः नर्तकी नृत्यतीव। तदहमपि तत्र गच्छामि। (निष्क्रान्तः)

॥ प्रस्तावना॥

(ततः प्रविशति यथानिर्दिष्टा नर्तकी सभ्यैस्सह)
(सभ्याः परस्परं व्याहरन्ति)

भावाभिदर्शनविधौ करपल्लवेन
मुद्रां प्रदर्श्य नयनेन विलासभाजा।
भ्रूचालनेन विशदीकृतभावनृत्या
तालानुचालितपदा बत नृत्यतीयम्॥ ३॥

किञ्च–

भ्रूभङ्गदर्शितरुषा नयनभ्रमेण
राज्ञि प्रदर्शितरतिः भुजचालनेन।
साक्षात्स्वयं भरतशास्त्रमिवात्तरूपा
नारी किमित्यभवदित्यनिशं विशङ्का ॥ ४ ॥

राजा – साधु नर्तितम्। (पारितोषिकं ददाति)

देवदेवी – (आदाय परिक्रम्य) अयि मन्दारिके, श्रान्तास्मि। यत्र कुत्रापि विश्रम्य गच्छावः।

मन्दारिका – (परिक्रम्य) हला, अस्मिन्नुपवने विश्रम्य गन्तुमर्हति भवती।

देवदेवी – तथास्तु। (उपवनं प्रविश्य तरुतले उपविश्य परितो दत्तदृष्टिः) अयि मन्दारिके, पश्योपवनरामणीयकम्–

नानापुष्पवितानगन्धसुभगं भृङ्गावलीनादितं
नानापक्षिरुतातिमेदुरवटं वल्लीनिकाय्याञ्चितम्।
चञ्चच्छ्रीतुलसीवनाभिरुचिरं विश्रान्तिसौख्यप्रदं
मन्दस्पन्दिसमीरनर्तितलतं कस्यापि रम्यं वनम् ॥५॥

इतः पश्य–

कासारे तरणकृतादरा विशुद्धाः
क्रेङ्कारध्वनिसुभगाः प्रलम्बपादाः।
अस्माकं मनसि मुहुर्विलोकनेच्छां
तन्वन्ति प्रचुरकुतूहलां मरालाः ॥ ६ ॥

(नेपथ्याभिमुखमवलोक्य)

आजानुबाहुरमलायतफालपुण्ड्रः
निर्णिक्तचेलपरिधानमनोहरोऽयम्।
कण्ठावलम्बितविलोलजपाक्षमालो
विप्रोऽभियाति सहसैव खनित्रपाणिः॥ ७॥

(ततः प्रविशति सशिष्यः विप्रनारायणः)

विप्रना. – भोः शार्ङ्गरव, अहं तावत्–

निबध्य माल्यानि सुमैर्विचित्रैः
श्रीरङ्गनाथाय समर्पयामि।
कैङ्कर्यवृत्त्या भगवत्प्रसादात्
जीवामि नित्यं मम तत्सदैव॥ ८॥

(उपविश्य मालां निबध्नाति)

देवदेवी – (विलोक्य) हन्त–

पुष्पादामो भोजनाद्वृन्तसूत्र
ग्रन्थ्याधानं कश्च शक्नोति वेत्तुम्।
शश्वत्पाणिर्नृत्यतीवास्य चित्रं
रम्यं माल्यं दृश्यते माययेव॥ ९॥

विप्रना. – (माल्यानि भाजने निधायोत्तिष्ठति)

देवदेवी – (उपसृत्य प्रणमति)

विप्रना. – (अदृष्ट्वैवान्यतो दत्तदृष्टिः निष्क्रान्तः)

देवदेवी – (सक्रोधं) हन्त! नैव कृतवानाशीर्वादमपि। भवतु तावत्। कथमपि वशीकरिष्यामि। एतादृश एव मत्करजाले क्षिप्रं पतिष्यति।

मन्दारिका – (सवैलक्ष्यं) किमिदं स त्वेवं तृतीयप्रकृतिरिव ज्ञायते।

देवदेवी – मन्दारिके, न जानासि माम्। तृतीयप्रकृतिरपि प्रथमप्रकृतिं करोमि। गच्छतु भवती भवनम्। अहं तावदत्रैव वर्ते।

मन्दारिका – तथा (निष्क्रान्ता)।

शिष्यः – (देवदेवीमुपसृत्य) कुतस्तिष्ठसि? का त्वम्?

देवदेवी – अहं देवदेवी। स्वामिसन्दर्शनार्थं प्रतिपालयामि।

शिष्यः – अत्र तावत्तस्य नावकाशः। तदितो प्रयाहि।

देवदेवी – स्वामिन्, अहं तावद्वेश्यावृत्तिजिहासया सर्वतः निर्वेदेनागताऽस्मि स्वामिसंन्निधौ कैङ्कर्यकरणाय।

शिष्यः – आचार्येणादिष्टोऽस्मि स्त्रीसामान्यमन्तः मा प्रवेशयेति।

देवदेवी – अहमेकवारं प्रणम्याचार्यं यास्यामि।

विप्रना. – (प्रविश्य पुष्पापचयं नाटयति)

देवदेवी – (स्वयमपि पुष्पाण्यपचित्य दातुं पुरः प्रसारयति करम्)

विप्रना. – शार्ङ्गरव, पुष्पाण्यादाय निष्कासय ताम्।

शार्ङ्गरवः – (तथा कृत्वा) गच्छ बहिः।

देवदेवी – (विप्रं प्रणम्य) स्वामिन्, अहमत्रैव विविक्ते पुष्पापचयं माल्यग्रथनं संमार्जनं एवमेवेतराणि कार्याण्यपि कुर्वती वर्ते। तदङ्गीकुरु।

विप्रना. – शार्ङ्गरव, अङ्गीकारे को दोषः?

शिष्यः – आचार्य मास्तु अङ्गीकारः। प्रमादेन नियमभङ्गो भवेत्। अहमपि जानामि वेश्याकैङ्कर्यम्।

विप्रना. – किमु मां तथा शिथिलेन्द्रियं जानासि?

शिष्यः – (कर्णौ पिधाय) शान्तं पापम्। शान्तं पापम्। जितेन्द्रियः आचार्यः। (स्वगतं) बलवानिन्द्रियग्रामः विद्वांसमपि कर्षति।

विप्रना. – शार्ङ्गरव, कस्ते आशयः ?

शिष्यः – तर्हि, अङ्गीक्रियताम्।

विप्रना. – देवदेवि, कैङ्कर्ये निरता भव।

देवदेवी – धन्यास्मि। कृतकृत्यास्मि। (पुष्पापचयं कृत्वा भाषागाथाः गायन्ती पुष्पमालां बध्नाति)

विप्रना. – शार्ङ्गरव, मध्यंदिनवेलाप्युपनता। भगवते माल्यं तावत् सज्जीकुरु। अहं तावत् माध्यंदिनकर्मणे सरसीं यास्यामि। (गगनं विलोक्य)

रविः किरति भूतले सतततीक्ष्णघोरातपं
तृषाकुलमृगा जलं त्वभिलषन्ति नीराशये।
जनाः पथि निरङ्कुशं नहि चरन्ति तापाकुलाः
जलाशयतले झषाः तपनतापतस्संस्थिताः॥ १०॥

(निष्क्रान्तः)

देवदेवी – (स्वगतं) स तु कथमपि वशीकरणीयः। भवतु यतिष्ये।

विप्रना. – (प्रविश्य)

नमस्ते देवदेवाय भक्तपालनचक्रिणे।
भोगकल्पिततल्पाय रङ्गनाथाय मङ्गलम्॥ ११॥

अपि नामासीन्माला ?

देवदेवी – अथ किम्।

विप्रना. – तर्हि दीयताम् (पाणिं प्रसारयति)

देवदेवी – (सहस्तस्पर्शं ददाति)

विप्रना. – मा स्पृश। दूरे भव। (मालामादाय निष्क्रान्तः)

॥ इति प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(ततः प्रविशति विप्रनारायणः)

विप्रना. – (गगनमवलोक्य) अहो! वर्षासमयोऽपि सन्निहितः। तथाहि–

मेघाडम्बरमम्बरं सचपलं भारातिवर्षोन्मुखं
गर्जद्घोररवं शिखावलकुलैरारब्धनृत्याकुलम्।
जंझावातविचालितोरुविटपं दीप्रस्फुरत्स्फूर्जथुं
धारापातकृतातिनीरविपुलावर्तोच्चलद्बुद्बुदम॥ १॥

(नेपथ्याभिमुखमवलोक्य) हन्त–

वर्षोरुनीरपरिषिक्तसमस्तचेला
निम्नोन्नताङ्गपरिदर्शितदेहमौग्ध्या।
केशाग्रनिस्सृतजलार्द्रनितम्वविम्बा
बाहुद्वयस्थगितपीनपयोधरेयम्॥ २॥

वर्षोरुधारातिमितांशुकेयं
जंझानिलाघट्टितदन्तपङ्क्तिः।
बाहालतास्वस्तिकगूढवक्षाः
सा देवदेवी बहिरास्थिता हि॥ ३॥

दयनीयेयं, तदभ्यन्तरं समाकारयेयम्। अयि, मानिनि, अभ्यन्तरमायाहि सिक्ताऽसि।

देवदेवी – (उपसृत्य) अहमत्रैवाऽस्मि। दूरे भवेत्युक्तम्।

विप्रना. – क्षमस्व सुन्दरि। वोढुं ददामि वस्त्रान्तरम्। तेमवस्त्रेण मा तिष्ठ। (इत्यभ्यन्तरं नयति)

देवदेवी – (स्वगतं) अहो! मत्सङ्कल्पः फलितः।

विप्रना. – **परिधृतपरिधानां नीलकेशाढ्यशीर्षां**
करधृतवलयालिं कुङ्कुमस्थासकाङ्गाम्।
असितविपुलनेत्रीं काञ्चिबद्धावलग्नां
निरुपममुखपद्मां वीक्ष्य मुग्धोऽस्मि कोऽहम्॥ ४॥

देवदेवी – नाथ, अहं तावत् गृहं जिगमिषुरस्मि।

विप्रना. – कथमद्यैव यास्यसि। ननु कल्याणि–
गाढालिङ्गनभुग्नचूचुककनद्वक्षोजकुम्भाधुना
मत्कंठार्पितदीर्घबाहुलतिका प्रोद्भिन्नरोमाञ्चिता।
कान्ते स्वर्गसुखं तवाधरसुधादानेन दीनाय मे
कन्दर्पोरुशरानुविद्धहृदयायापादय प्रेयसि॥ ५॥

ननु हरिणाक्षि, भवदर्थमेव कुसुममिदमखिलमपि–
लतागृहे मारुतलोलनाना–
प्रसूनगन्धे खगनादरम्ये।
डोलाविहारेण कृतप्रमोदौ
कालं क्षिपावो दृढबाहुबन्धौ॥ ६॥

देवदेवी – किमिदम्? रङ्गनाथं न नयसि सुममालाम्?

विप्रना. – इमां तु मालां तव कन्धरायां
समर्प्य दृष्ट्वा भवतीं प्रसन्नाम्।
धन्यो भवेयं प्रमदाब्धिमग्नः
साफल्यमेष्यत्यखिलं च पुष्पम्॥ ७॥

देवदेवी – हन्त विस्मृतरङ्गनाथोऽयं मामेव सर्वस्वं मन्यते।
मन्दारिका – (प्रविश्य) हला, मात्रा समाहूताऽसि।
विप्रना. – किमु मात्रा? किमर्थम्?
मन्दारिका – न जाने।
देवदेवी – इयमहमागता।
विप्रना. – ननु गमिष्यसि–
ननु मां विहाय कथमाशु गच्छसि
प्रतिपालयामि भवतीं सदा प्रिये।
तव दास एष सहवासजीवितः
विरहादयं तु कथमत्र जीवति॥ ८॥

तदेहि। (इत्यभ्यन्तरं नयति)
(ततः प्रविशति शिष्यः)
शिष्यः – (शिरसि हस्तमाधाय) हन्त, कष्टं भोः, कष्टम्। अस्मदाचार्यः एवं भवतीति स्वप्नेऽपि मया न चिन्तितम्। यदा चाचार्यः तां कैङ्कर्ये नियुक्तवान्, तदैव तर्कितं प्रमादबीजमिति। इदानीं विषयशृङ्खलाबद्धः कथमिव विमुक्तो भवेत्?
यदुशैलनाथकृपयाप्तसंभवः
सततं च रङ्गचरणैकभक्तिभाक्।
तुलसीप्रसूनवरमाल्यकृद्गुरुः
कथमद्य हन्त गणिकैकदैवतः॥ ९॥

हुम्, एवमेव जगत्।

मेनकाशृङ्खलाबद्धो विश्वामित्रो महामुनिः।
स्त्र्यपत्यजनको रेजे बलवानिन्द्रियव्रजः॥ १०॥

स्यादेतत्, तादृशो वर्णी तावदेवं संवृत्त इति महदिदमाश्चर्यम्। (गगनमवलोक्य)

युगादूर्ध्वं समारूढो भास्करस्तु प्रकाशते।
कथमद्यापि शेतेऽयं गाढनिद्रो गुरुर्मम॥ ११॥

सर्वमप्याचार्येण विस्मृतो नियम इति ज्ञायते। किं करोम्यद्य ?

उषसि प्रबुध्य रचितावगाहनः
तुलसीप्रसूनगुणगुम्फने रतः।
कथमद्य हन्त गणिकावशंवदः
स्वपिति प्रभातसमयेऽपि मे गुरुः॥ १२॥

शब्दापितश्चेत् कुप्यति मे गुरुः। (विचिन्त्य) भवतु, तावदेवं करोमि—

कौसल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥ १३॥

यशोदा सुप्रजा कृष्ण पूर्वा संध्या प्रवर्तते।
उत्तिष्ठ व्रजसौभाग्य कर्तव्यं रक्षणं गवाम्॥ १४॥

(इत्युच्चैर्गायति)

(ततः प्रविशति विप्रनारायणः)

विप्रना. – (कराभ्यां नयने परिमृजन्) अपि बद्धा माला ?

शिष्यः – अथ किम्?

विप्रना. – देहि तावत्। देवदेव्यै समर्पयामि।

शिष्यः – किमिदं देवदेव्यैव देवदेवः इति ज्ञायते।

विप्रना. – अलं विकत्थनेन।

शिष्यः – आनयामि। (परिक्रम्य) हुं, किं कथयेयम्–

आरामं कुसुमाभिराममधुना त्वाचार्यभोगस्थलं
नानारम्यविचित्रपुष्पनिवहो वेश्याशिरोभूषणम्।
क्रीडास्थानमभूदहो सुमलतागेहं च नित्यं गुरोः
श्रीरङ्गेश्वरकिङ्करत्वमभवत्कुत्रापि लीनं बत॥ १५॥

(इति निष्क्रान्तः)

विप्रना. – ननु कल्याणि, अपि सुप्रभातम्?

देवदेवी – (स्वगतं) इदानीं जयशीला संवृत्ता। (प्रकाशं) अवश्यं मया गन्तव्यम्।

विप्रना. – मयापि अनुगम्यते। भवतीं विना क्षणमपि न जीवामि जलादुद्धृतो मीन इव। (निष्क्रान्तः)

॥ इति द्वितीयोऽङ्कः ॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशतः नागरिकश्यालौ)

एकः – आरामे तावन्न कोऽपि।

अपरः – कुत्र गतस्स्यात्।

एकः – शुष्काणि पर्णानि तत्र तत्र राशीभूतानि।

अपरः – नीरसम् आलवालं शीर्णं च।

एकः – म्लानानि कुसुमानि कानिचिन्निपतितानि।

अपरः – वृक्षकाः शुष्कप्रायाः।

एकः – अत्र निपतितः नारिकेलसम्पुटकः।

अपरः – उपवनगृहं रोदितीव। तं तावत् मृगयावः। (इति तत्र तत्र परिक्रम्याग्रतोऽवलोक्य) हन्त! पश्य, वेश्यागृहबहिर्वितर्दिकायां कोऽपि शेते। तत्पश्यावः। (उपसृत्य) को वा लुण्टाकः?

शीतवातपरिकम्पितगात्रः
मेदिनीशयनदूषितनिद्रः।
जानुदेशचुबुकश्चलदन्तः
बाहुयुग्मदृढबन्धजकोष्णः॥ १॥

विप्रना. – देवि, मामन्तः प्रवेशय। न सहे शीतबाधाम्। (इत्युत्स्वप्रायते)

श्यालः – उत्तिष्ठ रे! (इति कशया ताडयति)।

विप्रना. – अब्रह्मण्यम्! अब्रह्मण्यम्। (इत्युत्तिष्ठति)

श्यालः – (गगनमवलोक्य) अहो! प्रातरभूत्। तथाहि–

डीयन्ते पक्षिणो हर्षात्स्वकर्मणि रता जनाः।
प्रासादे वाद्यघोषश्च तद्यावो राजमन्दिरम्॥ २॥

(इति विप्रं गृहीत्वा प्रासादाभ्यन्तरं प्रविशति)

विप्रना. – (अभिमुखमवलोक्य)

मत्तमातङ्गगमनः प्रजापालनतत्परः।
सत्याय मितभाषी सन्राजायाति सभां प्रति॥३॥

(ततः प्रविशति यथानिर्दिष्टः राजा)

राजा – (उपविश्य दूरादवलोक्य) हन्त! सोऽयम्–

योऽभूत्सदा कुसुमगुम्भनसक्तचित्तः
श्रीरङ्गनाथविनयार्पितबद्धमाल्यः।
यो वेदघोषपरितर्पितरङ्गनाथः
सोऽयं खलु द्विजवरः किमिदं तु युक्तम्॥ ४॥

भगवत्पात्रापहरणाय चिरात्किमेष वेषः परिगृहीतः?

विप्रना. – (कर्णौ पिधाय) हा नियते! कठोरेयमुक्तिः। कथं शृणोमि?

राजा – विप्रोत्तमः खलु भवान्?

विप्रना. – आम।

राजा – सात्त्विकवेषः किमेवं कुर्याद्वा?

विप्रना. – किं मया कृतम्?

राजा – भगवदाराधनसुवर्णपात्रापहरणमेव।

विप्रना. – आः, कष्टं भोः। प्रभो, किमपि न जाने।

राजा – (सस्मितं) अपहृत्य न किमपि जाने।

विप्रना. – किमर्थमपहृतमिति?

राजा – वेश्यायै दातुम्।

विप्रना. – केनोक्तम्?

राजा – देवदेवीमात्रा?

विप्रना. – किमिति?

राजा – स तु द्रव्याभावात् बहिः निष्कासितः। ततः यस्मात् कस्मादपि समानीय दत्तवानिति।

विप्रना. – (शिरसि हस्तमाधाय) हे भगवन्, सहवासदोषः।

राजा – (सस्मितं) भोः, ब्राह्मण, एतादृशाभिनयप्रदर्शनेन नाहं विश्वसिमि भवान्निरपराधीति। भोः श्यालौ, एनं कारागृहे निक्षिप्य एतद्वदनात्तथ्यांशं निस्सारयतम्।

स्यालौ – तथा। (इति विप्रं गृहीत्वा परिक्रम्य) इदं कारागृहम्। (इत्यन्तर्नुदतः)।

विप्रना. – (दीर्घं निःश्वस्य)–

हे रङ्गनाथ भवतः कृतवञ्चनोऽहं
मायावृतः विषयवागुरया निबद्धः।
मत्कर्मणः फलमिदं ननु दीनबन्धो
विश्वासपात्रमबला न कदापि सत्यम्॥ ५॥

तत्रापि गणिकाविषये किमु वक्तव्यम्।

हे रङ्गनाथ भवते विनयेन नित्यं
मालार्पिता किमधुना न हि तेऽभिकांक्षा।
लीलैकभाजनममुं भवतो विधाय
क्रीडस्यतस्तव पदौ शरणं व्रजामि॥ ६॥

स्यालः – सत्यं निवेदय। (इति कशया ताडयति)।

विप्रना. – (वेदनामभिनयन्) हे रङ्गनाथ ! पापिनो मम तावदियत्या शिक्षया नालम्। यया इतोऽप्यधिकशिक्षया भवितव्यं यतः पापक्षयो भवेत्।

स्यालः – (पुनस्ताडयित्वा) हुं निवेदय।

विप्रना. – नाहं किमपि जानामि। (वेदनामभिनयन्)

Central Sanskrit University CENTRAL LIBRARY 21025 Rajiv Gandhi Campus

हा हन्त हन्त न सहे करुणापयोधे
तूष्णीं स्थितोऽसि किमु हन्त तवाद्य दासः।
त्वद्दासभावमपहाय गतोऽस्मि नूनं
तस्मादहं दुरितभागभवं नितान्तम्॥ ८॥

हा हन्त, कष्टं भोः–
क्षुत्पिपासाविनुन्नोऽहं कशाघातप्रपीडितः।
इतोऽपि नरकः किंनु न हि मे नरकान्तरम्॥ ९॥

भोः स्यालौ, अञ्जलिं बध्नामि भगवत्कैङ्कर्यं विहाय वेश्याधीनोऽभवमिति सत्यम्। नाहं चोरः। सत्यं ब्रवीमि।

स्यालः – वेश्ययाभिहितं त्वयैवापहृतमिति। (इति कशया ताडयति)

विप्रना. – (वेदनया परिलुठन्)
हे रङ्गनाथ भवते रचितं तु दास्यं
व्यर्थं किमाश्रितममुं परिपालयाद्य।
नैवाचराम्यहमितो दुरितैककार्यं
मोहान्धकारविवशः कृतवानसह्यम्॥ १०॥

राजा – (उपसृत्य) अयं तावत् सत्यं ब्रवीति वा न वा पृच्छामः।

विप्रना. – (अञ्जलिं बद्ध्वा) नाहमपराधी।
(विप्ररूपी रङ्गनाथः पटाक्षेपेण प्रविश्य) राजन्, अयं तावन्निरपराधी। मयैवैतत्सर्वं समाचरितमस्य विरक्तिसम्पादनार्थम्–
कामाभितप्तहृदयोऽभवदात्तमोहः
प्राप्तानुतापपरिपक्वमना बभूव।
तस्माद्विमुञ्चतु भवानपराधमुक्तं
मद्भक्तभक्तपदरेणुममुञ्च नाम्ना॥ ११॥

राजा – मुक्तोऽसि।

विप्रना. – (बहिरागम्य रङ्गनाथं प्रणम्य साञ्जलिबन्धं) भगवन्, करुणासिन्धो! भवदनुग्रहार्थं सर्वमेतत् प्रचलितम्। इदानीं प्रबुद्धप्रज्ञोऽस्मि।

राजा – (विप्रं प्रणम्य) भगवन्, अपराधिनं मां क्षन्तुमर्हसि।

विप्रना. – राजन्, न हि भवानपराधी। भवता कर्तव्यं कृतम्।

रङ्गः – भक्ताङ्घ्रिरेणो! इतः परं मत्कैङ्कर्यपरो भव।

विप्रना. – अनुगृहीतोऽस्मि भगवन्। ज्ञानी तु आत्मैव खलु भवतो मतम्।

रङ्गः – अथ किम्? आत्मधारणार्थमेव एवं कृतम्। किं ते भूयः प्रियमुपहरामि?

विप्रना. – अपोहितकलङ्कोऽस्मि विमुक्तो बन्धनादहम्।
त्वत्कृपापात्रतां नीतः किमितोऽप्यस्ति मे प्रियम्॥१२॥
तथापीदमस्तु

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ १३॥

(निष्क्रान्तास्सर्वे)

॥ इति तृतीयोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
प्रबुद्धप्रज्ञं नाम नाटकं
सम्पूर्णम्।

कौमुदीयम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

शिष्यः

परकालः

कुमुदवल्ली

कुन्तलिका - सखी

पयोगामी

भागवताः

दम्पती

नारायणः

कौमुदीयम्

॥ प्रथमोऽङ्कः ॥

सप्तप्राकारजठरे भोगिभोगशयालवे ।
रमासेवितपादाय रङ्गनाथाय मङ्गलम् ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये)

चोराणां साह्यकृच्चन्द्रः नभोमध्यं प्रविष्टवान् ।
सर्वे जनाः स्वपन्त्यद्य गाढनिद्रावशीकृताः ॥ ३ ॥

तदद्य सर्वस्वापहरणाय सुसमयोऽयम् ।

सूत्रधारः – हन्त मयि विज्ञापनव्यग्रे शब्द इव । तत् पश्यामि तावत् । (नेपथ्याभिमुखम् अवलोक्य) आं ज्ञातं परकालशिष्याणां जल्पितमिदम् । तदत्र न मया स्थातव्यम् ।

(निष्क्रान्तः)

॥ स्थापना ॥

(ततः प्रविशन्ति यथानिर्दिष्टाः शिष्याः)

एकः – मुखफूत्कारमात्रेण गृहं भूयान्निरर्गलम्।
तद्भित्तिरन्ध्रकार्यं तु कर्तव्यं न श्रमावहम्॥ ४॥

अन्यः – पयस्यहं प्रधावामि धरण्यामिव निर्भयम्।
अन्यपाणिगृहीतः सन्न भवाम्रि कदाचन॥ ५॥

अपरः – उत्पाद्य कलहं नृणां परस्परमहं तदा।
गृहं प्रविश्य सर्वस्वं हरामि सहसा कृती॥ ६॥

अन्यः – नरच्छायामवष्टभ्य स्वपदा निश्चलं स्थितात्।
मानुषादखिलं मार्गे ताडयित्वा हरामि च॥ ७॥

(नेपथ्याभिमुखमवलोक्य) अये अस्मत्स्वामी इत एव अभिवर्तते। अयं हि–

अश्वाधिरूढः करदीर्घखड्गः
समुन्नतश्मश्रुकलापरम्यः।
उष्णीषशीर्षो धृतकञ्चुकोऽयं
गाम्भीर्यदृप्तः समुपैति मन्दम्॥ ८॥

(ततः प्रविशति यथानिर्दिष्टः परकालः)

परकालः – (श्मश्रुकलापं परामृशन्) हन्त मच्चौर्यविधानं किं कथयेयम्–

विन्यस्य क्रमुकार्धमेव तरणौ युक्त्या ततो लेखवत्
नौकार्धक्रमुकं समग्रमहरं तत्स्वामितो लीलया।
एवं चौर्यविधावहं चतुरतां सन्दर्श्य नानाविधैः
सर्वत्रापि धनानि संप्रति हराम्यन्तेवसद्भिः समम्॥९॥

मम चौर्यवैखरी मामेव विस्मापयति।

शिष्याः – (उपसृत्य प्रणमन्ति)

परकालः – अपि सज्जाः ?

शिष्याः – सज्जा एव। आदिशतु स्वामी।

परकालः – भोः फूत्कारमुख, त्वं तावत् दक्षिणां दिशं याहि।
अये पयोगामिन्, त्वं तावत् पश्चिमां दिशं गच्छ।
भोः छायाग्राहिन् त्वं तावत् उत्तरां दिशं प्रयाहि।
अये कलहप्रिय, प्रयातु भवान् पूर्वदिग्भागम्।

सर्वे – यथानिर्दिशति स्वामी। (निष्क्रान्ताः)

परकालः – हन्त, प्रभातमप्युपनतम्। तथाहि–

उदयपर्वतशृङ्गगतो रविः
निजकरैः परिनुन्नतमःपटः।
भ्रमरझंकृतिवाद्यमनोहरः
कमलिनीमनुरञ्जयति प्रियाम्॥ १०॥

(नेपथ्याभिमुखमवलोक्य)

कापि सर्वाभरणभूषिता इत एवागच्छतीव। सा तु–

शीर्षस्नाननिबद्धकेशशिखरा फालस्फुरच्चित्रका
हारिद्रप्रचुरातिकोमलहनुर्निर्णिक्तशुभ्रांशुका।
हस्तन्यस्तफलप्रसूनपिटका नेत्रान्तसूक्ष्माञ्जना
पूजार्थं ससखी प्रसन्नवदना चायात्यसौ मन्दिरम्॥११॥

भवतु, अर्गलीभूय सर्वमप्याभरणमपहरामि। (तुरगाद् अवतीर्य धावति। ततः प्रविशति यथानिर्दिष्टा कुमुदवल्ली ससखी।)

कुमुदवल्ली – त्वरितं याहि देवमन्दिरम्। पूजासमयः।

सखी – तव तावत् सर्वदा त्वरातिशय एव।

परकालः – (उपसृत्य अर्गलीभूय तिष्ठति।)

सखी – मार्गं प्रयच्छ। पूजार्थं त्वरितं गन्तव्यम्। (कुमुदवल्ली परकालौ परस्परं मुखं पश्यन्तौ तिष्ठतः।)

परकालः – (स्वगतम्) किमिदम्? आभरणापहरणाय आगतोऽहं सौन्दर्येणापहृतः।

सखी – मार्गं प्रयच्छ।

परकालः – (अनिच्छया मार्गं प्रयच्छति।)

कुमुदवल्ली – (परिक्रम्य) अयि कोऽयम्? सेनापतिरिव दृश्यते।

सखी – स तु योऽपि कोऽपि वा भवतु। किमस्माकम्? (मन्दिरं प्रविशति) (तत्र पूजां निर्वर्त्य बहिरागच्छतः)

कुमुदवल्ली – अयि कुन्तलिके!

कमलविततनेत्रो जानुलम्बिप्रवेष्टः
सुदृढविपुलवक्षाः कुण्डलालम्बिकर्णः।
करटिरुचिरगामी पञ्चवक्त्रावलग्नः
तरुणिमरमणीयः चित्तहारी च कोऽयम्॥ १३॥

कुन्तलिका– किमु भवत्या अपि चित्तमपहृतवान्? तस्य कार्यम् अपहरणमेव। स तु चोरः खलु।

कुमुदवल्ली – कथं स तु चोरः?

सखी – आम्।

कुमुदवल्ली – तर्हि किं करोमि? तत्र मनो मे लग्नम्।

सखी – हला मास्तु तत्सहवासः। तस्माद्विरम।

कुमुदवल्ली – कथं विरमामि? मम मनस्तु तावत् तस्मिन्नेव स्निह्यति।

सखी – एवं शिथिलेन्द्रियया न भवितव्यम्।

कुमुदवल्ली – मां तु सम्यक् जानासि। कदाप्येवमासं वा ?

सखी – न श्रुता वा भवत्या चोरभार्यायाः स्थितिः ?

कुमुदवल्ली – जानामि। तथापि न पारयामि तस्मान्निवर्तयितुं मनः।

सखी – किमिदं चोरे तवेच्छा ?

कुमुदवल्ली – कामं पृच्छ। तस्य विवेकोऽस्ति वा ?

सखी – (चिन्तामभिनीय स्वगतम्) किं करोमि ? इयं तावत् तस्मान्न विरमति। चोरसहवासस्तावत् अतिदुस्तरः। (प्रकाशम्) तर्हि स तु कथमपि सन्मार्गगामी करणीयः। तत्तु श्रमसाध्यम्। तथापि यत्नः कार्यः।

कुमुदवल्ली – भवत्येव कथयतु कथं सन्मार्गप्रापणम् ?

सखी – (विचिन्त्य) एवमाचर। एकमासपर्यन्तं प्रतिदिनमपि द्विसहस्रसंख्याकभागवतानां षड्रसोपेतं भोजनं दातव्यम्। यः एवं करोति तस्य पाणिग्रहणं करोमि इति प्रतिज्ञां निवेदय।

कुमुदवल्ली – तथास्तु।

सखी – स्यान्नाम। स तु त्वयि अनुरक्तः किमु ?

कुमुदवल्ली – तं तु दृष्ट्वा एवमवैमि यत्तस्य चक्षूरागः मय्येव।

परकालः – सा तु सुन्दरी तावदनया सरण्या समागच्छेदपि। तदत्रैव प्रतिपालयामि। (तिष्ठति)

कुमुदवल्ली – (उपसृत्य सखीं प्रति) अस्तु नाम। तथैव निवेदयामि।

परकालः – (उपसृत्य अर्गलीभूय) ननु मानिनि–

चण्डातपे चंक्रमणाविरात्त–
श्रमाम्बुसिक्तारुणवक्त्रकान्तम्।

संवीजयामि श्रमनोदनाय
प्रसीद मय्यर्पय ते मनश्च॥ १५॥

कुमुदवल्ली – (स्वगतम्) भवत्प्रार्थनायाः प्रागेव त्वयि विनिहितं मनः। (प्रकाशम्) तर्हि मम प्रार्थनां यदि पूरयसि, करोमि ततः पाणिग्रहणम्।

परकालः – का प्रार्थना? निवेदय तावत्। तत् श्रमसाध्यमपि यतिष्ये।

कुमुदवल्ली – (सस्मितम्)एकमासपर्यन्तंप्रतिदिनमपिद्विसहस्रभागवतानां षड्रसोपेतं भोजनं दातव्यम्। तथा नो चेत् पाणिग्रहणवार्तापि न।

परकालः – (साञ्जलिबन्धम्) तथास्तु। (स्वगतम्) श्रमसाध्यं तत्कार्यम्। भवतु नाम। कथमपि निर्वर्तयामि।

(निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः॥

॥ अथ द्वितीयोऽङ्कः ॥

(ततः प्रविशति चिन्ताकुलः परकालः।)

परकालः – किं करोमि? शिष्यैरानीतोऽपि द्रविणभारः न पर्याप्तः।

पयोगामी – (प्रविश्य) श्वः करिष्यमाणस्य तदीयाराधनस्य कथमिति प्रष्टुमागतोऽहम्। (उपसृत्य) किमिदम्–

जित्वा वादेन विदुषः चतुष्कविशिखामणिः।
इति विख्यातकीर्तिस्सन् स्वामी चिन्ताकुलः कुतः॥१॥

परकालः – भोः पयोगामिन्, रिक्तहस्तोऽस्मि। श्वः कथं समाराधनम्?

पयोगामी – (विहस्य) चोलनृपतेः सेनापतिरपि किमेवं चिन्तयतीति महदिदमाश्चर्यम्।

परकालः – (सानन्दम्) साधु पयोगामिन्, सुसमये स्मारितोऽस्मि। राज्ञो देयं करद्रव्यं मयि वर्तते। तदुपयुज्य प्रवर्तय समाराधनम्।

पयोगामी – यथादिशति स्वामी। (निष्क्रान्तः)

परकालः – कुमुदवल्ली कस्य पुत्रीति ज्ञातव्यम्। आं संस्मृतम्। तयैवोक्तं कस्यचित् भिषग्वरस्य पुत्री पोषणेनेति। अहं तावत् सुमङ्गला नामाप्सरसः सम्भवा कपिलतपोधनशापात् मानुषी संवृत्तेति।

भागवताः – (प्रविश्य उदरं परामृशन्तः केचन) स्वामिन्–

शाकसूपघृततेमनोदनं
तिन्त्रिणीरसविशेषदानतः।
लाजकं विततपर्पटं तथा
पायसं च परिवेषितं गुणैः॥ २॥

केचन अन्ये– **संस्कृतोदनमनल्पतैलतः**
लड्डुपूरिमुखभक्ष्यमादरात्।
माहिषं दधि च पिच्छिलं तथा
व्यञ्जनं च परिवेषितं गुणैः॥ ३॥

परकालः – महान् प्रमोदः। धन्योऽभवं कृतकृत्योऽभवम्। (अञ्जलिं बध्नाति)

शिष्याः – (प्रविश्य) स्वामिन्, सर्वद्रव्यव्ययेन कृतं समाराधनम्। रिक्तं कोशागारम्।

परकालः – (विचिन्त्य) एवं तर्हि पथि प्रतिपालयामः। तत्र गतागतिकान् निरुध्य सर्वस्वमपहरामः।

(सर्वे तेन सह तथा कुर्वन्ति।)

परकालः – (नेपथ्यमवलोक्य)

यात्रोत्सवाय स्फुटवाद्यघोषे
मार्गेऽभियातौ नवदम्पती हि।
सर्वाङ्गभूषारुचिरावुभावप्य–
न्योन्यपाणिग्रहणाभिकान्तौ॥ ४॥

परकालः – (सहसार्गलीभूय) सर्वाभरणानि अवतार्य दत्तात् ।

दम्पती – **भीत्यैव तौ तां सहसावतार्य**
सर्वां विभूषां ददतुस्तदानीम्।

परकालः – (विलोक्य नीलश्चरणौ तयोश्च) देहि तत्।

दम्पती – दृढनिबद्धं तदङ्गुलीयम्। तदादातुं न शक्यते हि।

परकालः – तर्हि अहं यते। (दन्तैस्समुत्पाट्य समाससाद) हन्त! किमिदं चरणस्पर्शमात्रेण विद्युद्धत इव अन्यादृशस्संवृत्तोऽस्मि? (तत्क्षणमेव तौ दम्पती लक्ष्मीनारायणौ संवृत्तौ।)

परकालः – (सताण्डवम्) इदानीं ज्ञातवान्। नारायणेति नाम ज्ञातवान्। नारायणेति नाम। (साञ्जलिबन्धम्) देवदेव, किं ब्रवीमि तव कारुण्यम्?

सृष्टिस्थितिप्रलयकारणमम्बुजाक्षं
लक्ष्मीपतिं सकललोकसमर्चिताङ्घ्रिम्।
जानामि संप्रति महामहिमानमेनं
एतावताचरितदुष्कृतदुष्ट आसम्॥ ५॥

(सगद्गदबाष्पम्)–

नारायणाय भवसागरतारणाय
भक्तावनाभयविधानकृतादराय।
यद्वद्रिशृङ्गनिलयाय रमासखाय
श्रीपुण्डरीकनयनाय नमोऽस्तु तुभ्यम्॥ ६॥

(इति प्रणमति)

नारायणः – वत्स, उत्तिष्ठ। (इत्युत्थाप्य) वत्स, भवदनुग्रहार्थमेव एवमावां समागतौ। इतः परं मत्परमभक्तोऽसि। मदेकजीवितोऽसि।

परकालः – धन्योऽस्मि, कृतकृत्योऽस्मि। (पुनः प्रणमति। नारायणः श्रिया सह अन्तर्दधे।)

नागरीकश्यालौ (प्रविश्य परकालं दण्डेन चालयित्वा) उत्तिष्ठ रे।

शिष्याः – (सर्वाभरणान्यादाय निष्क्रान्ताः)

परकालः – (स्तम्भीभूय तिष्ठति)

श्यालौ – राज्ञा तावत् आज्ञप्तोऽसि। कारागारप्रवेशाय।

परकालः – किमर्थम् ? किं मयापराद्धम् ?

श्यालौ – करद्रव्यापहरणमेव अपराधः।

परकालः – तर्हि सिद्धोऽस्मि। (ताभ्यां गृहीतः परिक्रामति)

श्यालौ – इदमेव कारागारम्। (तम् अन्तर्नुदतः)

परकालः – (दीर्घं निःश्वस्य) सर्वं विधिविलसितम्–

पुरा रचितकर्मणां फलमिदं महादुःखदं
मयेदमनुभूयतेऽप्यमितशुद्धिसम्पत्कृते।
ज्वलज्ज्वलनपातितं कनकमप्यनल्पाविलं
यथा प्रकटयत्यदो निजगतं तु शुद्धिं स्वयम्॥ ८॥

देवदेव, कर्मणां फलं त्वनुभवेनैव अपोह्यं खलु। तदहमनुभवामि। त्वं तु निर्लिप्तः तिष्ठसि। प्रचलतु नाम भवल्लीला।

कुमुदवल्ली – (प्रविश्य) नाथ, इदमपि आत्मशुद्धीकरणाय। तदलं शोकेन।

परकालः – प्रिये, नाहं शोचामि। अपि त्वनुभवामि। भवितव्यं न केनापि निवार्यते।

कुमुदवल्ली – प्रत्यर्प्य राज्ञे द्रविणं कथञ्चित्
विमोच्य बन्धात्परकालमेनम्।
सम्पूरिता तेन मम प्रतिज्ञा
निर्वर्तनीयः परकालभावः॥ ९॥

श्यालौ – मुक्तोऽसि।

कुमुदवल्ली – किमिदं नाद्यापि आगतः। तदानयनाय सखी प्रेषिता। (नेपथ्याभिमुखमवलोक्य) इत एव आयाति।

परकालः – (सख्या सह प्रविश्य) प्रिये, सत्सहवासफलमनुभूतं मया।

कुमुदवल्ली – एतदर्थमेव भवता कारितमेतदखिलमपि।

कुन्तलिका– यथाप्रतिज्ञं प्रचलतु नाम पाणिग्रहणमहोत्सवः।
(उभयोः पाणितले वरणमालामर्पयति।)
(कुमुदवल्लीपरकालौ परस्परं मालामर्पयतः।)
(मङ्गलवादित्रघोषः)
(आकाशे)
भोः परकाल! विवाहकाले मह्यं किमपि दातव्यं खलु? तत् मन्दिरं प्राकारं च निर्माप्य देहि।

परकालः – (साञ्जलिबन्धम्) यथादिशति भगवान्। धन्यो भवेयम्।

कुमुदवल्ली – नाथ! भगवदाशयं निर्वर्तय।

परकालः – ननु कल्याणि! स एव निर्वर्तयति। कर्ता कारयिता भोक्ता खलु मदनुग्रहार्थं मन्मुखात् कारयति।

कुमुदवल्ली – महदिदमाश्चर्यं भवानेवं संवृत्त इति। ,किं ते भूयः प्रियमुपहरामि ?

परकालः – त्वत्सम्बन्धात् प्रबुद्धोऽहं गृहीतश्च त्वया करः।
आदिष्टो रङ्गनाथेन किमितोऽप्यस्ति मे प्रियम्॥ १०॥

तथापि इदमस्तु

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ ११॥

(निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

जगगूवकुलभूषणमहाकविकृतं
कौमुदीयं नाम नाटकं
सम्पूर्णम्।

दाशरथिदर्शनम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

भरतः

शत्रुघ्नः

वसिष्ठः

कौसल्या

सुमित्रा

कैकेयी

जनकः

आञ्जनेयः

रामः

सीता

द्वारपालः

दाशरथिदर्शनम्

॥ प्रथमोऽङ्कः ॥

ध्रुवस्य बालस्य तपः प्रभावात्
परात्परो वेदशिरोधिगम्यः।
यः प्रादुरासीत्तदनुग्रहार्थं
स पातु युष्मान्भगवान्मुकुन्दः॥ १॥

(ततः प्रविशति सूत्रधारः)

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि–

नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः॥ २॥

(नेपथ्ये) अपसरत अपसरत।

सूत्रधारः – किन्नु खलु मयि विज्ञापनैकताने शब्द इव ? (परिक्रम्य अवलोक्य च) आं ज्ञातम् –

सरयूशीतलसलिले
स्नात्वा तिमितात्तवल्कलो भक्त्या।
रामध्यानैकमनाः
प्रविशति भरतो निजोटजं कल्ये॥ ३॥

(निष्क्रान्तः)

स्थापना

(ततः प्रविशति यथानिर्दिष्टो भरतः)

भरतः – (उटजाभ्यन्तरं प्रविश्य, कनकमण्डपे दिव्यसिंहासन-प्रतिष्ठापितयोः पादुकयोः पुरतः बद्धाञ्जलिपुटो भूत्वा सबाष्पगद्गदम्)

विजयीभव राघवाब्जनेत्र!
प्रणतानामिह पारिजात! नाथ!।
विजयीभव तातवाक्यबद्ध!
प्रयतात्मन् जनकात्मजाभिसेव्य!॥ ४॥

(प्रणम्य उत्थाय सगद्गदम्) पापिना मया तावत् सम्यक् प्रकाशिता भ्रातुर्भ्रातृव्यता। धिङ्माम्–

कान्तारवर्त्मसु भवच्चरणौ निधातुं
हे राम! ये सुगमसाह्यपरे अभूताम्।
ते पादुके अपि बलाद्धृतवान् शठोऽहं
रक्षाविहीनचरणः पथि यासि वन्ये॥ ५॥

जगति भरतनामग्रहणमात्रेण वेपतेतरां जनताहृदयं समुद्विजते च। भ्रातृवत्सल रामचन्द्र! एवं व्यवसितुं मातुलकुलं प्रेषितवान् किमु मां तातः ?

शत्रुघ्नः – (पूजापरिकरपाणिः प्रविश्य) आर्य! सज्जीकृतं सर्वमपि। (परिकरभाजनं पीठे निक्षिपति।)

भरतः – वत्स! अद्य खलु श्रीरामचन्द्रागमनम्।

शत्रुघ्नः – अथ किम्।

भरतः – सर्वथा अलङ्करणीयोऽयं नन्दिग्रामः। एवं प्रकाशय कारुभ्यः।

शत्रुघ्नः – तथा। (निष्क्रान्तः)

वसिष्ठः – (प्रविश्य सानुतापम्)

सरयूसलिले जडेऽवगाह्य
प्रयतात्मोषसि बद्धवल्कलोऽयम्।
अविमृष्टजटः प्रलम्बकूर्चो
न विजानात्यतिशीतवातबाधाम्॥ ६॥

अथवा श्रीरामचन्द्रविरहानलसन्तप्ततनुतया सुखावगाह्यमेव स्यात् सरयूसलिलम्। (नेपथ्ये)

कौसल्यातनयाभिराम करुणामूर्ते जगद्वन्दित
प्रातः प्रादुरभूद्भवत्कुलगुरुः प्राच्यामुदेत्यर्यमा।
डीयन्ते पतगास्सनादमभितो मन्दं मरुद्वाति च
प्रोत्फुल्लाम्बुजगन्धभाक्तदधुनोत्तिष्ठ प्रभो राघव॥ ७॥

भरतः – (आकर्ण्य सबाष्पगद्गदम्) प्रभो राघव! अत्र वन्दिनः पठन्ति सुप्रभातं ते। तत्र महारण्ये तावत्–

शर्कराविलतले प्रसुप्तिभाक्
शीतवातपरिबाधितः प्रभो।
पक्षिरावपरिबोधितोऽसि हा
किं स्मरस्यपि शठं तदा तु माम्॥ ८॥

हन्त किमिदमेवं चिन्तितम्! न कदाप्येवम्। अस्ति खलु सर्वदा सन्निहितस्सर्वविधबन्धुस्सुकृती सौमित्रिः–

किसलयमपचित्य नूत्नतल्पं
मृदुलतरं परिकल्प्य भक्तिनम्रः।
तदुपरि स तु शाययत्ससीतं
रघुवरमेति मुदं परां रजन्याम्॥ ९॥

हुं तद्राज्यापहर्तुः कुतो मे तादृशं भाग्यम्–

स तु सुप्रभातमवनम्रमस्तको
रचिताञ्जलिः परिपठेच्च सुस्वरम्।
विकचारुणाब्जनयनः प्रभुस्तदा
विनिपातयेच्च दृशमाशु लक्ष्मणे॥ १०॥

धन्यः खलु सौमित्रिः। सुमित्रैव सुप्रजा खलु।

वसिष्ठः – (उपसृत्य) वत्स कैकेय्यपि सुप्रजा। यतः–

तरुदलपुटकोटिप्रस्नुतेयं हिमानी
तुदति खलु शरीरं हन्त सूचीव तीक्ष्णा।
व्रतमिह चरसि त्वं रामसंप्राप्तिकामो
ननु तव जननी त्वामीदृशं पुत्रमाप॥ ११॥

भरतः – (कर्णौ पिधाय) शान्तं पापं शान्तं पापम्। आचार्यवर्य! मा निपातय मच्छ्रवसि पुनरपीदृशं वचः। कथं वा सुप्रजा भवेन्मज्जननी?

यदर्थं मत्तातो निरतिशयदुःखेन विवशो
बहिः प्राणान्रामं तृणमिव बहिष्कृत्य विनतम्।
ततोऽन्तः प्राणानप्यहह स मुमोचातिविरहात्
कथं सा मन्माता जगति महिता हन्त भविता॥

वसिष्ठः – तात पुत्रस्नेहस्य कार्यमिदम्।

भरतः – किमु न पुत्रः सर्वगुणाकरो रामः?

वसिष्ठः – औदर्यः खलु भवान्।

भरतः – आचार्यवर्य! किमर्थमहं कैकेयीगर्भाज्जनिमानभवं यत्कृते श्रीरामस्येतादृशी दशा। हन्त कैकेयीगर्भ–निर्भाग्यता।

द्वारपालः – (प्रविश्य) नाथ! अम्बास्संप्राप्ताः।

भरतः – कथमम्बाः? मध्यमाम्बावर्जं प्रवेशय।

द्वारपालः – तथा। (गन्तुमुद्युंक्ते।)

वसिष्ठः – तिष्ठ तावत्। (भरतमवलोक्य) एवं न ब्रूयात्। प्रवेशय तावत्तामपि।

भरतः – न पारयामि द्रष्टुम्।

वसिष्ठः – **मैवं भावय वत्सात्र चिन्त्यतां शान्तचेतसा।**
यत्प्रतीक्ष्यैः कृतं तत्तु शुभोदर्काय कल्पते॥ १३॥

भरतः – तर्हि प्रवेशय तामपि।

द्वारपालः – तथा। (निष्क्रान्तः)

(ततः प्रविशन्ति कौसल्याकैकेयीसुमित्राः)

कौसल्या – वत्स! रामप्रत्यागमनदिवसः खल्वद्य।

भरतः – अथ किम्। अम्ब! रामराज्यापहर्ता भरतः प्रणमति। (प्रणमति)

कौसल्या – वत्स! मैवं वादीः।

प्रत्यागमिष्यति रघुप्रवरोऽद्य रामः
पट्टाभिषेकमकुटाञ्चितमस्तकस्सन्।
आनन्दयिष्यति भवन्तममूः प्रजाश्च
राहुप्रमुक्तविधुवद्गलितान्तरायः॥ १४॥

तदलं क्लेशेन।

भरतः – (सबाष्पगद्गदम्) कुतो वा क्लेशः? चलितं तु चलितमेव। अम्ब! लक्ष्मणमातः! सर्वविधकैङ्कर्यकृते रामाय समर्पितलक्ष्मणा धन्यासि। अधन्यो भरतः प्रणमति। (प्रणमति)

सुमित्रा – न कदाप्येवम्–

राज्यं त्वधीनं प्रविहाय वत्स!
जटाशिराः प्रावृतवल्कलश्च।
श्रीपादुकोपासनतत्परस्त्वं
तपश्चरन् लक्ष्मणतोऽपि धन्यः॥ १५॥

तदलं चिन्तया।

भरतः – (सौदास्यस्मितम्) अम्ब! चिन्तेति विडम्बनम्।

वसिष्ठः – किन्नु खल्विदम्। प्रणम तावद्भवज्जननीम्।

भरतः – (सबाष्पम्) प्रणमामि प्रणमामि। अम्ब! भरतमातः, ज्येष्ठभ्रातृराज्यापहर्ता पापीयान् भरतः प्रणमति। (प्रणमति)

वसिष्ठः – वत्स! मा पातय क्षते क्षारम्।

श्रीरामपट्टस्नपनेऽतिहृष्टा
कुब्जावचोलोभितमानसेयम्।
एवं व्यतानीत्तदनु स्वकृत्ये
सदानुतापाग्निपुटोच्चचित्ता॥ १६॥

तत्पुनरपि मैवं वादीः।

भरतः – (साञ्जलिबन्धम्) यथादिशति भगवान्।

कैकेयी – (सबाष्पम्) वत्स! मुधा मां निन्दसि। किं कथयेयं ते हृदयपरिपाकम्–

व्रतवह्निविशुद्धचित्तहेम–
प्रथितां भूषणतां व्रजेत्प्रकामम्।
रघुपुङ्गवपादपद्मयुग्मे
यदहं कारणमासमीदृशस्य॥ १७॥

वसिष्ठः – साधूक्तमनया। वत्स भरत शृणु तावत्।
मात्रा वनं रघूत्तंसं प्रहिण्वत्यायमाहितः।
पारतन्त्र्यस्य काष्ठां ते वीक्षितुं निकषोपलः॥ १८॥

शत्रुघ्नः – (प्रविश्य) आर्य समलङ्कृतो नन्दिग्रामः।
किसलयकुसुमोच्चतोरणाढ्यः
ततसमुदञ्चितकेतनालिकान्तः।
विरचितजलसेचनार्द्रमार्गो
विलसति धूपवितानितोर्ध्वधूमः॥ १९॥

भरतः – अप्यवलोकितो धाराग्निः ?
शत्रुघ्नः – अथ किम्। प्रज्वलति।
भरतः – इतोऽपि सन्धुक्षयेन्धनार्पणेन।
शत्रुघ्नः – तथा। (निष्क्रान्तः)
(सर्वे सावेगं परस्परं मुखमवलोकयन्ति)
कौसल्या – (कैकेयीमवलोक्य जनान्तिकम्) का गतिः ? (नेपथ्ये)
नभोमध्यं प्राप्तो रविरपि किरत्यातपकणान्
विहङ्गा वृक्षान्तर्दलपटलगूढामितरवाः।
द्रुतं याता मीना विमलसरसां शीतलतलं
समीरस्सन्तापादिव चरति नैव क्वचिदपि॥ २०॥

वसिष्ठः – (आकर्ण्य) मध्यन्दिनमपि समुपनतम्। अपि गच्छामो
माध्यन्दिनकर्मणे ?
भरतः – यथादिशति भगवान्।
(निष्क्रान्तास्सर्वे)

॥ इति प्रथमोऽङ्कः॥

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति जनकः)

जनकः – अद्य रामप्रत्यागमनम्। हन्त विधिविलसितम्! स तु रामः–

चीरचेलपरिधानतृप्तिभाक्
त्यक्तराज्यविभवो जटी वने।
सीतया सह चरन्सलक्ष्मणो
भाग्यतः पुरगतो भविष्यति॥ १॥

दिष्ट्या पश्यामि। स्यादेतत्–

चतुर्दशसमा रामश्चक्रवर्तितनूभवः।
कथं काननसञ्चारी बभूव क्लेशभाजनम्॥ २॥

महदिदमाश्चर्यं क्लेशकरं च। हुं, सीतां प्रति न किञ्चिदपि चिन्तयामि। पातिव्रत्यमनुपालयन्त्या सहधर्मिण्या भर्तुरुपनतं सुखं वा दुःखं वा सर्वमप्यनुभोक्तव्यं खलु। तदलं तदनुशोचनेन। एवमेव खलु जगति–

बाल्ये स्त्र्यपत्यमनपायलवं विलोक्य
तल्लालनेन पितरौ परिपोषयन्तौ।
मुग्धां विधाय पुरुषाय धनैः प्रदत्तो
यावच्च तावदनयोस्तनयाधिकारः॥ ३॥

(परितो विलोक्य) हन्त, समलङ्कृतो भरतभक्तिं प्रकाशयति नन्दिग्रामः।

रामस्समेष्यति सदार इति प्रहृष्येत्
ग्रामं च पत्तनसमं परिकल्प्य भक्त्या।
नानापरिष्करणरम्यतरं सुमृष्ट–
मार्गं प्रजापरिवृतो भरतो व्रती सन्॥ ४॥

(परिक्रम्य, नेपथ्याभिमुखमवलोक्य) हन्त, भरतस्तु–

जटी चीरी व्रती धारावह्निपार्श्वे कृताञ्जलिः।
रामागमनदिग्भागे दत्तदृष्टिश्च तिष्ठति॥ ५॥

यदि विलम्बेत रामः तदत्याहितं भवेत्।
(ततः प्रविशति यथानिर्दिष्टः सानुजः सामात्यपुरोहितो भरतः।)

भरतः – (धाराग्निं दृष्ट्वा)

रामोऽपि पावनो लोके भवानपि तथानल।
तद्दर्शनाय पापोऽहं प्रार्थये त्वां कृताञ्जलिः॥ ६॥

जनकः – (उपसृत्य)

भरत ते रघुपुङ्गवपादयोः
दृढतरा ननु भक्तिरकल्मषा।
वितनुते मम विस्मयमप्यहो
जगति दुर्लभ एव भवादृशः॥ ७॥

भरतः – किमिदमेवमभिधीयते? केवलं विडम्बनमिदम्।

पितृसममहमारादग्रजन्मानमार्यं
विपिनमतिकठोरं प्रेष्य राज्यातिलोभात्।
रघुवरवरभक्तोऽस्मीति लोकाय पापो
नट इव कटुचित्तो दर्शयाम्यत्र वेषी॥ ८॥

एतादृशो भरतः प्रणमति। (प्रणमति)

जनकः – इष्टसिद्धिरस्तु। वत्स भरत! नैवं वक्तव्यम्।

स्वायत्तं राज्यमुत्सृज्य वनवासीव सन्ततम्।
आचरंस्त्वं व्रतं धन्यो ह्यसिधाराव्रतोपमम्॥ ९॥

शत्रुघ्नः – आर्य!

प्रतीचीमाशामप्युपसरति भास्वानरुणयन्
करैर्लाक्षारागैरिव मृदुतरैस्सान्द्रमसृणैः।
क्रमाद्वृक्षच्छाया प्रसरति शनैः पूर्वककुभं
समन्तात्सन्तापः प्रशममुपयाति द्युमणिजः॥ १०॥

भरतः – हन्त, नाद्यापि प्रत्यागतो रामचन्द्रः। अन्धकारप्रायं जगत्। (साञ्जलिबन्धमग्निं प्रदक्षिणीकृत्य)

आश्रयाश! आश्रये त्वान्तु दुरात्मा साधु साम्प्रतम्।
अशान मां भवन्नाम सम्यक् सार्थय पावयन्॥ ११॥

वसिष्ठः – मैवमाचर, किञ्चिदनुपालयामः। रामो द्विर्नाभिभाषते, भक्तवत्सलो हि।

भरतः – (सबाष्पगद्गदम्) आचार्यवर्य! अलमनुपालनेन। नेच्छामि जीवितुं भ्रातृभ्रातृव्योऽहम्। (बाहुमुद्यम्योच्चैः)

सन्तुष्टा भव कैकेयि! चण्डि यामि हुताशनम्।
रामराज्यं भवत्येव स्वीकृत्य भवतु प्रभुः॥ १२॥

आचार्यवर्य! पापीयसो भरतस्यान्तिमं प्रणाममङ्गीकृत्य अनुगृहाण मामेनम्। (प्रणमति)

(गगने)

हे राम राघव सलक्ष्मण दीर्घबाहो
पौलस्त्यकण्ठपरिकृन्तनलब्धकीर्ते।
वैश्वानराहुतिपरीक्षितशुद्धिसीता–
संसेवितानवरतं विजयीभवाप्तैः॥ १३॥

(सर्वे सवैलक्ष्यमूर्ध्वं पश्यन्ति।)

भरतः – (सहसोत्थाय ऊर्ध्वमवलोक्य सोन्मादम्)

कोऽयं महान् श्रवणयोर्मम वर्षतीह
श्रीरामनाममधुरामृतवर्षधाराः।
वाणी त्वियं बत! हठादशरीरिणीति
नैवाद्य वेद्मयपि तु केनचिदीरितेयम्॥ १४॥

(पुनश्च गगने)

आगतो विबुधसेवितो रमा–
वल्लभो रघुवरस्सलक्ष्मणः।
पुष्पकेन कपिबृन्दवन्दितो
राक्षसेश्वरविभीषणार्चितः॥ १५॥

आञ्जनेयः – (गगनादवतीर्य साञ्जलिबन्धम्) किमु भवानेव भरतः ?

भरतः – अथ किम्? श्रीरामराज्यापहर्ता भरतोऽस्मि। को भवान्? हर्षामृताभिवर्षी जीमूत इव सन्निहितः।

आञ्जनेयः – दासोऽहं रघुपुङ्गवस्य मरुतः पुत्रोऽञ्जनासम्भवः।

भरतः – तद्दास्यं भवता कथं नु कपिना सम्पादितम्?

आञ्जनेयः – कानने। सीतान्वेषणतत्पराय रुदते साह्यैकतानेन मे।

भरतः – याता सा क नु?

आञ्जनेयः – रावणेन कटुना नीता।

भरतः – (सावेगम्) क तौ?

आञ्जनेयः – वञ्चितौ मारीचेन सुदूरगौ।

भरतः – अलमितः श्रोतुं न शक्तोऽस्म्यहम्। हन्त भरतभ्रातः भरतकृते किं किं वा नानुभूतं क्लेशजातमार्येण–

राज्यभ्रंशः कापथे पादचारः
रक्षः पक्षध्वंसनं वञ्चनाप्तिः।
भार्याचौर्यं रावणायोधनं च– हुं स्यादेतत्?
क्रोधात्सीतावह्निपातः किमेतत्॥ १७॥

आञ्जनेयः – स्यादेतत् प्रथममभिवन्दनीया भवज्जननी।

भरतः – कोऽयं स्तुतिनिन्दाप्रकारः?

आञ्जनेयः – न तथा। सा तु यदि न प्रैषिष्यत् महारण्यं प्रति श्रीरामचन्द्रं तदा नाभविष्यदस्माकं तच्चरणारविन्द सेवासौभाग्यम्।

भरतः – धन्याः खलु भवन्तः। केदानीमार्यरामचन्द्रः?

आञ्जनेयः – नन्दिग्रामसीमाभूमौ भवन्तमनुपालयति।

भरतः – कथं मामनुपालयति? नेदमुचितम्। अयं दासः प्रस्थितः। कः कोऽत्र भोः?

चतुरङ्गबलं रघुवंशमणे–
रुचिरात्परितो व्रजतु प्रसृतम्।
ननु पौरजनोऽपि धृताभरणो
लभतां तदवेक्षणजं प्रमदम्॥ १८॥

वत्स! श्वेतच्छत्रम्।

शत्रुघ्नः – सज्जमिह।

भरतः – (पादुकायुगलं प्रणम्य आदाय शिरसि निधाय) तात! मारुते, अपि नाम प्रत्युद्गच्छामः?

(नेपथ्ये – वादित्रघोषः विजयतां श्रीरामचन्द्रः।)

आञ्जनेयः – (सबाष्पाञ्जलिबन्धम्)

धन्यस्स एवेदृशसोदरास्या
श्रीरामचन्द्रो भुवनैकचन्द्रः।
धन्योऽहमप्यत्र यदीदृशं च
दिव्योत्सवं हन्त! विलोकयामि॥ १९॥

भरतः – (वसिष्ठजनकौ विलोक्य)

दासोऽयं भरतो रामपादुकायुगलं पुनः।
समर्प्य तत्पदाम्भोजे लभेय कृतकृत्यताम्॥ २०॥

वसिष्ठः – साधूक्तम्।

जनकः – धन्यो भवान्।

शत्रुघ्नः – समलङ्कृता सज्जा शिबिका।

भरतः – (परिक्रम्य शिबिकायां पादुकायुगलं प्रतिष्ठाप्य) वत्स! पीताम्बरमानय। आयान्तु नाम रथेन मातरः।

शत्रुघ्नः – (आनीय) इदमानीतम्। (दत्त्वा) रथेन गन्तुं सज्जा मातरः।

भरतः – (पादुकायुगलमलङ्करोति समलङ्कृतो गजराजः प्रविश्य करेण पुष्पमालामर्पयति। भटाः शिबिकां स्कन्धतलम् आरोप्य परिक्रामन्ति। भरतः श्वेतच्छत्रं तदुपरि बिभर्ति। शत्रुघ्नाञ्जनेयौ तदुभयपार्श्वयोश्चामरे बिभ्रतः। वसिष्ठ जन- कादयोऽग्रतो गच्छन्ति। तदग्रतो वादित्रघोषः।)

भरताञ्जनेयौ **विजयमवाप्नुहि सूर्यकुलोद्भव**
नतजनतार्तिहराद्भुतवैभव।
जनकसुताकरपल्लवलालित
प्रणतलक्ष्मणसेवितपादविभो॥ २१॥

(इत्युच्चैः पठतः। सर्वे मन्दं परिक्रामन्ति।)

भरतः – (नेपथ्याभिमुखमवलोक्य) हन्त! आर्य रामचन्द्र, किंन्विदम्,

हे स्वामिन् जटिलजटापिनद्धमूर्धा
क्लिष्टाङ्गस्तपनखरातपातिचारात्।
मालिन्यं वपुषि जगद्विनिन्द्यमेतत्
स्यादेवं किमु शुभविग्रहे तवार्य॥ २२॥

हन्त द्रष्टुं न पारयामि। (छत्रं निपात्य मूर्छितः पतति।)

आञ्जनेयः – (सबाष्पगद्गदम्) तात भरत! श्लाघनीयोऽसि एतादृश्या भ्रातृभक्त्या। (इति वीजयति)

भरतः – (लब्धसंज्ञः सन् मन्दमुपविश्य सबाष्पम्)

पीताम्बरोचितममूल्यविभूषणैक-
योग्यं सुगन्धिनवचन्दनलेपनार्हम्।

अत्यन्तकोमलसुतल्पतले निवेश्यं
पश्यामि विग्रहमहो तव संप्रतीत्थम्।। २३।।

भरतमन्तरा नहि जगति तावदीदृशः पापीयान्।

आञ्जनेयः – (सबाष्पम्) उत्तिष्ठ भवन्तमनुपालयति रामचन्द्रः। (उत्थापयति) (सर्वे सबाष्पगद्गदं पश्यन्ति। भरतः गृहीतच्छत्रः सर्वैः परिक्रामति।)

(ततः प्रविशति पुष्पकविमाने भद्रासनोपविष्टः सीताङ्को रामः।)

रामः – (भरतमवलोक्य सबाष्पगद्गदम्) प्रिये जानकि! अपि नाम पश्यसि वत्सं भरतम्–

मत्पार्श्वे त्वमसि प्रिया मदनुजः श्रीलक्ष्मणः किङ्करः
कोऽयं मे वनवास इत्यपि वचो लोके तु हास्यास्पदम्।
मद्भ्राता भरतोऽयमत्र निवसन्मत्तोऽपि कष्टव्रतः
क्लिश्यन्मत्कृत एव दुष्करतपःशीर्णोऽस्ति पश्याग्रतः।।

सीता – न पारयामि वत्सं भरतमीदृशं द्रष्टुम्। (बाष्पमुत्सृजति)

भरतः – (छत्रं शत्रुघ्नसात्कृत्य बद्धाञ्जलिपुटो मन्दमुपसर्पति।)

रामः – (सीतां विहाय सहसोत्थाय विमानादवरुह्य सत्वरमुपसृत्य बाहुभ्यां भरतं दृढतरमालिङ्गति।)

उभौ – (मौनमवलम्ब्य परस्परं सबाष्पं मुखमवलोकमानौ गद्गदितकण्ठौ तिष्ठतः। तत्रत्यास्सर्वेऽपि समौनं बाष्पगद्गदस्फुरिताधराः तिष्ठन्ति।)

रामः – (गद्गदस्फुटिताक्षरम्) वत्स... वत्स... भरत ईदृशावस्थं भवन्तं किमु पृच्छेयम् अपि कुशलमिति।

जिह्वा परावर्तते वत्स। जिह्वा परावर्तते। (भरतमस्तकं परामृशति।)

भरतः – आर्य! मुञ्चतु भवान् प्रथमं माम्। भवच्चरणसरसिजयोः मूर्धानममुं निधाय पूतः भवेयम्।

रामः – वत्स, अननुभूतपूर्वहर्षप्रकर्षं कथमिदं मुञ्चेयमालिङ्गनम्। तात भरत, किं कथयेयं नाधिरोहति मे हृत्पथम्। भवत्प्रत्यभिज्ञैव–

शिरीषसुमकोमलं स्थपुटमांसलं मञ्जुलं
नवोज्ज्वलकनद्रुचिप्रसृतकान्तलावण्यकम्।
शरीरमिदमद्य ते नहि दृशानया वीक्षितुं
सकीकसमहं कथं कथय वत्स शक्तो नु हा॥

(तच्छरीरं परामृशन् बाष्पमुत्सृजति।)

भरतः – (सगद्गदम्) आर्य कथं कथयेयं भवद्याम्? प्रभो! एतद्भरतसत्तापालनार्थं कियता कृच्छ्रेण सत्वरमायातम् आर्येण? कथमिव कथयेयं भ्रातृवात्सल्यं प्रभो रामचन्द्र–

मयि न्यस्तं भुवो भारं संक्राम्य त्वयि सांप्रतम्।
पारतन्त्र्यंस्य काष्ठां तामूढ्वा स्यां सुकृती कृती॥ २६॥

(शिबिकातः पादुकायुगलमादाय रामचरणयोः समर्प्य सीतां प्रणमति।)

सीता – वत्स चिरञ्जीव। भ्रातृभक्तिस्ते कण्टकितमातनोति मे गात्रम्। (रामः सीतया सह वसिष्ठजनकौ प्रणमति।)

वसिष्ठः – दिष्ट्या विजयी प्रतिनिवृत्तोऽसि। पट्टाभिषिक्तो भव।

जनकः – उत्तीर्णवनवासक्लेशपारावारोऽसि। दिष्ट्या पश्यामि सादरं भवन्तम्।

रामः – सर्वं तत्रभवतामनुग्रहात्। (सीतया सह जननीः प्रणमति।)

कौसल्या – (सबाष्पम्) वत्स! मत्कृते तावदनुभूतो महान् क्लेशः। इतःपरं राज्यसौख्यमनुभुंक्ष्व।

रामः – (सस्मितम्) अम्ब! भरतक्लेशे तावन्न मे क्लेशलेशोऽपि।

सुमित्रा – वत्स राम! प्रमादाद्वत्सेन लक्ष्मणेन न प्रदर्शिता किमु कैङ्कर्ये निरुत्साहिता।

रामः – (सबाष्पम्) अम्ब! किं कथयेयं कथमनृणी भवेयम्? अयमेव मे पिता नानुजः।

सुमित्रा – दिष्ट्या धन्यास्मि।

वसिष्ठः – राम परस्परं दाशरथ्योर्दर्शनेन सन्तुष्टा वयम्। तद्याहि पट्टाभिषेकमहोत्सवाय।

रामः – यथादिशति भगवान्।

वसिष्ठः – वत्स भरत! आसीद् दाशरथिदर्शनम्। किं ते भूयः प्रियमुपहरामि?

भरतः – आचार्यवर्य–

रामोऽपि नगरीमेत्य भविष्यत्यभिषेचितः।
पारतन्त्र्यं तु मे सिद्धं किमितोऽप्यस्ति मे प्रियम्॥

तथापीदमस्तु

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ २७॥

(निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
दाशरथिदर्शनं नाम नाटकं
सम्पूर्णम्।

वीरसौभद्रम्

भूमिकाः

(प्रवेशानुक्रमेण)

सुभद्रा
सूत्रधारः
सव्यसाची
ब्राह्मणाः
युधिष्ठिरः
वासुदेवः
भटः
भीमः
द्रौपदी
मन्दारिका
लवङ्गिका
अभिमन्युः
कञ्चुकी
उत्तरा
मदलेखा
प्रतीहारी

वीरसौभद्रम्

॥ प्रथमोऽङ्कः ॥

यः कालयवनाद्भीतश्शक्तोऽप्याधाव्य वञ्चकः।
मुनिनाघातयच्छत्रुं सोऽव्याद्वो मधुसूदनः॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः – (सप्रमोदं) एवमार्यमिश्रान्विज्ञापयामि–

नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः॥ २ ॥

(नेपथ्ये)

(विजयीभव सव्यसाचिन् विजयीभव)

सूत्रधारः – (आकर्ण्य) अये मयि विज्ञापनैकताने शब्द इव। (परिक्रम्य) आं ज्ञातं सङ्ग्रामोन्मुखं सव्यसाचिनं प्रति ब्राह्मणानामाशीर्वचनम्। (निष्क्रान्तः)

(स्थापना)

(ततः प्रविशति ब्राह्मणैस्सह विनयनम्रमौलिस्सव्यसाची)

सव्यसाची– ब्राह्मणानां यदाशीर्वाग्बलं तद्बलमेव मे।
यस्मात्सर्वजगन्नेता तदधीनश्चतुर्भुजः॥ ३ ॥

भासकृतदूतघटोत्कचस्य पूर्वभागः।

ब्राह्मणाः – कस्सन्देहः? अपि नाम साधयामः।

सव्यसाची – अनुगृहीतोऽस्मि।

ब्राह्मणाः – प्रयातु भवान्सङ्ग्रामाभिमुखो मुहूर्तेऽस्मिन्।

(निष्क्रान्ताः)

सव्यसाची – आर्यमभिवाद्य यास्यामि तावत्। (परिक्रम्यावलोक्य च)

आर्योऽयं परबलचिन्तनैकतानो
मय्यस्मिन्विहितजयो जयाभिकांक्षी।
भीमस्याप्यमितबलं विचिन्तयन्सन्-
औद्धत्यं प्रति सततं विशङ्कते हि॥ ४॥

(उपसर्पति)

(ततः प्रविशति निजपटगृहोपविष्टो युधिष्ठिरः)

युधिष्ठिरः – कथं, वत्सोर्जुनस्सङ्ग्रामाय प्रस्थित इव।

सव्यसाची – आर्य, गाण्डीवी प्रणमति। (इति प्रणमति)

युधिष्ठिरः – वत्स, प्रतिदिनमिव विजयी प्रतिनिवर्तस्व।

सव्यसाची – अनुगृहीतोऽस्मि।

युधिष्ठिरः – वत्स, अद्य कस्ते शरव्यम्।

सव्यसाची – संशप्तकाः।

युधिष्ठिरः – कथं, संशप्तकाः। वत्स, श्रुतं हि ते तु जीवितसंशयेऽपि सङ्ग्रामादनिवर्तिन इति, किञ्च –

असंख्यातास्समुद्रान्ते कल्लोला इव संयुगे।
हतावशिष्टा दृप्तास्ते संपततीत्यपि श्रुतम्॥

सव्यसाची – (सविनयं) सत्यार्यानुग्रहे किं तैः?

वासुदेवः – (प्रविश्य कशापाणिः) सखे, त्वर्यताम्।

युधिष्ठिरः – (सविनयमुत्थाय) वासुदेव, भवदीयोऽयम्।

वासुदेवः – (समन्दस्मितं) न केवलमयं, पञ्चापि पाण्डवा मदीयाः।

युधिष्ठिरः – तत्तु सत्यम्। अद्य सङ्ग्रामाङ्गणे तावदप्रमत्तेन भवता सञ्चारणीयोऽयं वत्स इत्यत उक्तम्।

वासुदेवः – (सस्मितं) गाण्डीवी खलु ते वत्सः। किं मया...?

युधिष्ठिरः – वासुदेव, न तथा। (असंख्याता.... इति पूर्वोक्तमेव पठित्वा) तत्सावधानं पश्यतु भवान्।

वासुदेवः – अलं शङ्कया। भवदनुग्रह एवाभिरक्षत्येनम्। (इत्यर्जुनेन सह निष्कान्तः।)

युधिष्ठिरः – (दीर्घं निःश्वस्य) धिगेनं क्षात्रं धर्मम्।

क्षात्रेण यद्यपि बलेन जयो नृपाणां
सन्दिग्ध एव समरे बहुदोषघोरे।
शान्ते पथि प्रचलतां द्विजपुङ्गवानां
नैवेदृगापतति संशयलेशमात्रम्॥ ६॥

तथाप्यनुष्ठेयमिदानीं संवृत्तम्।

(ससम्भ्रमं पटाक्षेपेण प्रविश्य)

भटः – देव ! बद्धः।

युधिष्ठिरः – (सावेगम्) कः ?

भटः – भीमः।

युधिष्ठिरः – केन ?

भटः – आचार्यद्रोणेन।

युधिष्ठिरः – कथं वत्सो बद्धः ?

भटः – नहि नहि भीमः। पद्मव्यूहो बद्धः।

युधिष्ठिरः – क्व वत्सो भीमः ?
भटः – तद्भेदने यत्नवान् वर्तते।
भटः – क्व वत्सौ नकुलसहदेवौ ?
भटः – तत्साह्याय प्रस्थितौ।
अन्यः भटः – (प्रविश्य) देव, विसंज्ञः कुमारवृकोदरः कुमाराभ्यां नकुलसहदेवाभ्यां प्रापितो निजपटमन्दिरम्।
युधिष्ठिरः – कथं विसंज्ञः वृकोदरः ? केन प्रहृतः ?
भटः – व्यूहद्वारपालकेन सैन्धवेन।
युधिष्ठिरः – किन्नु खलु भीमगदापि तृणीकृता तेन ?
भटः – देव, गदया न प्रवर्तितमायोधनम्।
युधिष्ठिरः – तर्हि कथम् ?
भटः – रथाधिरूढेन धनुर्धरेण
वृकोदरेणाशुगवर्षिणा द्राक्।
सन्ताडितस्सिन्धुपतिस्सरोषं
रुरोध तं चित्रसमीकदक्षः॥ ७॥

युधिष्ठिरः – हन्त प्रमादः। ततः ?
भटः – शृणोतु देवः –
भुजबलमुपयुज्य भीमसेनः
परबलमर्दननिर्दयोऽत्यमर्षी।
प्रलयपरिणटत्कृतान्तकल्पः
चिरमतनोद्रिपुमात्तविस्मयं तम्॥ ८॥

युधिष्ठिरः – हन्त भोः। तादृशोऽपि मोहमुपगतः।
भटः – अथकिम्। किञ्च किंवदन्ती–

युधिष्ठिरः – किमिति ?

भटः – सुयोधनाग्रे प्रतिज्ञातमाचार्यद्रोणेन विपक्षपक्षे तावदस्मिन् अहनि एकस्य महावीरपुरुषस्य निषूदनमिति।

युधिष्ठिरः – (सोद्वेगम्) हन्त महदिदं कष्टम्। पश्यामस्तावत् वृकोदरम्। (परिक्रामति)

(ततः प्रविशति निजपटगृहे पर्यङ्के शयानः पाञ्चाल्योपचर्यमाणो भीमः)

भीमः – आः किं व्यवसितं वत्साभ्याम् ? क्षत्रियगर्हितं किलैतत्।

द्रौपदी – अज्जउत्त ! अळम् अमरिसेण। सुट्ठु किदम् अज्जउत्तेहिम्। (आर्यपुत्र अलममर्षेण। सुष्ठु कृतमार्यपुत्राभ्याम्।)

युधिष्ठिरः – (उपसृत्य) वत्स कथं वर्तसे ?

भीमः – (स्वगतम्) कथम्? आर्यकर्णपथमपि प्रविष्टः एवायमुदन्तः। (मन्दमुत्थाय) आर्य, न किमपि।

द्रौपदी – अज्जउत्त ! एसो गाढप्पहारजझरिअसरीरो अज्जउत्तो। (आर्यपुत्र, एष गाढप्रहारजर्झरितशरीर आर्यपुत्रः।)

युधिष्ठिरः – वत्स शेष्व।

भीमः – हुम्। भवतु भवतु तं नराधमं शाययित्वा। किं कुर्मः ? न खलु समीहितमाचरितं वत्साभ्याम्।

गदाभिघातेन विघूर्णिताक्षं
जयद्रथं तं विनिपात्य युद्धे।
उत्पाटयेयं करटीव पद्म-
व्यूहं सलीलं किमिहाद्य कुर्मः॥ ९॥

युधिष्ठिरः – वत्स, समीहितमेवाचरितं वत्साभ्याम्। न नेतव्यः खलु ईदृशावस्थो भवानाततायिनम्। केदानीं वत्सौ नकुलसहदेवौ ?

भीमः – न जाने।

द्रौपदी – मह भादुणो साहिअकिदे गदाओ। (मम भ्रातुः साह्यकृते गतौ।)

युधिष्ठिरः – कथं पुनरपि युद्धाङ्गणं प्रविष्टौ ?

भीमः – (सामर्षं निःश्वसन्)

सफलीकरोमि खलु मे मनोरथं
गदया विदार्य समरे जयद्रथम्।
अधुना तदानयतु सारथिमृथ–
प्रथितं पृथुध्वजभयानकं रथम्॥ १०॥

(इत्युद्धतमुत्तिष्ठति।)

सारथिः – (प्रविश्य) सज्जो रथः।

भीमः – आर्य, अभिवादये।

युधिष्ठिरः – वत्स, न साम्प्रतं साम्परायिकमिदानीम्।

भीमः – आर्य, किन्नु खलु न साम्प्रतमिति। हुम्–

प्राणायामपरो निरन्तरजपप्रस्पन्दमानाधरो
दीर्घाक्षावलिसंप्रवर्तनकरो नाहं वरो ब्राह्मणः।
क्षीबक्षत्रियधर्षणैकनिकषः कीर्तिप्रसूनप्रसूः
स्वर्नारीपरिरम्भसौख्यजननी सेयं समिन्मे महः॥ ११॥

(इति साटोपं सारथिना सह निष्क्रान्तः।)

युधिष्ठिरः – हन्त भोः ! अस्वस्थोऽपि प्रस्थित एव वत्सः। (विचिन्त्य) हुम् ईदृशं हि क्षात्रं तेजः। गच्छामि तावद् अस्मत्पटगृहमेव। (द्रौपद्या सह निष्क्रान्तः।)

॥ इति प्रथमोऽङ्कः ॥

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति मन्दारिका।)

मन्दारिका – दिट्ठिआ ळद्धम्। [दिष्टया लब्धम्।] (इति पुष्पभाजनमेव पश्यन्ती सहर्षं परिक्रामति।)

लवङ्गिका – (ससंभ्रमं प्रविश्य मन्दारिकाया नयने पाणिभ्यां पिदधाति।)

मन्दारिका – (एकेनैव पाणिना लवङ्गिकायाः करयुगलं विमोच्य विलोक्य च) कहं लवंगिआ। [कथं लवङ्गिका।]

लवङ्गिका – (सस्मितम्) किण्णु खु संतुट्ठा विआ। [किन्नु खलु सन्तुष्टेव।]

मन्दारिका – जं अळब्भळाहो। [यदलभ्यलाभः।]

लवङ्गिका – किं तं? [किं तत्?]

मन्दारिका – भट्टिणीए सुभद्दाए आदिट्ठा पंचविहसुळहिप्पसूणाइ अण्णेसिअ आणेदव्वा इत्ति। [भट्टिन्या सुभद्रयादिष्टा पञ्चविधसुरभिप्रसूनानि अन्विष्य आनेतव्यानीति।]

लवङ्गिका – अह्महे जुद्धचत्तरपळिसळम्मि कहं विअ ताणं संपादणं तदो ? [अहो युद्धचत्वरपरिसरे कथमिव तेषां सम्पादनं ततः ?]

मन्दारिका – किं करणिज्जम्? महंतो खु परिअणस्स भट्टिणीए आदेसो। [किं करणीयम्? महान् खलु परिजनस्य भट्टिन्या आदेशः।]

लवङ्गिका – णिवेदेहि कहं संपादिदं? [निवेदय कथं सम्पादितम्?]

मन्दारिका – मए वि भमळीए विअ जहिं कहिं वि आहिंडिअ सुदूळं कहं वि शिबिळाळामे संपाडिदं। [मयापि भ्रमर्या इव यत्र कुत्रापि आहिण्ड्य सुदूरं कथमपि शिबिरारामे सम्पादितम्।]

लवङ्गिका – दंसेहि दाव। [दर्शय तावत्।]

मन्दारिका – पेक्ख चंपअम् एदम्। एदं मल्लिआपुप्फं मरुवअम् एदम्। एदं बउळम्। णोमालिआपुप्फम् एदम्। [पश्य चम्पकमेतत्। एतन्मल्लिकापुष्पम्। मरुवकमेतत्। एतत् बकुलम्। नवमालिकापुष्पमेतत्।]

लवङ्गिका – (सविस्मयम्) साहु मन्दारिए साहु। एत्थ तुए ससविसाणं संपादिदं विअ। मम मत्थए वि एआरिसं कम्मं पडिदं वट्टइ। [साधु मन्दारिके साधु। अत्र त्वया शशविषाणं सम्पादितमिव। मम मस्तकेऽपि एतादृशं कर्म पतितं वर्तते।]

मन्दारिका – किं तं? [किं तत्?]

लवङ्गिका – हं वि भट्टिणीए सुभद्दाए आणत्ता। पञ्च सदीजना आणेदव्वा त्ति। [अहमपि भट्टिन्या सुभद्रया आज्ञप्ता पञ्च सतीजना आनेतव्या इति।]

मन्दारिका – हुं एत्तिअं खु। [हम् इयत्खलु।]

लवङ्गिका – किण्णु खु एवं भणसि? जुद्धचत्तरपळिसळे कहिम् अण्णेसामि? [किन्नु खलु एवं भणसि? युद्धचत्वरपरिसरे कुत्रान्विष्यामि?]

मन्दारिका – सोत्थि वाअणिआ वट्टंति खु ळाआणुआइणो बह्मणा। ताणं दाळा आणेदव्वा। [स्वस्तिवाचनिका वर्तन्ते खलु राजानुयायिनो ब्राह्मणाः। तेषां दारा आनेतव्याः।]

लवङ्गिका – (सहर्षम्) साहु मंदारिए साहु। एव्वम् एव्व करिस्सम्। होदु किंणिमित्तम् एदम्? [साधु मन्दारिके साधु। एवमेव करिष्यामि। भवतु किंनिमित्तमेतत्?]

मन्दारिका – किंणजाणासि उत्तळाए ओदंसमहूसवो। [किं न जानासि? उत्तरायाः अवतंसमहोत्सवः।]

लवङ्गिका – जुज्जइ। गच्छ तुमं हं वि सदीजणम् आणीअ आअमिस्सम्। [युज्यते। गच्छ त्वम्। अहमपि सतीजनमानीयागमिष्यामि।] (निष्क्रान्ते)

प्रवेशकः

(ततः प्रविशत्यभिमन्युः।)

अभिमन्युः– (सचिन्तम्)

प्रचण्डकौरवानीकपारावारतितीर्षया।
भुजौ मे स्फुरतस्स्फीतौ निरुद्धोऽस्म्यम्बयाधुना॥ १॥

(नेपथ्याभिमुखमवलोक्य)

कान्तावतंसितविचित्रसुमातिकान्ता
गर्भात्तदौहृदवशात् स्पृहणीयरूपा।
अभ्येति दुग्धतनुकान्तिरतिश्लथाङ्गी
मन्दं विवर्तितविशालविलोचनाब्जा॥ २॥

भवतु। (इति पटान्तर्हितो भवति।)
(ततः प्रविशत्युत्तरा)

उत्तरा – (समन्तादवलोक्य) किण्णु खु ण को वि एत्थ? [किन्नु खलु न कोऽप्यत्र?] (इति मन्दं पर्यङ्के समुपविशति।)

मदलेखा – (प्रविश्य) हला सांतासि। त्थोक्क विअ अब्भवहाळिअं गेह्ण। [हला श्रान्तासि। स्तोकमिव अभ्यवहार्यं गृहाण।]

उत्तरा – मा खु दाणिम्। किम् आणीदा सुद्धमित्तिआ? [मा खल्विदानीम्। किमानीता शुद्धमृत्तिका?]

मदलेखा – अह्महे विसुमरिदम्। दाणिम् आणिज्जइ। [अहो विस्मृतम्। इदानीमानीयते।] (निष्क्रान्ता)

उत्तरा – किण्णु खु अज्जवि ण दीसइ अज्जउत्तो? [किन्नु खलु अद्यापि न दृश्यते आर्यपुत्रः?]

अभिमन्युः– (पश्चादुपेत्य पाणिभ्यां तस्या नयने पिदधाति।)

उत्तरा – (सस्मितम्) महळेआ खु। [मदलेखा खलु।]

अभिमन्युः– (स्त्रीकण्ठेन) ण ळद्धा मित्तिआ। [न लब्धा मृत्तिका।]

उत्तरा – (सरोषमिव) मुंच मुंच हत्थम् अळं फरिसेण।

[मुञ्च मुञ्च हस्तम्। अलं स्पर्शेन।] (इति पाणिभ्यां तत्पाणिं मोचयति।)

अभिमन्युः– (सस्मितम्) अयि मानिनि !

बाणपञ्चकसम्पूर्णस्मरतूणीरसन्निभः।
क्वणत्कङ्कणसंश्लिष्टः कूर्परस्ते धिनोति माम्॥ ३॥

(इति तत्पाणिमवलम्ब्य तत्पार्श्व एवोपविशति।)

उत्तरा – (समन्दाक्षम्) किण्णु खु अज्ज एत्तिअं पेम्म। [किन्नु खलु अद्य इयत्प्रेम?]

अभिमन्युः– आम अस्मद्वंशकरीरक्षेत्रमसीति।

उत्तरा – (सभ्रूभङ्गम्) अळं पडिहासेण। [अलं परिहासेन।] (इति मुखं परावर्तयति।)

अभिमन्युः– अये कुपितेव –

भ्रूभङ्गसंकुचितगोधितलं विलोल–
नीलालकं स्थपुटिताल्पविशेषकं च।
प्रस्पन्दितारुणतराधरबिम्बमास्यं
ते क्षीरगौरमवलोक्य भवामि मुग्धः॥ ४॥

उत्तरा – (स्वशीर्षमवनम्य) पेम्मादिसएण एव्वं वण्णिदह्मि अज्जउत्तेण। होदु एदम् अज्ज ण जुद्धम्। [प्रेमातिशयेन एवं वर्णितास्मि आर्यपुत्रेण। भवत्वेतत् अद्य न युद्धम्।]

अभिमन्युः– ननु प्रचलति।

उत्तरा – एत्थ एव्व वट्टइ अज्जउत्तो। [अत्रैव वर्तते आर्यपुत्रः।]

अभिमन्युः– अम्बया निरुद्धोऽस्मि। अन्यथा तावदहं कथं चरेयम्? अपि जानासि–

प्रलयप्रचण्डपृषदश्वसत्वरः
तरवारिदीर्णपरवारणव्रजः।
शरवर्षशीर्णपटुघोटकच्छटो
विकटक्रमोद्भटभटावमर्दनः॥ ५॥

कञ्चुकी – (प्रविश्य) हन्त भोः –

जराजीर्णशरीरस्य दण्डोऽयं चिरसंस्तुतः।
निर्वर्तयति मे नित्यमधिकारं च संस्थितिम्॥ ६॥

(उपसृत्य) कुमार! महाराजयुधिष्ठिरः समाज्ञापयति।

अभिमन्युः– किमु माम्? अयमहमायातः। (सहसोत्थाय निष्क्रान्तः।)

कञ्चुकी – अम्ब! दिष्ट्या पश्यामि भवतीमेवंविधाम्। (मन्दं निष्क्रान्तः।)

उत्तरा – कुदो आहूदो अज्जउत्तो? [कुत आहूतः आर्यपुत्रः?]

मदलेखा – (प्रविश्य) गेह्न सुद्धमित्तिअं [गृहाण शुद्धमृत्तिकाम्] (इत्यर्पयति)

उत्तरा – (सचिन्तं हस्तात् मृत्तिकाम् अधः पातयति।)

मदलेखा – किण्णु खु एवं किदम्? ण मुखे निपातयसि। [किन्नु खल्वेवं कृतम्? न मुखे निपातयसि।] (इत्यादाय ददाति)

उत्तरा – हिअए को वि आवेओ समुप्पण्णो। [हृदये कोऽप्यावेगः समुत्पन्नः।]

मदलेखा – कुदो ? [कुतः ?]

उत्तरा – जेट्ठससुरेण ज्झेत्ति आहूदो अज्जउत्तो। [ज्येष्ठश्वशुरेण झटित्याहूत आर्यपुत्रः।] (इति सचिन्तमुपविशति।)

अभिमन्युः– (प्रविश्य, दूरादुत्तरामवलोक्य) अये किन्नु खलु सेयम्–

चिन्ताभरार्धविनिमीलितपक्ष्मपङ्क्ति–
निश्चञ्चलासितकनीनिकलोचनाब्जा।
पर्यङ्कवेशितकरार्पितदेहभारा
चित्रार्पितेव गजदन्तमयीव भाति॥ ७॥

(उपसृत्य) किन्नु खल्वेवम् ?

उत्तरा – ण किं वि। [न किमपि।]

अभिमन्युः– नहि तथा–

अभिमतामपि सम्प्रति मृत्तिकां
भुवि निपात्य विनिश्चलविग्रहा।
दृशमलक्ष्यगतां दधती भृशं
पिशुनयस्यतिचिन्तमिदं मनः॥ ८॥

उत्तरा – कुदो आहूदो अज्जउत्तो ? [कुत आहूत आर्यपुत्रः ?]

अभिमन्युः– किमिदमेव चिन्तानिदानम् ? अभिमन्युगृहिणी खल्वसि। (सस्मितम्) अथवा स्त्रीहृदयं खलु।

उत्तरा – जाणामि अज्जउत्तो महावीरो त्ति। [जानामि आर्यपुत्रः महावीर इति।]

अभिमन्युः– कात्र विचिकित्सा ? अत एवाहूतोऽस्मि।

उत्तरा – मह उण अज्ज णाहिमदं जुद्धप्पत्थाणम्। [मम पुनरद्य नाभिमतं युद्धप्रस्थानम्।]

अभिमन्युः– किमवतंसमहोत्सव इति ?

उत्तरा – (सलज्जं शिरो नमयति।)

अभिमन्युः– मम तावत् युद्धमेव महोत्सवः।

प्रतीहारी – (प्रविश्य) कुमर भट्टिणी दुवारे चिट्ठइ। [कुमार भट्टिनी द्वारे तिष्ठति।]

अभिमन्युः– किमम्बा? सत्वरं प्रवेशय।

प्रतीहारी – तह। [तथा।] (निष्क्रान्ता)

(ततः प्रविशति सुभद्रा। उत्तरा मन्दमुत्थातुमुद्युङ्क्ते।)

सुभद्रा – वच्छे णिसण्णा होहि। [वत्से निषण्णा भव।] (उपसर्पति)

अभिमन्युः– अम्ब अभिमन्युरभिवादयते। (प्रणम्य) इदमासनम्।

सुभद्रा – चिट्ठदु णाम आसणम्। अवि णाम प्पत्थिदोसि णासीळम्? [तिष्ठतु नामासनम्। अपि नाम प्रस्थितोऽसि नासीरम्?]

अभिमन्युः– अथकिम्। पितृव्यादेशः खलु।

सुभद्रा – तं सच्चं। महावीळपुळुशेहिं वि दुक्करप्पवेसं अज्ज कोळवसेण्णं त्ति सुदं मए। [तत् सत्यम्। महावीरपुरुषैरपि दुष्करप्रवेशमद्य कौरवसैन्यमिति श्रुतं मया।]

अभिमन्युः– अत एवाहमाज्ञप्तोऽस्मि।

सुभद्रा – अण्णं अ, आचाळिएण पडिह्लादो एक्कमहावीळपुळुशवहोत्ति सुदं मए। [अन्यच्च, आचार्येण प्रतिज्ञातम् एकमहावीरपुरुषवध इति श्रुतं मया।]

अभिमन्युः– हन्त भोः। ननु भवत्यप्येवम्। अम्ब–

युद्धे विजित्य रिपुमण्डलमत्र कीर्तिं
क्षीरोदफेनधवलां बलवान्लभेय।

शत्रुप्रचण्डशरभिन्नकलेवरो वा
स्वर्लोकवारतरुणीपरिरम्भसौख्यम्॥ ९॥

उत्तरासुभद्रे– संतं पावं संतं पावम्। [शान्तं पापम्। शान्तं पापम्।]

अभिमन्युः– अलं शङ्कया। अम्ब अनुगृहाण माम्। युद्धानुगुणवेषो भवामि। (निष्क्रान्तः)

सुभद्रा – (उत्तरामुपसृत्य) वच्छे अळं चिंदाए प्पडिप्फुरइ गब्भभरो। [वत्से अलं चिन्तया। परिस्फुरति गर्भभरः।]

अभिमन्युः– (युद्धसमुचितवेषः प्रविश्य) न कदाप्येवमम्बा नाप्युत्तरा। किन्नु खल्वद्य तांवदेवम्? (उपसृत्य) अप्यनुज्ञा?

सुभद्रा – वच्छ वंचआ खु कण्णप्पमुहा विपक्खा। [वत्स वञ्चकाः खलु कर्णप्रमुखा विपक्षाः।]

अभिमन्युः– अम्ब वीरसूरसि खलु। अलं चिन्तया। ते तु महारथिकास्सर्वेऽपि एकदा मामभिपतन्तु नाम–

भुजदर्परुद्धपरचक्रदोर्बलः
प्रथितान्निहत्य रथिकान्महाहवे।
चतुरो विचित्रतरशस्त्रयोधने
प्रलयोद्धतान्तकनिभश्चराम्यहम्॥ १०॥

तद् भवती करोतु मामाशीर्वादकवचितम्। (प्रणमति)

सुभद्रा – सवहा विअई होहि। [सर्वथा विजयी भव।] (बाहुभ्यामुत्थापयति)

उत्तरा – प्पत्थाणमंगळं णिव्वट्टेदु अज्जा। [प्रस्थानमङ्गलं निर्वर्तयत्वार्या।] (सम्भारमानीयार्पयति)

सुभद्रा – (विधिवन्मङ्गलकार्यं निर्वर्त्य) वच्छे तुमं वि णिव्वट्टेहि। [वत्से त्वमपि निर्वर्तय।]

उत्तरा – (सर्वं निर्वर्त्य अभिमन्युललाटे कुङ्कुमस्थासकं निक्षिपति।)

अभिमन्युः – (सस्मितम्) साधु कृतं कान्तया। संग्रामे तावल्ललाटनेत्रतुल्यो भवेति।

सुभद्रा – (सस्मितम्) तह एव्व होहि। किं ते भूयो प्पिअं ओहरामि ? [तथैव भव। किन्ते भूयः प्रियमुपहरामि ?]

अभिमन्युः – (सप्रश्रयम्)

प्रीत्या दत्ता त्वया मातः युद्धप्रस्थानसम्मतिः।
त्वदाशीर्दृढवर्मास्मि किमितोऽप्यस्ति मे प्रियम्॥ ११॥

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्संभृता–
स्ससस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥

(निष्क्रान्तास्सर्वे।)

॥ इति द्वितीयोऽङ्कः ॥

जगद्गुरुवकुलभूषणमहाकविकृतं
वीरसौभद्रं नाम नाटकं
सम्पूर्णम्।

❀❀❀

स्यामन्तकम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः	शतधन्वा
वटुः	प्रसेनः
वनपालः	सूतः
विदूषकः	सत्राजित्
कृष्णः	परिजनः
कुन्तलिका	चेटी
कञ्चुकी	कामन्धरः
धारणावति	विरोचकः
मन्दारिका	द्वारपालः
सत्यभामा	उग्रसेनः
रुक्मिणी	जनाः
मधुकरिका	

स्यामन्तकम्

॥ प्रथमोऽङ्कः ॥

रासक्रीडापरवशधियो वञ्चयित्वा मुकुन्दो
मुग्धा गोपीः कुवलयदृशं संज्ञयाहूय राधाम्।
तासां मध्ये निजभुजदृढाश्लेषरोमाञ्चितं त–
द्गण्डं चुम्बंच्छ्रुतिमणिरुचिव्याप्तमव्यान्मुदा नः॥ १॥

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि –

नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये घण्टानादः)

सूत्रधारः – किन्नु खलु, मयि विज्ञापनैकताने शब्द इव। (नेपथ्याभिमुखमवलोक्य) आम् ज्ञातम्। भगवद्भक्तस्य सत्राजितः प्रासादे भावि भगवदाराधनं सूचयन्नेषः प्रचलति। तदिदानीं तदर्चकपुत्रः कुसुमापचयायोपवनमभ्येति। (निष्क्रान्तः)

(प्रस्तावना)

(ततः प्रविशत्युत्तम्भितशिखः आजानुधृतपरिधानो वटुः)

वटुः – (सोच्छ्वासं) त्वरयति मां कुपितः पिता पूजोपकरणाहरणाय। तदिदमेवोपवनं प्रविश्य कुसुमान्यपचिनोमि। (इत्युपवनं प्रविश्य पुष्पापचयं नाटयति)

(प्रविश्योद्यानपालः)

उ.पालः – अस्मत्स्वामिना सत्राजिता विस्मयावहं स्यमन्तकं नाम रत्नं सूर्यसकाशादुपात्तमिति किंवदन्ती। तत्पृच्छामि तावदेनं वटुम्। (इत्युपसृत्य) अये, किमुपलब्धं स्यमन्तकं नाम रत्नमस्मत्स्वामिना?

वटुः – अथ किम्?

वनपालः – तद्रत्नं वासुदेवोऽभिलषतीत्यपि किंवदन्ती। अपि नाम सत्यम्?

वटुः – (सस्मितं) न केवलं रत्नं, तद्दुहितृरत्नमपि।

वनपालः – कथं सत्यभामायै च स्पृहयति?

वटुः – अभिनवं लोकोत्तरं च वस्तु विलोक्य कस्य वा नोदेति स्पृहा?

वनपालः – कथमवलोकिता सा?

वटुः – स्यमन्तकरत्नाभ्यर्थनायासकृदायातं वासुदेवेन तस्य भवनम्।

वनपालः – कुतो वा कृष्णेनाभ्यर्थितम्?

वटुः – रत्नहारी खलु पार्थिवः। तदुग्रसेनाय दातव्यमिति।

वनपालः – तर्हि नानुमतं किमस्मत्स्वामिना?

वटुः – तत्कथमिति न जाने।

वनपालः – शतधन्वप्रभृतिभिरप्यसकृदभ्यर्थिता सत्यभामेति श्रुतम्। अपि नाम निपतेत्तानन्तरा नन्दसूनुकरबडिशे।

वटुः – सत्यनङ्गकलाकोविदे कृष्णसहचरे मधुकरे कथं वा न पतेत्कृष्णहस्ते?

वनपालः – पश्य, सोऽपि मधुकरः किमपि चिन्तयन्नितः एवाभिवर्तते। (इति निष्क्रान्तः)

वटुः – (सावेगं) हन्त ! किमपि जल्पता मया तावद्विस्मृतं प्रकृतं कर्म। (इति निष्क्रान्तः)

शुद्धविष्कम्भः

(ततः प्रविशति यथानिर्दिष्टो विदूषकः)

विदूषकः – आणत्तोम्हि वअस्सेण। तुमं दाव पुढमम् एव्व गदुअ कंचणुज्झाणे चिट्ठ। हं उण आअमिस्संत्ति। ता एत्थ एव्व कंचणुज्झाणे ओविसामि। (इति शिलातले समुपविश्य) कुदो वा चिरेह वअस्सो (नेपथ्याभिमुखमवलोक्य) इदो एव्व आअच्छइ (सानन्दं)

संफुळ्ळ रम्म कमलाअदळोअणो सो
णीलाळओ जळदमंसळणीळकाओ।
तळ्ळोक्कणाह सुळणाह किळीड कोडि–
संजुट्ठदिव्वचळणो महुरो अ कह्णो।। ३ ।।

(निर्वर्ण्य) एसो किं वि चिंतेदित्ति तक्केमि ता इमस्स ळुक्खस्स मूळे अंदळिदो पेक्खिस्सं किं चिंतेदित्ति। (इति तथा करोति) [आज्ञप्तोऽस्मि वयस्येन त्वं तावत्प्रथममेव गत्वा काञ्चनोद्याने तिष्ठ। अहं पुनः आगमिष्यामि इति। तस्मादत्रैव काञ्चनोद्याने उपविशामि। कुतो वा चिरयति वयस्यः ? इत एवागच्छति।]

संफुल्लरम्यकमलायतलोचनस्सः
नीलालको जलदमांसलनीलकायः।

त्रैलोक्यनाथसुरनाथकिरीटकोटि-
संजुष्टदिव्यचरणो मधुरश्च कृष्णः॥ ३॥

एष किमपि चिन्तयतीति तर्कयामि। तस्मादस्य वृक्षस्य मूले अन्तर्हितः पश्यामि किं चिन्तयतीति।)

(ततः प्रविशति चिन्ताकुलः कृष्णः)

कृष्णः – पुनरपि सुतनुं तां स्निग्धमुग्धायताक्षीं
तिलकितमुखचन्द्रां रक्तबिम्बाधरोष्ठीम्।
अलिकुलनिभवेणीं मुष्टिमेयावलग्नां
मम नयनमिदं किं वीक्ष्य सन्तोषमीयात्॥ ४॥

विदूषकः – (स्वगतं) अम्महे, इमस्स हिअअं कएवि वळाकीए ओहरिदं विअ दीसइ। [अहो !अस्य हृदयं कयापि वराक्यापहृतमिव दृश्यते।]

कृष्णः – (परितो विलोक्य दीर्घं निःश्वस्य) किन्नु खलु, मधुकरश्चिरयतीव। तावत्प्रियावयवसौन्दर्यनिवेदीनि विलोकयन्वस्तूनि मनो विनोदयामि। इह हि–

तद्भ्रूविभ्रमभाक्चलाचललतास्तल्लापतुल्यास्स्वनाः
उच्चैः कोकिलसन्ततेस्तदधरस्पर्धी नवः पल्लवः।
तद्दन्तावलिसन्निभाश्च मुकुलास्तत्कुन्तलाभाश्चल-
द्भृङ्गास्तत्कुचकुम्भडम्बरहराः पद्मावलीकोरकाः॥५॥

विदूषकः – (स्वगतं) अह्मो, उम्मत्तो विआज्ज जादो एसो पेक्खिस्सं पुणोवि किं किं भणादि त्ति। [अहो, उन्मत्त इवाद्य जात एषः। प्रेक्षिष्ये पुनरपि किं किं भणतीति।]

कृष्णः – भो ! मन्दमारुत, धन्योऽसि। यतः

सदागतिरदृष्टस्त्वमितरैरनिवारितः।
निर्भयं तत्कुचद्वन्द्वसिचयं हरसि क्षणात्॥ ६॥

वयं तु मन्दभाग्यास्सकलदृष्टिगोचरतया। (सध्यानं दीर्घं निःश्वस्य)

वल्गन्नितम्बकुचकुम्भतटी नतास्या
मन्दस्मितोन्नतकपोलतला मृगाक्षी।
मन्दं पुनर्मम धुरि प्रचलेदपीह
मञ्जीरमञ्जुरणितं पदमादधाना॥ ७॥

विदूषकः – अज्ज दाव कीळिस्सं इमिणा (सत्वरमुपसृत्य) देव इदो एव्व आअदा। [अद्य तावत्क्रीडिष्यामि अनेन। देव, इत एवागता।]

कृष्णः – (सहर्षं) क नु सत्यभामा? (पार्श्वमवलोक्य) अहो मधुकरः। अपि नाम स्यादनेन विदितमेतत्सकलमपि?

विदूषकः – (विहस्य) ण मए सच्चहामा भणिदा। किं दु संफुळ्ळपुप्फहसिदा मंदाणिलणत्थिदा पच्छिकुणकुणरणिदा अवलेत्ति कदुअ भ्भमेण ळदा भणिदा। [न मया सत्यभामा भणिता। किन्तु, संफुल्लपुष्पहसिता मन्दानिलनर्तिता पक्षिकुणकुणरणिताऽबलेति कृत्वा भ्रमेण लता भणिता।]

कृष्णः – वयस्य, अलमनेन परिहासेन।

विदूषकः – अळं इमिणा पिहितेण। [अलमनेन पिहितेन।]

कृष्णः – किं मया पिहितम्?

विदूषकः – को वा मए परिहासो किदो? (को वा मया परिहासः कृतः?)

कृष्णः – ननु कामपि लतां प्रदर्श्य मां वञ्चयसि।

विदूषकः – णं पुढमं एव्व तुए णिवेदिदा हवे। तइआ, सच्चं णिवेदइस्सम्। कहं विअ तुह हिअअं जाणिस्सु? [ननु प्रथममेव त्वया निवेदिता भवेत्। तदा सत्यं निवेदयिष्यामि। कथमिव तव हृदयं ज्ञास्यामि?]

कृष्णः – (सस्मितं) सखे, मन्मुखादेव युक्त्या प्रकाशयितुं मे हृदयमिच्छतीव। शृणु तावत्–

यमनियमवतामपि स्थिरं हृ–
द्रवति विलोकनमात्रतोऽपि यस्याः।
मनसिजजयवैजयन्तिका सा
मम धुरि पर्यटति स्म सत्यभामा॥ ८॥

विदूषकः – (सवितर्कं) सच्चहामा खु कस्स वि ण दिष्टिगोअळो होदि त्ति सुदं मया। कहं विअ तुए दिष्टा? [सत्यभामा खलु कस्यापि न दृष्टिगोचरा भवतीति श्रुतं मया। कथमिव त्वया दृष्टा?]

कृष्णः – ननु स्यमन्तकमणिदिदृक्षया गतोऽहं सत्राजितो गृहम्।

विदूषकः – ह्णादं तइआ तुए दिष्टा खु। [ज्ञातम्। तदा त्वया दृष्टा खलु।]

कृष्णः – अथ किम्।

विदूषकः – होदु ताए तुमं दिट्ठो वा? [भवतु, तया त्वं दृष्टो वा?]

कृष्णः – किं कथयेयम्? शृणु तावत्। सव्याजमनवसरेऽपि कार्यकलापचिकीर्षयेव सखीभिस्समं प्रचलन्ती मम धुरि अनङ्गसहस्रमिव सृजता निजापाङ्गेनैव मां शश्वदवलोकितवती। किं बहुना–

अद्यापि तद्वदननिर्गतमन्दहासो
नेत्रे निखात इव शीतसिताभ्रतुल्यः।
आनन्दयत्यमृतवत्स्मृतिमेत्य चित्तं
दन्दह्यते च दवपावकवन्नितान्तम्॥ ९॥

विदूषकः – (सहस्ततालं) ही ही घिदे दे अपूवो पडिदो। [घृते ते अपूपः पतितः।]

कृष्णः – (सौदास्यं) सखे किमेतावतैव प्रमुदितोऽसि।

विदूषकः – ठाणे खु मित्तस्स प्पाणिग्गहे प्पचळिदे कस्स वा ण होदि प्पमोदो अण्णं अ मह अब्भावहाळो हविस्सइ। [स्थाने खलु मित्रस्य पाणिग्रहे प्रचलिते कस्य वा न भवति प्रमोदः? अन्यच्च ममाभ्यवहारो भविष्यति।]

कृष्णः – (विदूषकहस्तमवलम्ब्य) अलं सम्भ्रमेण। क्षणमिव गृहीतक्षणः शृणु तावत्–

याच्यमाना मृगाक्षी सा राजभिर्बहुभिर्मुहुः।
राज्याधिकारहीनं मां कथं गोपालमिच्छति॥ १०॥

विदूषकः – (सशिरश्चालनं) अदो एव्व गोपाळोत्ति कदुअ सा गेह्णादि तुह हत्थकमळम्। [अत एव गोपालः इति कृत्वा सा गृह्णाति तव हस्तकमलम्।]

(नेपथ्ये नूपुररवः)

कृष्णः – (कर्णं दत्त्वा) सखे किमेतत् ? नूपुररव इव।

विदूषकः – तुमम् अण्णेसंती सच्चहामा आअदा हवे ! (नेपथ्याभिमुखमवलोक्य) णहि णहि, सच्चहामाए सही कुंदळिआ इदोएव्वआअच्छइ ता भवं दाव अस्सरुक्खस्स मूळे अंदरिदोहोदु हं उण णिद्दं अणुकुणोमि। (इति कृष्णं संप्रेष्य स्वयं पादौ प्रसार्य चेलावगुण्ठितमक्तको निद्रां नाटयति) [त्वामन्विष्यन्ती सत्यभामाऽऽगताभवेत्। नहि नहि, सत्यभामायास्सखी कुन्तलिका इत एवागच्छति। तद्भवांस्तावदस्य वृक्षस्य मूले अन्तर्हितो भवतु। अहं पुनर्निद्रामनुकरोमि।]

(ततः प्रविशति कुन्तलिका।)

कुन्तलिका– अहो, सच्चहामाए हिअअं भअवदा कह्णेणआउळिदं विअ प्पडिभादि किं करिस्सं कहंवादेण संघडइस्सं (इति चिन्तयन्ती गगनदत्तदृष्टिर्विदूषकपादयोः स्खलित्वा पतति।) [अहो, सत्यभामाया हृदयं भगवता कृष्णेनाकुलितमिव प्रतिभाति। किं करिष्यामि, कथं वा तेन संघटयिष्यामि ?]

विदूषकः – (सहसोत्थाय) हा हदोह्मि, बह्मणस्सचळणोकएविपिशा चिआए चळणेणताडिदो। [हा हतोऽस्मि, ब्राह्मणस्य चरणः कस्या अपि पिशाचिकायाश्चरणेन ताडितः।]

कुन्तलिका– (सभयं विलोक्य) कहं महुअरो अजाणंतीए मएओरद्धं मरिसदुभवं। (इति प्रणमति) [कथं मधुकरः ? अजानत्या मया अपराद्धं मृष्यतु भवान्।]

विदूषकः – (सक्रोधमिव) किं तुह चळणेविदेव्वेण अक्खि किदव्वम्। [किं तव चरणेऽपि दैवेनाक्षि कर्तव्यम्।]

कुन्तलिका– किं विचिंदयंदीए मए तुमंदावणदिट्ठो। [किमपि चिन्तयन्त्या मया त्वं तावन्न दृष्टः।]

विदूषकः – (नेत्रे कराभ्यामुन्मृज्योन्मील्य च) कहं कुंदळिआ, कुंदलिए चिंदाए णिदाणंकिं। कहिंप्पत्थिदासि। [कथं कुन्तलिका? कुन्तलिके, चिन्ताया निदानं किम्? कुत्र प्रस्थितासि?]

कुन्तलिका– मह चिन्दंदाव अणंदरंकहइस्सं पुढमं तुमं भणाहि तुइ मरगअरदणं एक्कं वट्टदित्तिसुदं मए, तं दावप्पअच्छ, महसआसे। एक्कं एक्कंमोत्तिअं वट्टइ, देणसमंघढइस्सं। [मम चिन्तां तावदनन्तरं कथयिष्यामि। प्रथमं त्वं भण। त्वयि मरकतरत्नमेकं वर्तते इति श्रुतं मया। तत्तावत्प्रयच्छ। मम सकाशे एकमेव मौक्तिकं वर्तते। तेन समं घटयिष्यामि।]

विदूषकः – (सभयकम्पं) णद्धिमहसआसेरदणं। कहेहि किं तुमं सत्ताजिदा प्पेसिदा तस्सअरदणं केणवितक्खरहदएण ओहरिदं। हंउण अळिअंणभणामि महसआसेणहिरद णं। (इति हस्तेन शिरः कण्डूयमानो रोदिति।] [नास्ति खलु मम सकाशे रत्नम्। कथय किं त्वं सत्राजिता प्रेषिता? तस्य च रत्नं केनापि तस्करहतकेनापहृतम्। अहं पुनरलीकं न भणामि। मम सकाशे न हि रत्नम्।]

कृष्णः – (स्वगतं) जडः खल्वयम्। सा तु मरकतव्याजेन मां व्यपदिशति। मौक्तिकच्छलेन सत्यभामां सूचयति। तत्सत्यमेव यदभिहितमनया–

लावण्यैकनिधिर्नृणां सुकृतिनां पुण्यैकसंसूचिनी
नेत्रानन्दविधायिनी गुणवती रत्नौघकान्तिप्रदा।
स्निग्धाच्छच्छविमञ्जुला च सुतनुर्मुक्तेव संश्लिष्य सा
ग्रीवां यस्य मनो विनोदयति तं धन्यन्तु मन्यामहे॥

कुन्तलिका– (विहस्य) णहि णहि सत्तजिदा णाहं प्पेसिदाह्लं तु ह्लमित्तं कह्लं पुच्छामि। [नहि नहि। सत्राजिता नाहं प्रेषिता। तव मित्रं कृष्णं पृच्छामि।]

विदूषकः – (सहर्षं) कुन्दळिए सच्चहामा किं कह्लं अहिलसह्ल। [कुन्तलिके, सत्यभामा किं कृष्णमभिलषति ?]

कुन्तलिका– तं दिट्ठिअ एव्वं जाणामि [तां दृष्ट्वैवं जानामि।]

विदूषकः – ता (इत्युपसृत्य कर्णे) एव्वंविअ ह्लंवि प्पकिदं कज्जं करिस्सं [एवमिव। अहमपि प्रकृतं कार्यं करिष्यामि।]

कुन्तलिका– जं आणवेइ। (इति निष्क्रान्ता) [यदाज्ञापयति।]

कृष्णः – (उपसृत्य) अप्यासीन्मन्त्रोपदेशः ?

विदूषकः – (सहर्षं संस्कृतमाश्रित्य) तन्मन्त्रसिद्ध्या युवयोर्मेलनं भविष्यति।

कृष्णः – (सस्मितं) मन्त्रसिद्धः खलु भवान्। सखे ! श्रोतुमिच्छामि तन्मन्त्रम्।

विदूषकः – उपदिशामि। विनीतः प्रयतो भूत्वोपविश्य शृणु तावत्।

कृष्णः – एवं, ब्राह्मणः खलु भवान्। (इति सस्मितं तथोपविशति।)

विदूषकः – (उपसृत्य कर्णे) एवमिव।

कृष्णः – साधु सखे, साधु।

कञ्चुकी – (प्रविश्य) आज्ञप्तोऽस्मि देव्या रुक्मिण्या। भो वलाहक! गच्छाद्य विभावर्यां मधुवने मधुमासनिमित्तं कौमुदीमहोत्सवः प्रचलति। तदा मधुवनमलङ्करणीयम् आर्यपुत्रेणेति निवेदयार्यपुत्राय इति। तद्गच्छामि तावत्कृष्णदिदृक्षया। (इति परिक्रम्य कृष्णमवलोक्य सानन्दम्) अयं हि–

योगिध्येयो नवघनरुचिः पुण्डरीकायताक्षो
रक्षादीक्षावहनचटुलः पीतचेलाञ्चिताङ्गः।
लक्ष्मीक्रीडामरकतगिरिर्भक्तकल्पद्रुमोऽयं
श्रीकृष्णो मे हरति नयने कोऽस्ति धन्यो मदन्यः॥

तन्निवेदयामि तावत्। (उपसृत्य) जयतु जयतु देवः। (कृष्णः अनाकर्णयन्निव चिन्ताकुलस्तिष्ठति।)

विदूषकः – देव्व! वळाहओ आअदो। [देव! वलाहक आगतः]

कृष्णः – (सावेगं) कथं, वर्षावसरोऽपि मां पीडयितुं सन्निहितः–

रन्ध्रान्वेषी विधिर्हन्त निरीक्ष्य स्खलितं जनम्।
उपर्युपरि सन्तापं दत्त्वा मर्दयति ध्रुवम्॥ १३॥

कञ्चुकी – कथं देवश्चिन्ताकुलित इव।

विदूषकः – (स्वगतम्) अहो, एसो ळंघिदो मंअणपिआचेण। (प्रकाशं) देव्व, णहि घणो। वळाहअणामहेओ कंचुई। [अहो एष लङ्घितो मदनपिशाचेन। देव, नहि घनः वलाहकनामधेयः कञ्चुकी।]

कृष्णः – कथं, कञ्चुकी ? किमर्थमागतोऽसि ?
कञ्चुकी – (सविनयं) देव, देवी विज्ञापयति।
कृष्णः – किमिति ?
कञ्चुकी – अद्य विभावर्यां कौमुदीमहोत्सवः प्रचलति। तद्देवेन तदा मधुवनमलङ्करणीयमिति।
कृष्णः – देव्यै निवेदय तावत्। कुतुकी सिद्धोऽस्मीति।
कञ्चुकी – यथाज्ञापयति देवः। (इति परिक्रामति)
विदूषकः – भो वळाहअ इदो दाव। [भो वलाहक, इतस्तावत्।]
कञ्चुकी – (उपसृत्य) आज्ञापयतु भवान्।
विदूषकः – भणाहि दाव देवीए, अणाहूदो वि महुअरो जोह्लामहूसवे अहिणवं अब्भवहारं खादुं आअच्छइत्ति। [भण तावद्देव्याः। अनाहूतोऽपि मधुकरो ज्योत्स्नामहोत्सवे अभिनवमभ्यवहारं खादितुं आगच्छतीति।]
कञ्चुकी – (सस्मितं) तथा। (निष्क्रान्तः)
कृष्णः – सखे, अद्य तावद्भवद्यत्नस्य प्रत्यूहस्समापतितः।
विदूषकः – (सनयनोन्मीलनं) किं अब्भवहारं ण करिस्सइ। [किम् अभ्यवहारं न करिष्यति ?]
कृष्णः – (विहस्य स्वगतं) अयं तावदुदरम्भरिस्सर्वदा भ्यवहारमेव चिन्तयति। (प्रकाशं) नहि नहि। भवता तावत्कुन्तलिकां प्रति मन्त्रितस्य सत्यभामानयनस्य प्रत्यूहः इत्युक्तम्।
विदूषकः – अब्भवहारचिंदाए तंदावविसुमरिदम्। (समस्तकान्दोलनं) होदुप्पत्तूहं दाव णिवाइवस्सम्। [अभ्यवहार-चिन्तया तद्विस्मृतम्। भवतु, प्रत्यूहं तावन् निवारयिष्यामि।]

कृष्णः – सखे, उदन्तमेनं देव्यै मा प्रकाशय।

विदूषकः – तहएव्वहोदु। एव्वं कहइस्सं। भोदि, भअवदादेवेण आणत्तोह्मि। भो महुअर मह उत्तंतं देवीए मा णिवेदेहि त्ति ता तं दाव उत्तंतं तुए ण भणिस्संत्ति। [तथैव भवतु। एवं कथयिष्यामि। भवति, भगवता देवेनाज्ञप्तोऽस्मि। भो मधुकर मम वृत्तान्तं देव्यै मा निवेदय इति। तस्मात्तं तावद्वृत्तान्तं तुभ्यं न भणिष्यामि इति।]

कृष्णः – (स्वगतं) कथमयं मूर्खः! अस्पृष्टशङ्कायां देव्यां शङ्कामङ्कुरयतीव। (प्रकाशं) सखे, किमपि मा सूचय।

विदूषकः – तहएव्व होदु। [तथैव भवतु।]

कृष्णः – सखे, किं गच्छावः सन्ध्यामुपासितुम्? पश्य, भगवानंशुमाली चरमगिरिसानुमाश्रितः–

सन्ध्या रागवती कृतानुसरणाप्युत्सार्य दूरं गतं
रुष्टा तं दिवसं विचिन्त्य सहसा त्यक्तुं निजासूनिव।
स्थित्वा पश्चिमपर्वतोच्चशिखरे मार्तण्डबिम्बाह्वयं
तप्तायःपृथुपिण्डमद्य गिलति स्त्रीबुद्धिरेवं किल॥

हन्त, विधिविलसितम् –

अहो दैवगतिश्चित्रा रागिणोरुभयोरपि।
एकत्र सङ्गमः प्रायो ह्येवमेव सुदुर्लभः॥ १५॥

(इति विदूषकेन सह निष्क्रान्तः)

॥ इति प्रथमोऽङ्कः ॥

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति परिमलप्रसूनमालासम्भृतकनकभाजन-पाणिर्धारणावती)

धारणावती– आणत्तह्मि कुन्दळिआए ''हंजे धारणावदि, तुमं दावप्पुढमं एव्व महुवणं गदुअ ळदाघरे चिट्ठ। हं उण सच्चहामाए आअमिस्संत्ति। अदोप्पत्थिदह्मि महुवणम्। (इति परिक्रम्याग्रतोऽवलोक्य) कहं मंदारिआविआ तं दावपुच्छिस्सं सत्ताजिदो उत्तंतं। सा उण स्सव्वहातस्ससआसेप्पचळइ (इत्युपसर्पति) [आज्ञप्तास्मि कुन्तलिकया- हञ्जे धारणावति, त्वं तावत्प्रथममेव मधुवनं गत्वा लतागृहे तिष्ठ। अहं पुनस्सत्यभामया सह आगमिष्यामि इति। अतः प्रस्थितास्मि मधुवनम्। कथं मन्दारिकेव ! तां तावत्प्रक्ष्यामि सत्राजितो वृत्तान्तम्। सा पुनस्सर्वदा तस्य सकाशे प्रचलति।]

(ततः प्रविशति मन्दारिका)

मन्दारिका – कहं धारणावदी ? [कथं धारणावती।]

धारणावती– हञ्जे मंदारिए अवि णाम जाणासि सत्ताजिदो उत्तन्तम् ? [हञ्जे मन्दारिके, अपि नाम जानासि सत्राजितो वृत्तान्तम् ?]

मन्दारिका – मए दावएव्वं सुदं। सदधणुआ सत्ताजिदा सिणेहं कदुअ, असकिदाअच्छइ तस्सि घरंत्ति [मया तावदेवं श्रुतम्। शतधन्वा सत्राजितः स्नेहं कृत्वा आसकृदागच्छति तस्य गृहमिति।]

धारणावती– णकदाविएव्वं तस्स सिणेहो कुदो। [न कदाप्येवं तस्य स्नेहे कुतः ?]

मन्दारिका – सतधणुआ वंचओ किं करिस्सदि त्ति ण जाणामि देण प्पडिह्णादंत्ति सुदम्। [शतधन्वा वञ्चकः। किं करिष्यतीति न जानामि। तेन प्रतिज्ञातमिति श्रुतम्।]

धारणावती– किंत्ति ? [किमिति ?]

मन्दारिका – सोजइ स्सअं णिअ कण्णं णदेदि तइआ ओहरामित्ति। [स यदि स्वयं निजकन्यां न ददाति तदापहरामीति।]

धारणावती– एकत्थ कह्णोवि सच्चहामोबरि किददिट्ठी। [एकत्र कृष्णोऽपि सत्यभामोपरि कृतदृष्टिः।]

मन्दारिका – एव्वं एव्वळोए खु रमणिज्जे वत्थुम्मिणि वडइसव्वस्स दिट्ठी। [एवमेव खलु लोके। रमणीये वस्तुनि निपतति सर्वस्य दृष्टिः।]

(नेपथ्ये – पुनरपि सुतनुं ता इति पूर्वोक्तमेव पठति।]

धारणावती– हंजे पेक्ख। कह्णोतं एव्वसच्चहामं सुमरिअ इवोएळआअच्छइ तागच्छह्म। (इति निष्क्रान्ते) [हञ्जे, पश्य। कृष्णस्तामेव सत्यभामां स्मृत्वेत एवागच्छति। तद्गच्छावः। (प्रवेशकः)

(ततः प्रविशति चिन्तामन्थरः कृष्णः)

कृष्णः – (समन्तादवलोक्य) अहो–

ज्योत्स्नादुकूला तरुसान्द्रनील–
पलाशकेशौघधृतप्रसूना।

नीलोत्पलाक्षी रजनी प्रियेव
विनोदयत्यद्य मनो मदीयम्॥ १॥

मधुवनेऽस्मिन्यावत्प्रियागमनं तावत्कथमपि कालोऽतिवाह्यः। (इति लतागृहद्वारि शिलातले समुपविश्य गगनमवलोक्य दीर्घमुष्णं च निःश्वस्य) अहो, कथमयं विधुहतको विरहक्लिष्टमपि मां क्लेशयति। आस्तां तावदेनं समुपालभे। अये दोषाकर, अभिजातस्य ते किमिदमुचितम्? हन्त, जडो निजवंशमहिमानमपि न जानासि। शृणु तावत्–

अब्धिस्ते जनको रमा च भगिनी दाराश्च ताराः पुनः
गेहं विष्णुपदं समुज्ज्वलकलापूर्णो द्विजानां पतिः।
अर्यम्णः करवर्धितोऽसि किमिदं युक्तं विधो मादृशं
संतापाकुलितं दिधक्षसि कथं न स्यात्कलङ्कस्तव॥

किञ्च –

ओषधीश इति विश्रुतो भवा–
न्रुग्णमेनमयि मारयत्यहो।
घातुकस्य भिषजो न सिध्यति
स्वीयकर्म भजसि क्षयं ततः॥ ३॥

किञ्च –

अल्पो वक्रो लज्जयेव क्षपायां
मेघद्वारे पर्यटन्सूर्यसाह्यात्।
पूर्णो भूत्वा पीडयित्वा त्वमार्तान्
भूयः क्षीणः किं सुखं हिंसकस्य॥ ४॥

(विचिन्त्य) किमिदानीमपि नागता सह सत्यभामया कुन्तलिका।

(नेपथ्ये) हला, इदो इदो एहि। [हला, इतः इत एहि।]

कृष्णः – (विलोक्य) कथं सत्यभामा ! (सहर्षं) कथमियमहमिव स्मरवशेव दृश्यते–

परिपाण्डुगण्डतलसूचितोत्कट–
स्मरतीक्ष्णबाणहतिवेदना प्रिया।
स्तनभारमन्दगमना नितम्बिनी
कलहंसिकावदभियाति सुन्दरी।। ५।।

अथ तावत्प्रथमदर्शनापेक्षया स्मरशरपीडिता प्रियदर्शना। तथाहि–

अलसमन्थरदृष्टिरियं प्रिया
कृशतनुः परिपाण्डरगण्डका।
स्मरशरव्यथिताप्यमृतच्छटां
शशिकलेव दृशोरभिषिञ्चति।। ६।।

प्रियेदमेव लतागृहमभ्यागच्छतीव। तल्लतागुल्मान्तर्हितः पश्याम्येनाम्। (इति तथा करोति।)

(ततः प्रविशति कुन्तलिकाद्वितीया सत्यभामा।)

सत्यभामा – सहि कुन्दळिए कहि दाव ळदाघरं केत्तिअदूळं गंदव्वं प्पचळिदुं वि ण सक्कुणोमि। [सखि कुन्तलिके, कुत्र तावल्लतागृहम्? कियद्दूरं गन्तव्यम्। प्रचलितुमपि न शक्नोमि।]

कुन्तलिका– (स्वगतं) अह्मो अदिमेत्तं मअणवेअणाकिलसिदा विअ एसा दीसइ। (प्रकाशं) हला पेक्ख, अदूळेएव्व ळदाघरं। ताएहि। (इति परिक्रम्य) एदं ळदाघरं, प्पविसदु भोदी। [अहो, अतिमात्रं मदनवेदनाक्लेशिते-वैषा दृश्यते। हला पश्य, अदूर एव लतागृहम्। तदेहि। एतल्लतागृहं प्रविशतु भवती।] (सत्यभामा प्रविशति)

धारणावती– (उपसृत्य) एदं आसणं उववि्सदु भट्टिणी। [एतदासनम्। उपविशतु भट्टिनी।] (सत्यभामा आसने समुपविशति।)

कृष्णः – (स्वगतं) –

मदुत्सङ्गात्पीठ त्वमसि सुकृतिप्राप्तरमणी–
नितम्बस्पर्शं किं विरचितमपूर्वं तप इह।
अनायासेनैवं न यदि कथमेतादृशसुखं
तव स्याद्धिङ्मां धिक् तव तु जनिराप्ता हि नमया॥

कुन्तलिका– (पार्श्वमवलोक्य) हंजे, धारणावदि, गच्छ तुमं तुह कज्जस्स। [हञ्जे धारणावति, गच्छ त्वं तव कार्याय।]

धारणावती– जं आणवेइ। (निष्क्रान्ता) [यदाज्ञापयति।]

सत्यभामा – (दीर्घमुष्णं निःश्वस्य) सहि कुंदळिए एत्थवि ठादुं ण सक्कुणोमि। पेक्ख, मअणमहूसवकए ठाविदो उवरि महंतो दीवो विअ ज्जळदि चंदो। [सखि कुन्तलिके, अत्रापि स्थातुं न शक्नोमि। पश्य, मदनमहोत्सवकृते स्थापित उपरि महान्दीप इव ज्वलति चन्द्रः।]

कुन्तलिका– जइ कह्णमेहो आअदो हवे, तइ आतुहसंदाबो गमिस्सदि। [यदि कृष्णमेघ आगतो भवेत् तदा तव सन्तापो गमिष्यति।]

सत्यभामा – (सभ्रूभङ्गमवलोक्य) अळं इमिणा पडिहासेण। [अलमनेन परिहासेन।]

कृष्णः – (स्वगतं) अहो, मुखपुण्डरीकस्य स्पृहणीयता। कुन्तलिकायाश्च धन्यता–

सासूयमावलितकन्धरमायतार्क्षं
भ्रूभङ्गभिन्नतिलकं मुखपुण्डरीकम्।
उद्धृत्य किंचिदनया ददृशे कटाक्षैः
धन्येयमद्य न हि तादृशपात्रमासम्॥ ८॥

कुन्तलिका– (सस्मितं) ण मए कह्णो भणिदो किंदु णीळवळाहओ। [न मया कृष्णः भणितः, किन्तु नीलवलाहकः ।]

सत्यभामा – (दीर्घं निःश्वस्य) सो अणुहूदरुम्मिणीबाहुळदाणिब्भरा ळिंगणसुहो, कहं मह सआसं आअच्छिअ संदावंमोआवेदि।[सअनुभूतरुक्मिणीबाहुलतानिर्भरा-लिङ्गनसुखः कथं मम सकाशमागत्य सन्तापं मोचयति ?]

कृष्णः – (स्वगतं) –

त्वदङ्घ्रिपङ्कजद्वन्द्वसंवाहनकृते चिरम्।
तपस्यन्तममुं दासं किमेवं मनुषे प्रिये॥ ९॥

कुन्तलिका– अळं इमिणा। सिविणउत्तंतं कहइस्संत्ति भणिदं खु तुए। ता कहेहि तुवरिअइ मह हिअअं।

[अलमनेन। स्वप्नवृत्तान्तं कथयिष्यामीति भणितं खलु त्वया। तत्कथय। त्वरते मम हृदयम्।]

कृष्णः – ममापि त्वरते मनः।

सत्यभामा – सहि विसुमरिदो मअणसररंधिदहिअआए मए सो उत्तंतो। [सखि, विस्मृतो मदनशररन्ध्रितहृदयया मया स वृत्तान्तः।]

कृष्णः – (स्वगतं) नृशंसः खलु मदनहतकः। नवनीतकल्पमस्याः हृदयमपि विलापयति।

कुन्तलिका– हला, सुमरिअ कहेहि। [हला, स्मृत्वा कथय।]

सत्यभामा – सुमरिअ दाव कहइस्सं। तुमं दाव खणं गाही दक्खणा होहि। (इति ध्यानं नाटयति।) [स्मृत्वा तावत् कथयिष्यामि। त्वं तावत्क्षणं गृहीतक्षणा भव।]

कृष्णः – (सवैलक्ष्यं) अये नयन, पश्य, पश्य, यद्दर्शनीयं–

गगनदत्तविनिश्चलतारका
करतलेशयगण्डतला प्रिया।
निभृतमूर्तिरियं लिखितेव तं
स्मरति सभ्रुकुटि स्थपुटालिका।। १०।।

कुन्तलिका– अवि णाम सुमरिदम्। [अपि नाम स्मृतम्?]

सत्यभामा – सुमरिदं ; सुणोदु भोदी। [स्मृतम्। शृणोतु भवती।]

कुन्तलिका– ओहिदंह्मि। [अवहितास्मि।]

कृष्णः – (स्वगतं) अहमपि।

सत्यभामा – ळीळापडिच्छंदए तुए सहठिदाए किंविआळवंदीए महअग्गदो अंदळिक्खादो सुहदंसणो णःक्खत्तमाळा भळणो मोरकंधरासिणिद्धणीळवण्णो वळाहओ विअ।

(इत्यर्धोक्तौ लज्जां नाटयति।) [लीलाप्रतिच्छन्दके त्वया सह स्थितायाः किमपि आलपन्त्याः मम अग्रतोऽन्तरिक्षात्सुखदर्शनोनक्षत्रमालाभरणोमयूरकन्धरास्निग्धनीलवर्णो वलाहक इव।]

कृष्णः – अहो, अनिमिषतामुत्पादयति ममेयं–

त्रपाभरविनम्रास्या स्मितोज्ज्वलरदावलिः।
पादाङ्गुष्ठेन धरणीं लिखन्ती लम्बवेणिका॥ ११॥

कुन्तलिका– मह कट्ठिदुवि किं तुह ळज्जा? तदोतदो। [मां कथयितुमपि किं तव लज्जा? ततस्ततः।]

सत्यभामा – तदो सिरीकह्णो आअदो। [ततश्श्रीकृष्ण आगतः।]

कृष्णः – (स्वगतं) धन्योऽस्मि यतोऽहमनया गृहीतनामधेयः।

कुन्तलिका– तदो। [ततः।]

सत्यभामा – तदो खणमेत्तेण मंदभाइणीए अक्खिमग्गं उअज्झिअ अंदरिदो। [ततः क्षणमात्रेण मन्दभागिन्या अक्षिमार्गमुज्झित्वान्तर्हितः।]

कुन्तलिका– अह्मो, हत्थगदं खु कवळं ण वअणगदम्। [अहो, हस्तगतं खलु कवलं न वदनगतम्।]

कृष्णः – हन्त, विचित्रं खलु विधिविलसितम्। परस्परमनुरक्तयोस्स्वप्नेऽपि न समागमः।

सत्यभामा – तदो मह भाअहेअं उवाळभमाणा ठिदा। [ततो मम भागधेयमुपालभमाना स्थिता।]

कुन्तलिका– तदो। [ततः।]

सत्यभामा – तदो पुणोवि आळादो अणंगकिळसिदकिसविग्गहोक ह्णोवि अज्जुण व्व ळक्खिदो। [ततः पुनरपि आरादनङ्गक्लिष्टकृशविग्रहो कृष्णोऽपि अर्जुन इव लक्षितः।]

कृष्णः – (आत्मानं निर्वर्ण्य) सत्यमेतत्–

शैथिल्यमावहति सान्द्रनिबद्धमद्य
ग्रैवेयकं गलति मे वलयं च हस्तात्।
उत्सार्यते कृशभुजच्युतमङ्गदं च
वर्षावसानजलदप्रतिमात्मकान्तिः॥ १२॥

कुन्तलिका– (सहर्ष) पुणोवि किं दिट्ठो। [पुनरपि किं दृष्टः ?]

सत्यभामा – (सत्रपं) तदो मह पिट्टदो आअच्छिअ ळोअणजुअळं अ देण हत्थकमळेहि पिणद्धम्। [ततो मम पृष्ठतः आगत्य लोचनयुगलं च तेन हस्तकमलाभ्यां पिनद्धम्।]

कुन्तलिका– (सत्यभामां निर्वर्ण्य सस्मितं) अह्णो सिविणउत्तंतं भणंतीए तुह प्पच्छक्खे एव्वतणू कंटकिदा घम्मजळण्हाविदा अ। [अहो स्वप्नवृत्तान्तं भणन्त्यास्तव प्रत्यक्ष एव तनुः कण्टकिता। घर्मजलस्नापिता च।]

कृष्णः – (सत्यभामां विलोक्य) –

रोमाञ्चाञ्चितगात्रीयं स्वेदार्द्रलुलितालका।
स्मरबाणानुविद्धेव मृगाक्षी दृश्यतेऽधुना॥ १३॥

(सत्यभामा दुकूलेनाङ्गमाच्छादयति।)

कुन्तलिका– तदो। [ततः ।]

सत्यभामा – तदो सिविणे जह दिठ्ठो तहा। (इत्यर्धोक्तौ) अह्महे। (इति सहसोत्थाय परितः पश्यति) [ततस्स्वप्ने यथादृष्टः तथा अहो।]

कुन्तलिका– किं तुए तहा अहिलिहिदो। [किं त्वया तथाभिलिखितः ?]

सत्यभामा – आम। (इत्यन्वेषणं नाटयति।)

विदूषकः – (प्रविश्य) ही ही, मग्गेपडिदो एसो चित्तफळओ। एदस्सिं मह वअस्सो कह्नो केणवि ळिहिदो वट्टइ (निर्वर्ण्य) अह्महे प्पच्चक्खे ठिदोविअळिहिदो अवि णाम सच्चहामाए ळिहिदो हवे? होदु एदं मह वआस्सस्स दंसइस्सं। दाणिं महुवणे ळदाघर ठ्ठिदेंण देण होदवं तातत्थ एव्वगच्छह्मि। (इति परिक्रम्यान्वेषणव्यग्रां सत्यभामां विलोक्य) एत्थएळवट्ट इसच्चहामा, तावदंदरिदो पेक्खिस्सं किं अण्णेसिदित्ति (इति तथाकरोति) [ही ही, मार्गे पतित एषः चित्रफलकः। एतस्मिन्मम वयस्यः कृष्णः केनापि लिखितः वर्तते। अहो ! प्रत्यक्षे स्थित इव लिखितः। अपि नाम सत्यभामया लिखितो भवेत्? भवतु, एतं मम वयस्यस्य दर्शयिष्यामि। इदानीं मधुवने लतागृहस्थितेन तेन भवितव्यम्। तस्मात्तत्रैव गच्छामि। अत्रैव वर्तते सत्यभामा। तस्माल्लतान्तर्हितः प्रेक्ष्यामि किमन्विष्यतीति ?]

सत्यभामा – (सबाष्पं) एद्ध हवे, इदो वा हवे (इति सर्वतो दत्तदृष्टिः पश्यति।) [अत्र भवेत्, इतो वा भवेत्।]

विदूषकः – (स्वगतं) सच्चं एदाए णिवाडिदो। [सत्यमेतया निपातितः।]

कृष्णः – (सहर्षं)–

स्वयूथस्रस्तसन्त्रस्तकुरङ्गीशिशुदृष्टिवत्।
चञ्चला दृष्टिरद्यास्यास्सन्तोषयति मद्दृशौ।। १४।।

कुन्तलिका– सहि किं ळद्धो। [सखि, किं लब्धः।]

सत्यभामा – ण ळद्धो। (इति चिन्ताकुला तिष्ठति।] [न लब्धः।]

विदूषकः – दाणिं दाव कीळिस्सम्। (इति तस्याः पुरतः दण्डकाष्ठं पातयति।) [इदानीं तावत्क्रीडिष्यामि।]

सत्यभामा – (सोद्वेगं) हा हदम्हि अविहा अविहा। [हा हताऽस्मि अवाव।]

कृष्णः – (सहसोपसृत्य) –

मयि सति तव दासे प्राणकान्ते नितान्तं
भयमिदमुपजातं ब्रूहि यस्मात्तमद्य।
कुलिशनिभभुजेन प्रापयाम्यन्तकं द्रा–
क्स भवतु सुरनाथो यक्षरक्षोधिपो वा।। १५।।

सत्यभामा – सविस्मयव्रीडाभयमधोमुखी तिष्ठति।

विदूषकः – अह्मो प्पिअवअस्सो वि एत्थएव्व वट्टइ। (सहसोपसृत्य) वअस्स इमिणा दंडकट्ठेण ओरद्धं ता एदं अंदअंणेहि (इति दण्डकाष्ठंदर्शयति।] [अहो प्रियवयस्योऽप्यत्र एव वर्तते। वयस्य, अनेन दण्डकाष्ठेनापराद्धम्। तस्मादेतदन्तकं नय।] (सर्वे विहसन्ति)

कुन्तलिका– हला, चित्तगदो कह्णो प्पभ्भट्ठोगट्ठो होदु। दाणिं प्पच्छक्खे एव्व कह्णो आअदो पेक्ख [हला, चित्रगतः कृष्णः प्रभ्रष्टो भवतु। इदानीं प्रत्यक्ष एव कृष्णः आगतः। पश्य।]

सत्यभामा – णाहं कह्णं अण्णेसामि हंगमिस्सम्। (गन्तुमुद्युंक्ते) [नाहं कृष्णमन्विष्यामि, अहं गमिष्यामि।]

कृष्णः – (अर्गलीभूय) प्रिये अलमावेगेन –

कलभाषिणि दासेऽस्मि–
ह्यनुकम्पा स्मराग्निसन्तप्ते।
अकृतापराधमेनं
त्यक्त्वा गन्तुं किमेतदुचितं ते॥ १६॥

सत्यभामा – (स्वगतं) दाणिं किं करिस्सं? चिळप्पत्थिदं सअं सण्णिहिदंवि ळज्जा आळविदुं बाहेइ। [इदानीं किं करिष्यामि? चिरप्रार्थितं स्वयं सन्निहितमपि लज्जा आलपितुं बाधते।]

विदूषकः – वअस्स से हत्थकमळं गेह्णिअ संदावं मोआवेहि दाव। [वयस्य, अस्याः हस्तकमलं गृहीत्वा सन्तापं मोचय तावत्।] (नेपथ्ये कलकलः)

कृष्णः – सखे, कौमुदीमहोत्सवकृते देवी रुक्मिणी समागच्छति इव।

कुन्तलिका– (कृष्णमुपसृत्य) भअवदा देव्वेण महाप्पिअसही मा विसुमरीअदु। [भगवता देवेन मम प्रियसखी मा विस्मर्यताम्।]

कृष्णः – मद्वचसा ते प्रियसखी विज्ञाप्यताम्। अयं दासजनो न विस्मरणीय इति।

सत्यभामा – (स्वगतं) अम्हहे वंचिदा हवं ळज्जाए मंदभाइणी। (इति कृष्णमेव पश्यन्ती कुन्तलिकया सह निष्क्रान्ता।) [अहो वञ्चिताऽभवं लज्जया मन्दभागिनी।]

कृष्णः – कथं, गतैव चञ्चलाक्षी।
(ततः प्रविशति गृहीतोपहारैः परिजनैस्सह रुक्मिणी।)

रुक्मिणी – सहि! महुकरिए अवि णाम इमिणाकाळेण अज्जउत्तो महुवणे हवो। [सखि मधुकरिके, अपि नामानेन कालेनार्यपुत्रो मधुवने भवेत्?]

मधुकरिका – पेक्खदु देवी एत्थएव्व ळदाघरे वट्टइ [पश्यतु देवी। अत्रैव लतागृहे वर्तते।]

रुक्मिणी – (उपसृत्य) जेदु जेदु अज्जउत्तो। [जयतु जयत्वार्यपुत्रः।]

विदूषकः – सोत्थि भोदीए। [स्वस्ति भवत्यै।]

कृष्णः – (रुक्मिणीं करे गृहीत्वा) अलङ्क्रियतामासनमिदम्। (इति दर्शयति। रुक्मिणी समुपविशत्यासने)

विदूषकः – पेक्खदु भोदी णोणीदपिंडव्व ळक्खीअदि पुण्ण चंदो ताअभ्भच्चेहिणम्। [पश्यतु भवती। नवनीतपिण्ड इव लक्ष्यते पूर्णचन्द्रः। तदभ्यर्चय।]

रुक्मिणी – (पार्श्वमवलोक्य) आणेध दारिआओ ओवहारिअं अभ्भच्चेमि पुण्णचेन्दम्। [आनयत दारिकाः उपहारिकम्। अभ्यर्चयामि पूर्णचन्द्रम्।] (परिजनः परिकरानर्पयति।)

रुक्मिणी – (नाट्येन चन्द्रमभ्यर्च्य कृष्णमुपसृत्य) अज्जउत्त वंदामि। (प्रणमति) [आर्यपुत्र वन्दे]

कृष्णः – अलमलमायासेन (इति बाहू गृहीत्वा पार्श्व एवोपवेशयति।)

विदूषकः – सक्कुळिप्पमुहेहिं बह्मणं मं ण अब्भच्चेइ किम्? (शष्कुलिप्रमुखैः ब्राह्मणं मां नाभ्यर्चयति किम्?)

रुक्मिणी – (विदूषकमुपसृत्य) एसो उवहारो (इत्यर्पयति) [एष उपहारः।]

विदूषकः – (आदाय) सोत्थि भोदीए। [स्वस्ति भवत्यै।]

रुक्मिणी – किं गच्छह्म। [किं गच्छामः।]

कृष्णः – यथा रोचते देव्यै। (इत्युत्तिष्ठति) (सर्वे उत्थाय परिक्रामन्ति)

कृष्णः – (स्वगतं)

कामं सा हरिणाक्षी
  न हि सुलभा तथापि हृन्मम नु।
तामेवेच्छति शश्व–
  त्प्रहरति मदनो यतश्च मम हृदयम्॥ १७॥

(इति निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति शतधन्वा)

शतधन्वा – सत्राजिता मे सहसा प्ररूढा
मैत्री सविस्रम्भमथापि चिन्ता।
तस्यानुजो नीतियुतः प्रसेनः
शूरो यतोऽद्यापि हतो न युक्त्या॥ १॥

(चिन्तामभिनीय) किं करोमि यदि न हन्यते स प्रसेनहतकः। तदा यथाकथञ्चिल्लब्धमपि स्यमन्तकरत्नं न सुखाय–

हतो यदि स्यात्प्रबलः प्रसेनः
सत्राजितं तं सुसुखं प्रलोभ्य।
स्यमन्तरत्नं सहसापहर्तुं
शक्यं ददत्स्वर्णमनेकभारम्॥ २॥

(विचिन्त्य) तस्य प्रसेनस्य तावत्सर्वदा रणव्यसनं मृगयाव्यसनं च। तदिदानीं मृगयाकुतुकिनं तं कथमपि प्रोत्साह्य निहतानेकराजलोकस्य नगरोपान्तकान्तार चारिणः केसरिणः निशारणाय नियोक्ष्यामि तावत्। किञ्च परस्परं कृष्णप्रसेनयोः कथमपि वैरमुत्पादितम्। तदद्य रूढमूलं कर्तव्यम्। किञ्च कृष्णभक्तस्य सत्राजितोऽपि यथाकथञ्चित्कृष्णे दोषं प्रदर्श्य परस्परं वैरमुत्पादनीयम्। तदिदानीं प्रथमं तावत्प्रसेनमेव द्रष्टुं यास्यामि। (इति परिक्रम्य) (नेपथ्याभिमुखमवलोक्य चक्षुः प्रतिहतिमभिनीय) हन्त, स्यमन्तकरत्नालङ्कृतक न्धरो युगपदुदितसहस्रकिरणसहस्रप्रतिद्वन्द्वी प्रसेनः इत एवाभिवर्तते। तत्प्रतिपालयामि तावत् (तिष्ठति)

(ततः प्रविशति यथानिर्दिष्टः प्रसेनः)

प्रसेनः – (करतलेन भुजमास्फाल्य सगर्वं)–

महारण्ये क्षीबद्विरदगणकुम्भोद्दलनतः
प्रमत्तानां रोषाद्विकटगमनानां शिखरिषु।
मृगेन्द्राणां भीत्या शरनिकरवर्षात्प्रचलतां
कदा हत्वा यूथं मदममुमपास्यामि भुजयोः॥ ३॥

अथवा –

महारणमुखे चरन्निशितखङ्गधाराहति–
प्रभिन्नघनसन्निभेभपृथुकुम्भपीठो हठात्।
निकृत्तबलदर्पितक्षितिपतिक्षणक्षोभित–
क्षरद्रुधिरसेकतो भुजमदं क्षिणोमि क्षणात्॥ ४॥

शतधन्वा – हन्त, विधिर्मत्पक्ष्य एव।

प्रसेनः – अद्य तावन्मृगयायां प्रवर्तते मे मनः। तदायुधागारमेव गच्छामि।

शतधन्वा – (उपसृत्य) स्वागतं सुहृदे। क्वापि प्रस्थित इव।

प्रसेनः – मृगयायै प्रस्थितोऽस्मि। क्व प्रस्थितो भवान्?

शतधन्वा – भवद्दिदृक्षयैव समागतोऽहम्। अपि कुशलं सत्राजितः?

प्रसेनः – अथ किम्?

शतधन्वा – किमद्यापि कृष्णस्स्यमन्तकरत्नाभ्यर्थनाय भवद्भवनमागच्छति?

प्रसेनः – (विहस्य) स तु चोरः खलु। मयि स्थिते न पश्यति मद्भवनमार्गमपि।

शतधन्वा – अपहर्ता मृगाक्षीणामतिसन्धानतत्परः।
आसन्ने त्वयि दुर्धर्षे कथमायाति ते गृहम्॥ ५॥

प्रसेनः – आर्येण पुनः सर्वदा पुरुषोत्तम इति स एव स्मर्यते? किमत्र प्रतिविधातव्यम्?

शतधन्वा – (स्वगतं) मम तावदनुकूलतयैवोच्यते तावदनेन। (प्रकाशं) कृष्णनिषूदनात्किमन्यत्?

प्रसेनः – स तु वञ्चकः। किञ्च अप्रतिहतदिव्यचक्रधर इति चिन्त्यते। कथं तस्य निषूधनमिति?

शतधन्वा – सखे, मा तावदत्र चिन्ता। श्रुतं मया पूर्वं यश्च हन्ति नगरोपान्तकान्तारसंचारिणं केसरिणं स एव कृष्णस्य हन्तेति। स तु केसरी लीलयैव त्वया हन्यते यतो भवान्मृगयाकलाकोविदः।

प्रसेनः – (सहर्षं) साधु सखे, साधु। सम्यगभिहितम्। अहमपि मृगयायै जिगमिषुरायुधागारं प्रति प्रस्थितः।

शतधन्वा – (स्वगतं) हन्त, बलावलेपेन कृत्याकृत्यविवेकविकलोऽयं स्यान्नाम। इतोऽप्युत्तेजयाम्येनम्। (प्रकाशं) स तु कृष्णः आर्यदुहितरं सत्यभामामप्यपजिहीर्षतीति किंवदन्ती।

प्रसेनः – परस्त्रीलुण्टाकस्य तस्य किमन्यच्चौर्यमन्तरा?

शतधन्वा – तर्हि कदापि भविष्यति भवत्सायकशरव्यम्।

प्रसेनः – किमुक्तं कदापीति? शृणु तावदद्यैव–

मृगराजमहं वने चरन्तं
मृगयायां विशिखेन तं निहत्य।
हरणे परकन्यकाजनानां
निपुणं हन्मि रणे क्षणेन कृष्णम्॥ ६॥

(इत्युद्धतं परिक्रम्य निष्क्रान्तः।)

शतधन्वा – (सहर्षं) तत्कृतं यत्कर्तव्यम्। अन्यदवशिष्टं वर्तते। सत्राजितोऽतिसन्धानम्। तद्गच्छामि तावत्तद्भवनमेव। (इति निष्क्रान्तः)

(इति शुद्धविष्कम्भः)

(ततः प्रविशत्यासनोपविष्टोत्कण्ठिता सत्यभामा)

सत्यभामा – (दीर्घं निःश्वस्य) अह्मो, तइआविप्पलद्धह्मिलज्जाए मंदभाइणीः जइआ अग्गदो आअदोसोकह्णो, चित्तफलओवि कहिंविप्पभ्भट्ठो जेण महमणोविणोदणं हवे। पुणोवि तस्सदंसणं कहं होदित्तिणजाणामि। (विचिन्त्य) होदु तंउद्दिसिअ एक्कं पज्जवन्धणं करिस्सं (इति विचिन्त्य फलके लिखति) [अहो, तदा विप्रलब्धास्मि लज्जया मन्दभागिनी; यदा अग्रतः आगतस्स कृष्णः। चित्रफलकोऽपि कुत्रापि प्रभ्रष्टः, येन मम मनोविनोदनं भवेत्। पुनरपि तस्य दर्शनं कथं भवतीति न जानामि। भवतु। तमुद्दिश्यैकं पद्यवन्धनं करिष्यामि।]

(पटाक्षेपेण प्रविश्य कुन्तलिका)

कुन्तलिका– (ससम्भ्रमं) हला सच्चहामेउट्ठेहि उट्ठेहि तुहपिदबोप्पसे णोसमंदरअणाळंकिदकंदळो मिअआए प्पत्थिदो रहोविसज्जो, सोउण महुपाणप्पमत्तो स्समंदरअणस्स ओहरणे सदधणुअप्पमुहो रंधण्णेसित्ति सुणीअदि ता पेक्ख गदुअ तम्। [हला सत्यभामे, उत्तिष्ठोत्तिष्ठ।

तव पितृव्यः प्रसेनस्स्यमन्तकरत्नालङ्कृतकन्धरो मृगयायै प्रस्थितः। रथोऽपि सज्जः। स पुनर्मधुपानप्रमत्तः स्यमन्तकरत्नस्यापहरणे शतधन्वप्रमुखो रन्ध्रान्वेषीति श्रूयते। तस्माद्गत्वा पश्य तम्।

सत्यभामा – (सावेगं) मह तादो मा गच्छत्ति तं ण णिवारेइ किम् ? [मम तातो मा गच्छेति तं न निवारयति किम् ?

कुन्तलिका– तुह तादो देवमंदिळे पिणद्धकववाडो जपंतो वट्टइ ता ण किं वि भणादि। [तव तातो देवमन्दिरे पिनद्धकवाटो जपन्वर्तते। तन्न किमपि भणति।]

सत्यभामा – (ससम्भ्रमं) ता एहि गच्छह्म। [तदेहि गच्छामः।]
(इति फलकं विहाय निष्क्रान्ता।)

कुन्तलिका– (अधः पतितं फलकमादाय विलोक्य च) अह्महे कह्णं उद्दिसिअ सच्चहामाए पज्जबंधोवि किदो। [अहो, कृष्णमुद्दिश्य सत्यभामया पद्यबन्धोऽपि कृतः।]
(संस्कृतमाश्रित्य)–

वसन्तोऽयं ज्योत्स्ना विकचसुमसंसर्पिसुरभी
रसाले भृङ्गाणां विरुतिरपि नादः परभृताम्।
सुखात्मानो ह्येते मम परिणमेयुः प्रतिकलं
यदा त्वं सम्प्राप्तो न यदि परिभूतः प्रिय मया॥

(इति वाचयित्वा) अच्चरिअंखु, सुट्ठु ळिहिदं। होदु एदं कह्णस्स दंसइस्सं (इति परिक्रम्य नेपथ्याभिमुखम् अवलोक्य) अह्मो सच्चहामानिव्यअआए प्पत्थिदं प्पसेणं मात्ति णिरुणद्धिव ता त्थबंदरिदा पेक्खिस्सं,

एसो   किं करिस्सदित्ति। (इति तथा करोति) [अहो, कृष्णमुद्दिश्य सत्यभामया पद्यबन्धः कृतः। आश्चर्यं खलु सुष्ठु लिखितम्। भवतु तावत्। एतत्कृष्णाय दर्शयिष्यामि। अहो, सत्यभामा मृगयायै प्रस्थितं प्रसेनं मेति निरुणद्धीव। तस्मात्स्तम्भान्तर्हिता द्रक्ष्यामि। एष किं करिष्यतीति?]

(ततः प्रविशति सत्यभामया निवार्यमाणः प्रसेनः।)

प्रसेनः – (सक्रोधं) वत्से, मुञ्च माम्। नैवं निरोद्धव्यः।

सत्यभामा – (संस्कृतमाश्रित्य सानुनयं) तात, अस्य स्यमन्तक-रत्नस्य लुण्ठनकृते रिपुजनो बद्धादर इति श्रूयते। तदेक एवैवं वनं मा गच्छतु भवान्।

प्रसेनः – (स्वगतं) न कदापीयमेवम्। किमिदानीं निरुणद्धि माम्। (प्रकाशं) वत्से, मा भैषीः। शृणु तावत्–

निर्मोकोद्गतचण्डकुण्डलिनिभे मार्तण्डबिम्बोज्ज्वले
दोर्दण्डभ्रमणप्रचण्डशिखरेऽस्मिन्मण्डलाग्रे सति।
शश्वत्खण्डितशत्रुमण्डलगलच्छोणार्द्रधारे कन–
द्राङ्गेयत्सरुमण्डिते मम पुरः को वा समर्थो भवेत्॥

(इति कोशादुत्खातं खड्गं कम्पयित्वा दर्शयति।)

सत्यभामा – तात, एवमेवम्। तथापि रिपुमण्डलं स्मृत्वा बिभेमि। तस्मात्त्वं कण्ठे रत्नमेतत्कृत्वा तावदरण्यं मा गच्छ। (इति पादयोः पतति)

प्रसेनः – (बाहुभ्यां तामुत्थाप्य) वत्से, विदितमत्पराक्रमापि किमेवं ब्रवीषि? शृणु तावत्–

वज्री शूली चक्रपाणिर्हरिर्वा
हर्तुं रत्नं मद्गलात्किं समर्थः।
(विहस्य) अथवा–
एते युक्ता एकदा वाहिनीभिः
स्थातुं शक्ताः किं पुरो मे भवन्ति॥ ९॥

सूतः – (प्रविश्य) देव, सज्जो रथः।

प्रसेनः – अयमहमायातः। वत्से, मुञ्च माम्। (इति तां बलादुत्सार्योद्धतं परिक्रामति।)

सत्यभामा – (स्वगतं) अह्मो प्पत्थिदो एव्व। किं करिस्सम्। [अहो, प्रस्थित एव। किं करिष्यामि ?] (प्रकाशं) तात, अहमप्यागमिष्यामि। (इति रुदती तमनुधावति।)

कुन्तलिका– (स्वगतं) किण्णुखु एदं प्पसेणो एक्को एव्व प्पत्थिदो एसा उण एक्काएव्व तं अणुसरइ का गई। [किन्तु खल्विदं प्रसेन एक एव प्रस्थितः। एषा पुनरेकैव तमनुसरति। का गतिः ?

प्रसेनः – (परिवृत्यावलोक्य च स्वगतं) किमियमेवं बाधते माम्। प्रस्थितस्य मे प्रथमं तावदनया कृतः प्रतिषेधः। ततश्च निरोधनं पुनरभिहितं चाहमप्यागमिष्यामीति। सेयमनिमित्तपरम्परा खलु। (सवितर्कं) हुं भवतु। किमनया वीरस्य मे। (प्रकाशं) वत्से–

शार्दूला हरयो रुषाकुलदृशो व्यादाय भीमाननं
दंष्ट्रास्तीक्ष्णतराः प्रदर्श्य नखरान्निस्सार्य घोरारवाः।
उत्पुच्छाद्द्रुतमापतन्ति विपिने वत्से रथस्योपरि
क्रूरांस्तानवलोक्य कण्टकचिताभीता कथं स्थास्यसि॥

तदनुचिता प्रवृत्तिरीदृशी तावदबलायास्ते।

सत्यभामा – तव पार्श्वगताया मम कापि न भीतिः। तत्त्वया सहागमिष्यामि।

प्रसेनः – (स्वगतं) इयं मुग्धा न मां मुञ्चतीव। (प्रकाशं) एहि गच्छामः। (इति परिक्रम्य) मन्दमधिरोहतु स्यन्दनं भवती।

(सत्यभामा रथमधिरुह्योपविशति। प्रसेनोऽप्युपविशति)

कुन्तलिका – (विलोक्य) अह्मो से धीरत्तणं एक्कएव्वप्पत्थिदा कागई होदु एदं कह्णस्स णिवेदइस्सं (इति निष्क्रान्ता) [अहो अस्या धीरता। एकैव प्रस्थिता। का गतिः ? भवतु, एतत्कृष्णस्य निवेदयिष्यामि।]

(सूतः वाहान्प्रेरयति)

प्रसेनः – (रथवेगं निरूप्य) वत्से –

स्तम्भं गृहाणास्य करेण साधु
वातोत्थमावर्जय बाहुचेलम्।
उत्सारय त्वन्मुखकुन्तलालिं
दृढं निषीदेति रथोऽतिवेगात्॥ ११॥

सत्यभामा – अच्चरिअं आअदो एव्वरहो रण्णसआसं। ताद सो को णादिदूळे पळदसिळादळे दीसइ पिंगळ वण्णो एसो। [आगत एव रथोऽरण्यसकाशम्। तात, स कः नातिदूरे पर्वतशिलातले दृश्यते पिङ्गलवर्ण एषः।]

प्रसेनः – (निर्वर्ण्य) वत्से पश्य–

जिह्वाञ्चलेन जठरं चरणोदरं च
संलिह्य शश्वदवलीढविशालघोणः।

उद्धूतपिङ्गलसटाजटिलांसदेशो
निद्रोत्थितो हरिरयं विवृतायतास्यः ॥१२॥

सत्यभामा – ताद एसो एव्वणिहदणरेंदसदो बळदप्पिदो मिअळाओ हवे। [तात, एष एव निहतनरेन्द्रशतो बलदर्पितो मृगराजो भवेत्।

प्रसेनः – अथ किम् ?

सत्यभामा – (सभयं) ताद, तस्स सआसं मा गच्छदु भवम्। [तात, तस्य सकाशं मा गच्छतु भवान्।]

प्रसेनः – वत्से, मा भैषीः। तिष्ठ तावदस्मिन्नेव रथे। क्षणमात्रेण निहत्य तं प्रत्यागच्छामि। (इति रथादवरुह्य खड्गपाणिस्सोद्धतं परिक्रम्य निष्क्रान्तः।)

सत्यभामा – (नेपथ्याभिमुखमवलोक्य सोत्कम्पं) हा हंत ळंघिदोसींहे ण मह पिदव्वो कागई किं करिश्शं एत्थ कोवि ण हि तं मोआविदुं (इति परितः पश्यति) [हा हन्त, लङ्घितस्सिंहेन मम पितृव्यः। का गतिः ? किं करिष्यामि ? अत्र कोऽपि न हि तं मोचयितुम्।]

(सरभसं प्रविश्य कृष्णः)

कृष्णः – कथितं तावत्कुन्तलिकया स्यमन्तरत्नकन्धरेण प्रसेनेन सत्यभामापि मृगयायै तद्वनं गता, यत्र स सिंहो वसतीति। तन्महान्प्रमादः। तद्गच्छामि तावत्तत्रैव। (इति रथेन परिक्रम्य) हन्त सत्यभामा तु वेपमाना रथे तावदत्रैव तिष्ठति। (इत्युपसृत्य) प्रिये, मा भैषीः। मोचयामि प्रसेनम्। (इति निष्क्रान्तः)

सत्यभामा – (नेपथ्याभिमुखमवलोक्य सावेगं संस्कृतमाश्रित्य) हन्त मारितः अस्मत्पितृव्यः केसरिहतकेन यावदुपसर्पति कृष्णः। (निर्वर्ण्य) कोऽपि महान्वन्यो भल्लूकः निहत्य तं केसरिणं स्यमन्तकरत्नमादाय क्वापि निर्गतः। किं कर्तव्यम्? कृष्णोऽप्यन्तर्हितः। सारथे, किमद्य कर्तव्यम्। (इति रोदिति।)

सूतः – प्रतिपालयामस्तावत्कृष्णं यावत्प्रतिनिवर्तते।

कृष्णः – (प्रविश्य) कष्टं भोः कष्टं–

मृगराजहतो बत प्रसेनः
विनिहत्याथ स जाम्बवान्मृगेन्द्रम्।
हृतवान्मणिमेनमुज्ज्वलाभं
तमहं हन्त विजित्य लब्धवांस्तम्॥ १३॥

(इति सत्यभामामुपसृत्य) ननु अलं शोकेन रत्नमिदमानीतम्। [इति तत्करमवलम्ब्य दर्शयति।]
(ततः प्रविशति सत्राजिता सह शतधन्वा)

शतधन्वा – (स्वगतं) –

कथञ्चिदपि कृष्णेन तस्य सत्राजितो महत्।
वैरमुत्पाद्य मत्कार्यं साधनीयं मयाऽधुना॥ १४॥

सत्राजित् – (ध्यानमन्दमुपसृत्य) –

हे कृष्णाश्रितवत्सलाब्धितनयाश्लिष्टायतोरस्थल!
प्रोद्यत्सूर्यघृणिप्रबोधितकनच्छ्रीपुण्डरीकेक्षण।
श्रीमन्मङ्गलविग्रहापहसितप्रावृड्पयोदद्युते
विद्युद्भासुरपीतचेल करुणासिन्धोऽस्तु तुभ्यं नमः॥

शतधन्वा – (स्वगतं) किमिदं एवं प्रवृत्तिमान्सत्राजित्?

सत्यभामा – (सबाष्पं) तात, हरिणा मारितस्तव भ्राता।

सत्राजित् – (सावेगं) कथम् उपरतो वत्सः? (मूर्च्छितः पतति।)

सत्यभामा – समाश्वसितु। (इति वीजयति।)

सत्राजित् – (संज्ञामुपलभ्य)–

हा वत्स मद्भवनरत्न मदङ्कपुष्ट
मन्मानसानुसरणैकरसप्रसेन।
एकेन किं वसुमती भवतात्तभारा
त्यक्त्वा धरामहह हन्त गतोऽस्यकाले॥ १६॥

हा हरे, किं वत्सो मत्सहोदर एव भवद्वक्षिगतः आसीत्? हा वत्स,

मम तिरस्कृतिरन्यजनाद्भवे–
यदि भवान्करवालकरः क्रुधा।
झटिति हन्मि तमित्यभिवन्द्य माम्
अवददङ्ग वदेत्क इतः परम्॥ १७॥

कृष्णः – चलितं तु चलितमेव। तदलं शोकेन।

सत्राजित् – (मन्दमुत्थाय शिरसि हस्तमाधाय)–

यत्रास्ति वस्तु स्पृहणीयरूपं
जनैर्मुहुर्वाञ्छितमप्यलभ्यम्।
पतन्ति तस्मिन्विपदो जने द्रा-
गितीरितं यद्विबुधैर्ध्रुवं तत्॥ १८॥

(सत्यभामामवलोक्य) किमिदमुचितं त्वमबला तावदेकाकिनी निर्भीका कान्तारमागतासि ?

सत्यभामा – (सबाष्पं) स्यमन्तरत्नलोभादेवं कृतम्।

सत्राजित् – त्वं वत्सलश्श्रितजनेष्विति सुप्रसिद्धः
कृष्णाहमद्य भवता न विचिन्तितो हि।
मत्प्रीतिपात्रमयमित्यपि स प्रसेनो
नैवाद्य नाथ भवता परिरक्षितो हि॥ १९॥

कृष्णः – (सानुतापं) एवं भवितव्यता। किं कुर्मः ? इदमानीतं रत्नम्। (इत्यर्पयति)

सत्राजित् – यथा ते सङ्कल्पः तथा प्रचलतु नाम। (इति सत्यभामयासह निष्क्रान्तः)

शतधन्वा – (दीर्घं निःश्वस्य, स्वगतं) इदमाश्चर्यम्। भवतु नाम, कृष्णे वैरमेव द्रढयामि तावत्। (इति निष्क्रान्तः)

कृष्णः – (दीर्घं निःश्वस्य) हन्त, विधिविलसितं–

दृष्टा या प्रथमं मया प्रियतमा सौदामिनीव क्षणं
यत्र क्वापि तिरोहिता मम दृशोरान्ध्यं विधायाद्भुतम्।
दृष्टा या च मृगेक्षणा पुनरपि ज्योत्स्नेव मोहापहा
भ्रष्टा क्वापि पुनस्सुधेव सुतनुस्स्पृष्टाद्य सान्तर्दधे॥

(इति निष्क्रान्तः)

॥ इति तृतीयोऽङ्कः ॥

॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशति विदूषकद्वितीय उत्कण्ठितः कृष्णः।)

कृष्णः – सखे,–

तिर्यग्विवृत्य मधुरां निजकन्धरां या
पश्यन्त्यमुं सह तदा निरगच्छदाल्या।
सैवेक्ष्यतेऽद्य दश दिक्ष्वपि निर्गतापि
किं स्यादिदं मदननिर्मितमिन्द्रजालम्॥ १॥

केदानीं मनो विनोदयामि ?

विदूषकः – (स्वगतं) अह्मो से हिअए पंचसरसररंधिदे णकिंवि चिठ्ठदि त्ति जाणीअदि, जदो प्पुढमं सअंएव्व मंदारुज्झाणं गच्छह्मत्ति भणिअदाणिं एव्वं पुच्छदि (प्रकाशं) तुए भणिदं खु मंदारुज्झाणंगच्छह्मत्ति [अहो, अस्य हृदये पञ्चशरशररन्ध्रिते न किञ्चिदपि तिष्ठतीति ज्ञायते। यतः प्रथमं स्वयमेव मन्दारोद्यानं गच्छाम इति भणित्वा इदानीमेवं पृच्छति। त्वया भणितं खलु मन्दारोद्यानं गच्छाम इति।]

कृष्णः – तत्र किमिदानीम् ?

विदूषकः – तुह हिअअविणोदणकए एक्कं रमणिज्जं वत्थु दंसइस्संत्ति भणिदं मए। [तव हृदयविनोदनकृते एकं रमणीयं वस्तु दर्शयिष्यामीति भणितं मया।]

कृष्णः – तर्हि तत्रैव गच्छामः। (इति परिक्रामति)

विदूषकः – एदं उज्झाणं प्पविसदु भवं [एतदुद्यानं प्रविशतु भवान्।]

कृष्णः – (प्रविश्य) हन्त भोः –

केतकीक्रकचशस्त्रसन्तति-
स्सर्वतो विनिहिता मनोभुवा।
मन्निमित्तमिति चिन्तयाम्यहं
चित्तनिर्वृतिरिहापि नो भवेत्॥ २॥

(इति शिलातले समुपविशति) सखे, उक्तं हि दर्शनीयमस्तीति। दर्शय तावत्। येन मनोविनोदनं भविष्यति।

विदूषकः – (स्वगतं) क्खणंविअकीळिस्सं इमिणा (प्रकाशं) वअस्स पेक्खदु भवं रुक्खसिहरळग्गंमहुरचूअफळणिअरं तंभक्खणेण तुह महवि हिअअविणोदणं हविस्सइ। [क्षणमिव क्रीडिष्ये अनेन। वयस्य, पश्यतु भवान्। वृक्षशिखरलग्नं मधुरचूतफलनिकरम्। तद्भक्षणेन तव ममापि हृदयविनोदनं भविष्यति।]

कृष्णः – किमाम्रफलेन? तद्दर्शय यद्दर्शनीयम्।

विदूषकः – पेक्खदु भवम्। (इति चेलाञ्चलपिहितं चित्रफलकम् उद्घाट्य दर्शयति)

कृष्णः – (आदाय सादरं विलोक्य सवैलक्ष्यं) सखे-

प्रियया लिखितं चित्रं पश्यतो भ्रान्तिरद्य मे।
दर्पणे मत्प्रतिच्छायामहं साक्षात्करोमि किम्॥ ३॥

पश्य तावत्-
निर्निद्रत्वादलसलुलितं लोचनं मे तथैव
प्रेयस्यात्र प्रकटितमहो क्षामता गण्डभित्त्योः।

पाण्डुत्वं च स्मरशितशराघाततः कायकार्श्यं .
कान्तासक्तिप्रकटनपटोर्वक्र एवातिचिन्ता॥ ४॥

सखे, कुत्रोपलब्धोऽयम्।

विदूषकः – मग्गे ळद्धो। [मार्गे लब्धः।]

कृष्णः – कामपरवशया प्रियया मार्गे पातितेनानेन भवितव्यम्। सखे, अपि नाम दृष्टं भवता तस्या बुद्धिकौशलम्?

विदूषकः – (संस्कृतमाश्रित्य) अहं पुनस्सत्यमेव कृष्णं मन्यमानः कक्षे निक्षिप्यागतोऽस्मि।

कृष्णः – (विहस्य) तत्सत्यमेव। यदीदृशं सर्वमपि मदीयं कार्यं भवदायत्तम्।

कुन्तलिका– (प्रविश्य) एत्थएव्व वट्टइ किं वि पेक्खंतो वअस्सेण कह्णो तातस्स पिट्ठवट्टिणो रुक्खस्समूळे अंदळिआ हविअ पेक्खिस्सं किं पंक्खदित्ति। (इति तथा करोति) [अत्रैव वर्तते किमपि पश्यन्वयस्येन सह कृष्णः। तत्तस्य पृष्ठवर्तिनो वृक्षस्य मूलेऽन्तर्हिता भूत्वा प्रेक्ष्यामि।]

विदूषकः – तर्हि इदानीं कथय बुद्ध्या सत्यभामा वरिष्ठा अथवाहम्।

कृष्णः – (सस्मितं) भवानेव।

कुन्तलिका– (स्वगतं) अच्चरिअं किं प्पिअसहींए कह्णोअहिळिहिदो अज्ज दाव प्पच्चक्खकह्णस्स चित्तगदकह्णस्सअदोह्णंवि रुव्वभेदो ण मए ळक्खिदोप्पिअसहीए। बुद्धिविहवो ण वाआगोअळो। [आश्चर्यं किम्? प्रियसख्या कृष्णोऽभिलिखितः। अद्य तावत्प्रत्यक्षकृष्णस्य

चित्रगतकृष्णस्य च रूपभेद एव न लक्षितो मया। प्रियसख्या बुद्धिविभवो न वाग्गोचरः।]

कृष्णः – एवमपि मे सन्देहः। राजलोकं विहायापि नाम मयि स्निह्यतीति।

विदूषकः – किमेवं हत्थव्वणस्स किं दप्पणम् अवेक्खिदि। [किमेवं हस्तव्रणस्य किं दर्पणमपेक्ष्यते ?]

कृष्णः – सखे, सत्यमेतत्, तथापि मां विहाय निर्गतां तामनुचिन्त्य तर्कयाम्येवं–

प्रियो यदि स्यामहमायताक्ष्याः
दासोऽहमस्मीति मुहुर्निवेद्य।
मयार्थितापि प्रसभं प्रिया सा
गच्छेत्कथं तूर्णममुं विहाय॥ ५॥

विदूषकः – इत्थिआ खु सा। किं तुमं दिट्ठमेत्तेण ताए आळिंगदव्वो। [स्त्री खलु सा। किं त्वं दृष्टमात्रेण तयालिङ्गितव्यः ?]

कुन्तलिका– (सहसोपसृत्य) देव, भवंवि मह प्पिअसहीएप्पिओ पेक्खदुभवं प्पिअकज्जम्। (इति फलकमर्पयति) [देव, भवानपि मम प्रियसख्याः प्रियः। पश्यतु भवान्प्रियकार्यम्।]

कृष्णः – (आदायावलोक्य सहर्षं) सखे, मामुद्दिश्य प्रियया पद्यरचनापि कृता।

विदूषकः – किं पद्दं कादुं वि सा समत्था ? [किं पद्यं कर्तुमपि सा समर्था ?

कृष्णः – शृणु तावत् –

वसन्तोऽयं ज्योत्स्नाविकचसुमसंसर्पिसुरभी
रसाले भृङ्गाणां विरुतिरपि नादः परभृताम्।
सुखात्मानो ह्येते मम परिणमेयुः प्रतिकलं
यदा त्वं संप्राप्तो न यदि परिभूतः प्रिय मया॥६॥

विदूषकः – (संस्कृतमाश्रित्य) अपि नामेदानीं ज्ञातं त्वमपि तस्याः प्रिय इति? भवतु तावत्। सा पुनस्तव परिभवस्य फलमनुभवतु नाम।

कृष्णः – सत्यमभिहितम्।

विदूषकः – समानीतप्रियवृत्तान्तायास्तवेदं पारितोषिकम्। [इति कृष्णहस्तात्कटकमवमुच्य ददाति।]

कृष्णः – (सस्मितं) महान्वदान्योऽसि। (कुन्तलिका गन्तुम् उद्युंक्ते)

कृष्णः – तिष्ठ तावत्।

विदूषकः – किं भवं अण्णंवि देदि? [किं भवानन्यदपि ददाति?]

कृष्णः – अहमपि मद्दशां तावदावेदयामि तस्यै। (इति फलके विलिख्य दातुमिच्छति।)

विदूषकः – हं वि सुणोमि दाव किं ळिहिदं तुएत्ति। [अहमपि श्रृणोमि तावत् किं लिखितं त्वयेति?]

कृष्णः – (वाचयति) –

भवदीयघोरविरहातुरं प्रिये
विविधप्रसूननिचयं प्रदर्श्य माम्।
मधुमास एष मदनानलाकुलं
प्रतिभाति हन्त गिलतीव साम्प्रतम्॥ ७॥

विदूषकः – तुए वि सुट्ठु भणिदम्। [त्वयापि सुष्ठु भणितम्।]

कृष्णः – अयि कुन्तलिके, लेखमेनं प्रापय सत्यभामाम्। (इति ददाति)

कुन्तलिका– तहा (इत्यादाय परिक्रम्य) धण्णा खु सा (इति निष्क्रान्ता) [तथा। धन्या खलु सा।]

विदूषकः – अह्मो संझावि ओणदा किं एत्थएव्व चिट्ठइ भवम्। [अहो, सन्ध्याप्युपनता। किमत्रैव तिष्ठति भवान् ?]

कृष्णः – कथं सायमप्युपनतम् (प्रतीचीं दिशमवलोक्य) –

सञ्चारेण परिश्रान्तो रश्मिं संहृत्य भास्करः।
पश्चिमाद्रितटादब्धिं मिमंक्षुरिव गच्छति॥ ८॥

किञ्च –

कादम्बास्ततदीर्घिकातटममी प्रोज्झित्य यान्त्यालयं
स्वस्तम्भेषु शिखावला उपविशन्त्यारूढनिद्राकुलाः।
यान्त्यद्य भ्रमराः प्रपासलिलजान्युत्सार्य नीलोत्पलं
कोक्यो भाविवियोगदुःखविधुराः पश्यन्ति यान्तं रविम्॥

विदूषकः – ताउट्ठेहि गच्छह्म। [तदुत्तिष्ठ गच्छामः।]

कृष्णः – (अनाकर्ण्येव) – सखे –

लज्जाविस्मयभीतिभिः पुलकिता स्वेदार्द्रवक्त्राम्बुजा
ताम्रक्षामकपोलमण्डलतला कम्पाकुलोच्चस्तनी।
लोलाक्षी विपिने तदा खलु मया दृष्टा यथा वल्लभा
सर्वत्राप्यनिशं तथैव रमणी संवीक्ष्यते मानिनी॥

विदूषकः – ता दाणिंकिं करणिज्जम्। [तर्हीदानीं किं करणीयम् ?]

कृष्णः – न किमपि। पुनरपि कथं तदवलोकनमिति।

विदूषकः – (ऊर्ध्वमवलोक्य) हीही वअस्स, पेक्खपेक्ख मोदओ केण वि गिव्वाणेण णिवाडिदो हवे अविणामणिवडे मह्चेळंचळे। (इति चेलाञ्चलं दर्शयति।) [ही ही वयस्य, पश्य पश्य, मोदको केनापि गीर्वाणेन निपातितो भवेत्! अपि नाम निपतेत् मम चेलाञ्चले।]

कृष्णः – मूर्ख, अर्धचन्द्रोऽयं पश्य –

कलङ्कनीलोत्पलपत्रकान्ता
रक्तेन काचेन विनिर्मितश्च।
सुधासवोऽयं चषको रजन्या
विभाति विन्यस्त इवार्धचन्द्रः॥ ११॥

विदूषकः – ता एसो मोदओ णहि (दीर्घं निःश्वस्य) बुहुक्खिदेणमएएव्वंमंतिदम्। [तर्हि एष मोदको नहि। बुभुक्षितेन मयैवं मन्त्रितम्।]

कृष्णः – सखे, पश्य तावद्रजन्या रामणीयकं –

निद्रासक्ता इव विटपिनो निश्चला वाय्वभावात्
अन्तर्भृङ्गैः कमलमुकुलैर्निस्तरङ्गास्सरस्यः।
श्रोत्रोद्भेदी प्रसरति रवो झिल्लिकानां समन्तात्
पातुं ज्योत्स्नां वियति विचरन्त्युच्चरावाश्चकोराः॥

विदूषकः – ता उट्ठेहिप्पासादं एव्वगच्छह्म। [तर्हि उत्तिष्ठ। प्रासादमेव गच्छामः।]

कृष्णः – (उत्थाय दीर्घं निःश्वस्योर्ध्वमवलोक्य) सखे, अपि नाम दृष्टं –

प्रतीपं धावद्भिर्विशदजलदैरावृततया
कलाशेषोऽभ्यायानिव विधुरुडुव्रातकलितः।
अनङ्गेनोत्सृष्टो निशिततरकोटिः परिकिर–
त्स्फुलिङ्गौघोऽभ्यायान्शर इव लसत्यद्य वियति॥ १३॥

(इति विदूषकेन सह निष्क्रान्तः)

॥ इति चतुर्थोऽङ्कः ॥

॥ पञ्चमोऽङ्कः ॥

(ततः प्रविशति कञ्चुकी)

कञ्चुकी – (दीर्घं निःश्वस्य) हन्त, जरा तावत्समुत्पन्ना नवेति मे सन्देहः। यतः–

नमयति शिरस्सेवा कम्पं तनोति तनौ दृशौ
तिमिरयति च प्रायो दण्डं ददाति सदा करे।
हरति गमनं स्वैरं भीतं तनोति मनस्तथा
बधिरयति च श्रोत्रे बाल्यात्प्रभृत्यत एव मे॥

कष्टं भोः कष्टम्। न पारयामि तावदवरोधपरिदेवनं श्रोतुम्। क्लेशावहं खलु स्त्रीजन्म। (सनिर्वेदहासं)–

कवयो वदन्ति नेत्रं
वदनं चरणं करं च वनितानाम्।
पङ्कजमिति प्रमोहा–
दहन्तु मन्ये शरीरमपि तासाम्॥ २॥

दुरितमन्तरा नैतादृशी दशा सम्भवति। प्रसेनभार्या पुनः परिदेवनेन विलापयत्यवरोधजनहृदयम्। तत्सान्त्व- नैकतानेन सत्राजिता तावदाज्ञप्तोऽस्मि। भोः, पारियात्रक! प्रचलिष्यति भगवतः सान्ध्यः पूजाविधिः। तत्प्रसादं कुसुमादिकमुपनय। अहं पुनरत्रैव प्रसेनभार्यामेनां समाश्वासयन्नस्मि इति। तत्प्रस्थितोऽस्मि। (समन्तादवलोक्य) सायं संध्याप्युपनतैव–

अर्यमा चरमशैलभृङ्गभा–
क्पूर्वदिक्कृतमुखो गतप्रभाम्।
तां विलोक्य निजकर्मवश्यतां
सूचयन्निव स याति रागतः॥ ३॥

तदहमपि यामि तावन्निजकर्म कर्तुम्। (इति निष्क्रान्तः)

(शुद्धविष्कम्भः)

(ततः प्रविशति शतधन्वा)

शतधन्वा – (श्मश्रुकलापमङ्गुलिमुखेन परामृशन्) साधु विधे, साधु। मत्पक्ष्योऽसि। यतो मया यथा चिन्तितं तथैव निर्वर्तितं भवता। (विचिन्त्य) तत्स्यमन्तकरत्नं सत्यभामाञ्च वशीकर्तुं चौर्यमन्तरा नान्यमुपायं पश्यामि। तदधुना तद्दुःखसमभागिनेव तं सत्राजितमनुसृत्य तत्समाश्वासनपरेणेव स्थित्वा तद्भवने क निहितं तद्रत्नं क वा स्वपिति सत्यभामा? एतदपहरणाय केन पथा गन्तव्यम्? एतदखिलमप्यवश्यं ज्ञातव्यम्। तत्तद्भवनमेव यास्यामि तावत्। (इति निष्क्रामति)

(ततः प्रविशति निजसद्मन्यासनोपविष्टश्शोकाकुलः सत्राजित्)

सत्राजित् – (दीर्घं निःश्वस्य) –

स्यमन्तकमणिर्यदा सवितृसन्निधेरुज्ज्वलः
मया समुपसादितो बत तदा प्रभृत्यन्वहम्।
निरन्तरभयावहा जनविरोधसम्पादिनी
ह्यनर्थकपरम्परापरिपतत्यनागस्यपि॥ ४॥

किमिदं न तावदहं तादृशभाग्यवान्किमु?

शतधन्वा – (उपसृत्य) किमिदं चिन्ताकुल इव?

सत्राजित् – निर्निरोधो हि प्रसेनभार्यायाश्शोकः। (इत्यासनं दर्शयति)

शतधन्वा – (उपविश्य) को वा जानाति विधिविलसितम्? अतर्कितोपनताशनिपात इव प्रसेने मृत्युरापतितः।

सत्राजित् – कया विधया वर्ण्यतां भवितव्यता?

शतधन्वा – अपि नाम ददौ भवते तद्रत्नं स कृष्णः?

सत्राजित् – अथ किम्? (सावेगं) हन्त क निहितं मया? (विचिन्त्य) आं ज्ञातं प्रसेनभार्यां सान्त्वयितुमवरोधं गतोऽहं तत्रैव निक्षिप्तवान्।

शतधन्वा – (स्वगतं) तद् ज्ञातं यद् ज्ञातव्यम्। (नेपथ्ये शङ्खध्वनिः) हन्त, दश घण्टाशंसिनी शङ्खध्वनिरीतिः। अलं जागरेण। स्वपितुमर्हति भवान्।

सत्राजित् – हुं, निद्रैव नायाति।

शतधन्वा – चलितं तु चलितमेव। पश्यतु भवान्–

निश्शब्दा तिमिरावृता गतमरुच्चारास्फुरत्तारका
ध्वान्तान्तर्विनिगूढ मन्दिरततिर्निष्पन्दवृक्षावलिः।
भुक्कुर्वच्छुनकालिसेवितपुरीप्रान्ता सझिल्लीरवा
निद्रासक्तजनाधुना तु रजनी विश्रान्तिसन्दायिनी॥

तद्यातु भवान्संवेशाय। अहमपि यास्यामि तावत्।
(इत्युत्थाय निष्क्रान्तः)

सत्राजित् – (दीर्घं निःश्वस्य)–

यद्यद्भव्यं भवत्वद्य पूर्वकर्मानुगं फलम्।
सोढुं सिद्धोऽस्मि तत्सर्वं दुरितैकनिकेतनः॥ ६॥

(इत्युत्थाय) गच्छामि तावत्संवेशाय। (इति परिक्रम्य पर्यङ्के शेते।)

(ततःप्रविशतिनीलकर्पटावगुण्ठितमस्तकःआगुल्फावलम्बिनीलकञ्चुकाच्छादितशरीरश्शतधन्वा)

शतधन्वा – रे रे परस्त्रीलुण्टाक, गोपाल, भवन्तमतिसन्धाय शूलमारोपयिष्यामि। शतधन्वाहमस्मि। (सर्वतो विलोक्य) हन्त, तमःप्रसरः पुरो गन्तुमेव पन्थानं न ददातीव। हुं तथापि–

गारुत्मतोपलकृतायतदीर्घगाढ–
प्राकारमण्डलपिनद्धदिशेव रात्रिः।
सिद्धाञ्जनं नयनयोरुपसज्जयन्ती
स्तेनानिवोपकुरुते परिलुण्ठनाय॥ ७॥

(आत्मानं निर्वर्ण्य) तिमिरसावर्ण्यान्न कोऽपि मामभिजानाति।

नीलांशुकाच्छादितमङ्गमद्य
तमोमषीलिप्तमिवातिगाढम्।
स्पर्शानुमेयं हि मयैव कृच्छ्रा-
त्कथं भवाम्यन्यजनेक्षितोऽहम्॥ ८ ॥

(विचिन्त्य) अनेन कालेन सर्वेऽपि निद्रालवस्स्युः। तद्गच्छामि तद्भवनमेव। (मन्दं परिक्रम्य) क नु खल्वागतोऽस्मि? (परितो निर्वर्ण्य) प्राप्तोऽस्मि दिष्ट्या तद्भवनमेव यत्रास्ति स्यमन्तकमणिः। (कतिचित्पदानि गत्वा) अत्र हि-

द्वारपालाः परिश्रान्ता निषण्णा एव निर्भयम्।
आत्मानमपि विस्मृत्य स्वपन्त्येते सुनिश्चलम्॥ ९॥

(पुरतो विलोक्य)-
अर्गलघटितकवाटं
द्वारं तस्मान्न गन्तुमन्तस्स्यात्।
दृढतरभित्तिगृहं त-
त्सम्प्रति सुषिरं विधातुमपि नालम्॥ १०॥

तत्केन पथान्तः प्रविशामि? (तत्र तत्र विलोक्य सहर्षं) अत्र उपर्युद्घाटितकवाटं वातायनमेकं दृश्यते।
रत्नदीपकिरणा गवाक्षतो
निस्सरन्ति परितस्समुज्ज्वलाः।
वारिवाहपिहितस्य भास्वतो
दीर्घघृष्टय इवाभ्ररन्ध्रतः॥ ११॥

तन्मन्दमधिरुह्य शलाकामुत्पाट्य प्रविशामि तावदभ्यन्तरम्। (इति तथा कृत्वा, परितो विलोक्य) हन्त, अवरोधमेवागतोऽस्मि। अत्र हि–

अत्यर्थं परिदेवनश्रमवशाच्छुष्के हृदि स्वं करं
विन्यस्याश्रुजलाविलैर्विलुलितैः केशैः पिनद्धानना।
विस्मृत्यात्मशरीरमप्यनुचिते क्षोणीतले शीतले
हन्तेयं स्वपिति प्रसेनमहिषी शोकेन सन्तापिता॥

तदन्यतो गच्छामि। (इति परिक्रम्याग्रतोऽवलोक्य)

द्रवीकृतस्रावितहेमधारा
किं वा तटिच्चञ्चलताविमुक्ता।
केयं शयाना निजदेहकान्त्या
निमीलयत्यत्र ममाक्षियुग्मम्॥ १३॥

(निर्वर्ण्य सहर्षं) अहो प्रियदर्शना सत्यभामा –

निद्रावशाच्च्युतकुचांशुकपल्लवेयं
स्रस्तोपधानशयनार्धकृतार्धदेहा।
धम्मिल्लबद्धगलितग्लपितस्तनाग्र–
लोलप्रसूनवलया स्वपिति प्रिया मे॥ १४॥

हन्त अस्या मुखपुण्डरीकान्नैव निवर्तते मन्नयनयुगलम्।

निष्पन्दपक्ष्मनतसुभ्रुनिमीलिताक्षं
निश्चञ्चलालकललाटमनल्पकान्ति।
ईषत्स्फुरद्दनशोभ्यरुणाधरञ्च
वक्त्रं विहाय नयनं न निवर्तते मे॥ १५॥

क्व निहितं स्यात्तद्रत्नम्? प्रथमं तावत्तदपहरामि। (इत्यन्यतो दत्तदृष्टिस्सहर्षं)–

अभितोऽप्यनेकवर्णा–
न्विकिरत्किरणान्स्यमन्तरत्नमिह।
भास्वद्बिम्बमिवेदं
प्रभया नयने निमीलयत्याशु॥ १६॥

तदिदमपहरामि। (इति निश्शब्दं गत्वा रत्नमादाय त्रिगुणीकृतेन चेलेन पिधाय च) कथमतिवाह्या सत्यभामा? (इत्युपसर्पति)
(सत्यभामा परिवृत्य शेते)

शतधन्वा – किमिदं –

सौदामिनीव परिवर्तनतो मृगाक्षी
मल्लोचनप्रतिहतिं क्षणतो विधाय।
बाहूपधाननिहितात्मकपोलपालिः
निद्राति हन्त शयनाहितवामपार्श्वा॥ १७॥

(नेपथ्ये) हा वत्स, प्रसेन, कथं गतोऽसि?

शतधन्वा – (आकर्ण्य सावेगं) हन्त, प्रबुद्ध इव सत्राजित्। तदिदानीं न स्थातव्यमत्र। कथं बहिर्गच्छामि? (ससम्भ्रमं परितो विलोक्य) अस्मदुत्पाटितशलाकाद् वातायनादेवोल्लङ्घ्य यास्यामि। (इति निष्क्रान्तः)
(पुनर्नेपथ्ये) हा धिक्, केनाप्यपहृतं रत्नं नैव दृश्यतेऽत्र निहितम्।

(ततः प्रविशति अन्वेषणं नाटयद्भिः परिजनैः परिवृतस्सत्राजित्)

सत्राजित् – (दीर्घं निःश्वस्य) –

अभाग्यस्य कथं तिष्ठेत्सकाशे रत्नमुत्तमम्।
अत एव गतं क्वापि भाग्यवान्यस्तदन्तिकम्॥ १८॥

(सावेगं) अत्र तावत्कवाटमुद्घाटितम्।

परिजनः – (सावेगं) उवरि अवरोहजाळसळाइआ उप्पाडिदा (उपरि अवरोधजालशलाकिकोत्पाटिता।)

सत्यभामा – (सावेगमुत्थाय) किण्णु खु एदम्। [किन्नु खल्वेतत्?]

चेटी – णहि स्समंदरअणम् [न हि स्यमन्तकरत्नम्।]

सत्यभामा – केण ओहरिदं हवे। [केनापहृतं भवेत्?]

सत्राजित् – कः कोऽत्र भोः?

द्वारपालकः– (प्रविश्य) आणवेदु अज्जो। [आज्ञापयत्वार्यः।]

सत्राजित् – पश्य तावद्भगवन्मन्दिरम्। अपि नाम यत्किञ्चिदपहृतम् इति?

शतधन्वा – (सरभसं स्वेन वेषेण प्रविश्य) किमिदं उषस्येव प्रबुद्धास्सर्वे? कुतो वायं सम्भ्रमः?

सत्राजित् – न दृश्यते रत्नम्। केनाप्यपहृतं स्यात्।

शतधन्वा – कृष्णेनैव। न केनाप्यन्येन।

सत्राजित् – स तु नैवं कुर्यात्।

शतधन्वा – **बाल्यात्प्रभृति चौर्यैकसक्तः कृष्णः कथं भवान्।**
न कुर्यादिति विस्रम्भाद्ब्रवीति स तु वञ्चकः॥ १९॥

सत्राजित् – हन्त न कदाप्येवं –

लीलामानुषविग्रहस्स भगवान्स्वेच्छाजनिस्सर्वतो
व्याप्तश्चक्रधरो गुणैकवसतिर्भक्तावनैकत्वरः।
मद्भाग्यादिह यादवेषु कृपया लब्धात्मजन्मा हरिः
तस्मिन्दोषलवोऽपि नास्ति किमिदं प्रोक्तं त्वयैवं सखे॥

शान्तं पापं शान्तं पापम्। (इति परिजनैर्निष्क्रान्तः)

शतधन्वा – किमिदमेवम्? (विचिन्त्य) भवतु, युक्त्या तावदपहरामि सत्यभामाम्।

(इति निष्क्रान्तः)

॥ इति पञ्चमोऽङ्कः ॥

॥ षष्ठोऽङ्कः ॥

(ततः प्रविशति कामन्धरो नाम कलिङ्गदेशीयो विप्रः)

कामन्धरः – (श्मश्रुकलापं परामृशन्) शतधन्वना समाहूतः कामन्धरोऽस्मि।

यथाभिलषितं रूपं मन्त्रौषधिबलादहम्।
प्राप्य कार्यं तु कर्तव्यं साधयामि धनेप्सया॥ १॥

(अध्वश्रममभिनीय) हन्त, चण्डकिरणश्चण्डताम् उपगतः।

सूर्यातपप्रतिहतारुणनेत्रयुग्मः
स्वेदाम्बुपूररचितस्नपनश्रमार्तः।

अध्वा नखंपचसुधूलिवृतः कथं वा
पद्भ्यां व्रजामि मधुरां बहुदूरगम्याम्॥ २॥

(इति परिक्रामति)

(ततः प्रविशति विरोचकः)

विरोचकः – (दीर्घंनिःश्वस्य) हन्त, चण्डकिरणस्तप्तशलाकानुकारिभिर्मयूखैः परितुदति मस्तकम्। आतपे तावन्नेत्रमुन्मीलयितुमपि न शक्नोमि। सुदूरं गन्तव्यम्। किं करोमि? दुःखमयी परसेवा। मत्स्वामी शतधन्वा तु सत्वरं प्रयाहि कलिङ्गदेशं, तत्र ग्रामवासिने कामन्धराय दातव्येयं पत्रिका इति प्रेषितवान्। ब्रह्मबन्धुस्स तु कामन्धरः प्रागेव निवेदितवृत्तान्तोऽपि चिरयति। मया तावदधुना गन्तव्यं संवृत्तम्। (इति परिक्रम्य) हन्त, दिष्ट्या समागच्छातीव। (इति निर्वर्ण्य)

अयं हि –

स्थूलोष्णीषपिनद्धमस्तकतलस्स्निग्धाञ्जनाक्तेक्षणः
स्थूलश्मश्रुकलापसक्तहनुरप्यावद्धकूर्चाञ्चलः।
फालन्यस्तसुशोणनिस्तलततश्रीचन्दनस्थासकः
काषायाम्बरवर्मभाग्विलसति ग्रीवात्तरुद्राक्षकः॥ ३॥

(इत्युपसृत्य) भोः कामन्धर, अपि स्वागतम्। दुर्गतस्य द्रविणभार इव दिष्ट्या दृष्टिगोचरोऽसि। (इति पत्रिकां ददाति।)

कामन्धरः – (पत्रिकामुद्घाट्य विलोक्य) एतदर्थमेवागतोऽस्मि। हन्त, महानातपः। इतोऽपि मधुरां प्रति कियद्दूरं गन्तव्यम्?

विरोचकः – ननु सन्निहितैव –

सौवर्णसौधविलसत्कलशप्रभाढ्या
वातायनोदरविसृत्वररत्नकान्तिः।
चञ्चन्निकेतनशिरोऽञ्चितकेतुपंक्तिः
सङ्क्रन्दनायुधवृतेव पुरी विभाति॥ ४॥

कामन्धरः – (सानन्दं) निवेदय तावच्छतधन्वने सिद्धोऽयं कामन्धरो मधुरामागत इति।

विरोचकः – तथा (इति निष्क्रान्तः)

कामन्धरः – (सचिन्तं) कुत्र कथमवलोकनीया सत्यभामा ? भवतु, प्रथमं प्रविश्य नगरं यथासमयं द्रक्ष्यामि। (इति निष्क्रान्तः)

(शुद्धविष्कम्भः)

(ततः प्रविशति धौतदुकूलालङ्कृता पुष्पापचयं नाटयन्ती सत्यभामा)

सत्यभामा – (कुसुमापचयश्रममभिनीय परितो विलोक्य) किण्णु खु दाणिं वि ण आअदा कुंदळिआ। [किन्नु खलु इदानीमपि न आगता कुन्तलिका ?]

कामन्धरः – (प्रविश्य) (परिभ्रमणखेदमभिनीय, परितो विलोक्य सहर्षं) अत्र तावन्मन्दमान्दोलितव्रतिततितिश्शीतल शीकरकणवाही वाति मन्दं गन्धवहः। तदिदानीमारामेऽस्मिन्ननोकहप्रच्छायशीतले तले कञ्चित्कालं विश्रान्ति सुखमनुभवामि। (इति तथा करोति।)

सत्यभामा – महुवणे दाव मअणभच्छणं कादव्वं ता तुमं पुढमं महुवणं गच्छ, हंउण अब्भच्छणपरिअरं आणीअ आअमिस्संत्ति ताए भणिदं, अण्णंअ तत्थमहुअरो णिअवअस्सेण आअमिस्सदित्तिअ। (इति कुसुम-भाजनं पार्श्वे निधाय शिलातले समुपविशति) [मधुवने तावन्मदनाभ्यर्चनं कर्तव्यम्। तत्त्वं प्रथमं मधुवनं गच्छ। अहं पुनरभ्यर्चनपरिकरमानीयागमिष्यामीति। अन्यच्च, तत्र मधुकरो निजवयस्येनागमिष्यतीति च।]

कामन्धरः – (विलोक्य) केयमेकाकिनी ?

मन्दस्पन्दितगन्धवाहतरला नीलालकाढ्यालिका
चिन्तानिस्तरलायतासितमनोहारीक्षणा निश्चला।
दन्तच्छेदकपोलपालिरमलग्रीवात्तमुक्तासरा
ज्योत्स्नाकल्पदुकूलमञ्जुलतनुर्मञ्झाग्यतस्तिष्ठति।। ९।।

सत्यभामा – (दीर्घं निःश्वस्य) हिअअ समस्ससिहि। कुदो मुहा संकप्प सोपाणालिं आरुहिअ खिज्जसि। तुह संदावं मोआविदुं सोउणकह्लोणआअच्छइ। [हृदय, समाश्व-सिहि। कुतो मुधा सङ्कल्पसोपानालिमारुह्य खिद्यसि ? तव सन्तापं मोचयितुं स पुनः कृष्णः नागच्छति।]

कामन्धरः – (आकर्ण्य) इयमेव सत्यभामा। नात्र विचिकित्सा। तथापि क्षणमिव निरीक्षे पुनरपि किं वदतीति ?

सत्यभामा – (संनिःश्वासं) मह सही कुंदलिआ भणादि हला सच्चहामे सो कह्लो अणिसं तुमंएव्व चिंदअंतोकिलिसिदो वट्टइ त्ति। [मम सखी कुन्तलिका भणति– 'हला सत्यभामे, स कृष्णोऽनिशं त्वामेव चिन्तयन्क्लिष्टो वर्तते' इति।]

कामन्धरः – दिष्ट्या इयमेव सत्यभामा। तदिदानीमनायासेन परिगृहीतकृष्णरूपोऽहं नयामि सुदूरमेनाम्। (इति प्रणिधानेन कृष्णरूपं परिगृह्य सहर्षम्) अहो ! कृष्णस्संवृत्तोऽस्मि। तथाहि–

आलोलनीलचिकुरः कमलायताक्षः
पीताम्बराञ्चितकटिर्विपुलाढ्यवक्षाः।
आजानुबाहुयुगलः पृथुकम्बुकण्ठः
श्यामो नवाम्बुदवदस्मि यथा स कृष्णः॥ ६॥

तद्गच्छामि तावत्तस्याः पुरतः। (इत्युपसृत्य)–

दासोऽस्मि तव कृष्णोऽहं किमेवं मनुषे प्रिये।
निर्वापयाद्य बाहुभ्यां मामाश्लिष्य स्मरानलम्॥ ७॥

(इत्युपसर्पति। सत्यभामा सवैलक्ष्यलज्जाहर्षमवनतमुखी तिष्ठति।)

कामन्धरः – ननु करभोरु, विविक्तोऽयं देशः। तदधुना–

मदनपञ्चशरानलतापितं
सुतनु गात्रमिदं मम सम्प्रति।
तव शिरीषसुमाञ्चलकोमलै–
रवयवैः परिरभ्य विनोदय॥ ८॥

सत्यभामा – (आत्मगतं, संस्कृतमाश्रित्य) इदानीं तावदेनमुज्झित्य आगन्तुं न पारयामि। तत्किमपि प्रियवचनमावेदयितुं मम जिह्वा त्वरयति। तत्किमपि कथयिष्यामि। (प्रकाशं) आर्यपुत्र, इदानीं मम प्रियसखी कुन्तलिका तावदत्रागच्छति। तस्मादन्यतो गच्छामः।

कामन्धरः – महान्प्रमोदः। तर्हि मन्दमायाहि अनतिदूरे वञ्जुलकुञ्जमेव गच्छावः–

पत्रान्तःप्रसरत्प्रभाकरकरैर्व्याप्तं प्रदीपैरिव
प्रायो वञ्जुलकुञ्जमञ्जुलतलं पश्योपकण्ठे प्रिये।
तद्गच्छात्र रतश्रमाम्बुकणिकाहारी समीरो मुहुः
मन्दं वाति निरन्तरायमधुना क्रीडैकताना भव॥

तदिदानीं–

वृक्षच्छायातिमिरबहुले मन्दमङ्घ्रिं निधेहि
प्रेक्ष्य स्थाने दृषदिह कुशप्रायमेतत्स्थलं तु।
पार्श्वे गर्तस्सुतनु निशितैः कण्टकैर्व्याप्तमग्रे
गुल्मस्तस्माद्धरिणनयने मन्दमायाहि मा भीः॥

(इति सत्यभामया परिक्रम्य कुञ्जान्तर्हितो भवति।

कुन्तलिका– (सहसा प्रविश्य, परितो विलोक्य, संस्कृतमाश्रित्य) किमिदं अत्र न कोऽपि? (सावेगं कतिचित्पदानि गत्वा पुष्पसम्भृतं कुसुमभाजनं विलोक्य) अहो, पुष्पभाजनमात्रमत्र वर्तते। मम सखी सत्यभामा पुनर्न दृश्यते यत्र कुत्रापि। परिहासकृते अन्तर्हिता भवेत्। भवतु शब्दापयामि। हला सत्यभामे, सत्यभामे, कुत्रासि? अलं परिहासेन। एहि सत्वरम्। (इति तत्र तत्रान्विष्य सत्यभामामदृष्ट्वा च दिक्षु विक्षिप्याक्षि क्षितितले विलोक्य) अहो, अत्र क्षितितले मनुष्यचरणलाञ्छनमिव दृश्यते। (इति कतिचित्पदानि गत्वा) अत्र न दृश्यते। तत्केनाप्यपहृता भवेत्। तद्गत्वा सत्राजिते कथयिष्यामि। (इति सरभसं परिक्रामति।)

(ततः प्रविशत्यासनोपविष्टस्सत्राजित्)

सत्राजित् – किन्नु खलु कुसुमापचयाय मधुवनं गता सत्यभामा नाद्याप्यागता? चण्डदीधितिस्तु गगनमध्यमधिगतः। ललाटंतपोऽप्यातपः।

विविक्ताः पन्थानो रविकिरणसन्तापिततया
कपोता लीयन्ते वलभिषु पिपासोच्छ्रितमुखाः।
सुदूरे भृङ्गाणामुपवनचराणां प्रसरति
ध्वनिर्वेदोद्घोषभ्रममतितरामद्य जनयन्॥ ११॥

कुन्तलिका– (उपसृत्य, सबाष्पं) आर्य, सत्यभामा नास्ति मधुवने। क्षितितले मनुष्यपदलाञ्छनं पुनः दृश्यते। तत्केनाप्यपहृता भवेत्।

सत्राजित् – कथं नास्ति वत्सा? (इति सावेगमुत्तिष्ठति)

द्वारपालः – (प्रविश्य) अज्ज सतधणु आदुवारे चिठ्ठइ। [आर्य, शतधन्वा द्वारि तिष्ठति।]

सत्राजित् – प्रवेशय तावत्।

शतधन्वा – (प्रविश्य) किमिदं चिन्ताकुल इव?

सत्राजित् – वत्सा केनाप्यपहृतेत्युक्तमनया। किमद्य कर्तव्यम्?

शतधन्वा – (सावेगाभिनयं) किं केनाप्यपहृता! कदा? कुत्र?

सत्राजित् – (दीर्घं निःश्वस्य) न जाने कदेति। मया प्रतिषिद्धापि कुसुमापचयाय मधुवनं गता।

शतधन्वा – (स्वगतं) मदाज्ञा तावत्कामन्धरेण निर्वर्तितेति ज्ञायते। भवतु। (प्रकाशं) कस्य वान्यस्येदृशी धीरता कृष्णमन्तरा? स एव सत्यभामायां चिरानुरागी।

सत्राजित् – तत्कथमिति न जाने। मधुवने पुरुषपदमुद्रा दृश्यते इत्युक्तमनया।

शतधन्वा – किमनया विचिकित्सया ? (पार्श्वमवलोक्य) कुन्तलिके, दर्शय पन्थानं यत्र पदमुद्रा तत्रैव पश्यामः।

कुन्तलिका– इदो इदो। [इत इतः।] (इति मार्गं दर्शयति) (उभावपि परिक्रामतः) एत्थएव्व चळणंळच्छणं पेक्खदु भवम्। (उभावपि पश्यतः) [अत्रैव चरणलाञ्छनं, पश्यतु भवान्।]

शतधन्वा – (निर्वर्ण्य) पश्यतु भवान् कृष्णस्यैव चरणतलमिदं–

सूक्ष्मं न्यस्तोऽत्र पादः प्रपदमिह पुनर्दृश्यते नैव सम्यक्
पश्यास्मिन्पांसुदेशे दृढनिहितमिदं शङ्खचक्राब्जचिह्नम्।
पार्श्वे पश्यास्य सम्यक्किसलयसदृशं दृश्यते स्त्रीपदं तत्
कृष्णेनैव प्रयत्नात्तव खलु दुहिता स्यादितः क्वापि नीता॥

सत्राजित् – (दीर्घं निःश्वस्य) –

यदि स्पृहा कृष्ण ममात्मजायां
ददामि तुभ्यं निखिलं त्वदीयम्।
अङ्गीकुरुष्वाद्य ममाग्र एव
वत्सां कुतश्चौर्यकला तवेयम्॥ १३॥

शतधन्वा – (स्वगतं) किमिदम्‌अयंतावदिदानीमपिसौजन्यमेवावलम्बते? भवतु, नयेन वशीकरोम्येनम्। (प्रकाशं) किमु ते चोरेऽपि सौजन्यम्?

सत्राजित् – तर्हि किमद्य कर्तव्यम्?

शतधन्वा – कर्तव्यमस्ति। रहसि वक्तव्यं तत्।

सत्राजित् – (पार्श्वमवलोक्य) वत्से, गच्छ प्रासादम्।

कुन्तलिका– तहा। (इति परिक्रम्य) होदु गदुअ एदं उत्तंतं कहस्स कह इस्सं (इति निष्क्रान्ता) [तथा। भवतु, गत्वा एनं वृत्तान्तं कृष्णाय कथयिष्यामि।]

सत्राजित् – सखे, किमस्ति वक्तव्यम् ?

शतधन्वा – नायमवसरः तमुदासितुं दस्युं पुरुषाधमम्।

सत्राजित् – (कर्णौ पिधाय) शान्तं पापं, शान्तं पापं, किमभिहितं, पुरुषोत्तमं तं पुरुषाधममिति ? अलं रहस्योक्त्या। (इति गन्तुमुद्युङ्क्ते)

शतधन्वा – (अर्गलीभूय) ननु त्वयि सौहार्दमवलम्ब्य ब्रवीमि यदि मद्वचसि विस्रम्भः, तदा गृह्यतां नोचेत्त्यज्यताम्।

सत्राजित् – एवमेतत्। तथापि नाहं भगवतः कृष्णस्य निन्दां सहे।

शतधन्वा – नाहमपि निन्दामि तम्। अपि तु किमराजकं राज्यमिदमिति ?

सत्राजित् – तर्हि, किं कर्तव्यमिदानीम् ?

शतधन्वा – यथावृत्तं महाराजोग्रसेनाय निवेदयाम इति।

सत्राजित् – मम पुनरयमाशयः सौहार्देन गन्तव्यमिति।

शतधन्वा – ममाप्ययमेवाशयः। स तु नानुमनुते।

सत्राजित् – तर्हि, स एव चोर इति कथं निर्धार्यते ?

शतधन्वा – अहं तावन्निर्धारयामि।

सत्राजित् – तत्कथमिव ?

शतधन्व – तेन रहसि यद्यदाचरितं तत्सर्वमपि कथंचित्सम्पादितं मया।

सत्राजित् – (दीर्घं निःश्वस्य) यथा रोचते भवते। (स्वगतं)

सर्वनिर्वहणे शक्तस्स तु कृष्णो विचक्षणः।
अपराधी कथं वा स्याद्राजाग्रे पुरुषोत्तमः॥ १४॥

(इति शतधन्वना सह निष्क्रान्तः)

॥ इति षष्ठोऽङ्कः॥

॥ सप्तमोऽङ्कः॥

(ततः प्रविशति विदूषकद्वितीयः कृष्णः)

कृष्णः – सखे, क मधुवनं दर्शय मे, यच्च प्रियया निषण्णया समलङ्कृतम्।

विदूषकः – (स्वगतं) अह्मो कुंदळिआए भणिदं सुणिअ एसो अदिमेत्तं किलसदि किं करिस्सं (प्रकाशं) वअस्स अदूळे एव्व महुवणं पेक्खदुभवं। [अहो, कुन्तलिकया भणितं श्रुत्वा एष अतिमात्रं क्लिश्यति। किं करिष्यामि ? वयस्य, अदूर एव मधुवनम्। पश्यतु भवान्।

कृष्णः – (परिक्रम्य मधुवनमवलोक्य दीर्घं निःश्वस्य) सखे–

मधुवने प्रियया रहिते लताः
अपि शुचेव सुमावलिकैतवात्।
नयनजाश्रुकणान्वत पातय-
न्त्यहह नेह मनस्सहते शुचम्॥ १॥

विदूषकः – इमंस्सि सिळादळे उवविसदु भवम्। [अस्मिन्शिलातले उपविशतु भवान्।]

कृष्णः – (उपविश्य दीर्घं निःश्वस्य)

शून्यं जातं मम जगदिदं चञ्चलाक्षीवियोगात्
चेतो याति प्रगुणजडतां लोचने वृत्तिशून्ये।
एवं सत्यप्यहह मदनस्सत्यभामाभिधं मे
षष्ठं बाणं दिशि दिशि मुहुर्दर्शयत्यत्र चित्रम्॥ २ ॥

सखे, केन वा स्यादपहृता मे प्रियतमा?

विदूषकः – सा पुणातेल्लोक्केक्क सुंदळी, केणात्ति भणामि। [सा पुनस्त्रैलोकैकसुन्दरी। केनेति भणामि?]

कृष्णः – स्यान्नामैतत्। नगरोपान्तकान्तारप्रान्ते तावत्–

पितरं विलोक्य सभयं नतानना
क्षरदश्रुबिन्दुपरिबाधिताधरा।
तरलायतासितविलोचना प्रिया
यदभाषतेति तदिह स्मृतं मया॥ ३॥

तामन्तरा कथं कालमतिवाहयामि। (विचिन्त्य) देहि मे प्रियया स्वहस्तलिखितं चित्रफलकं पद्यं च।

विदूषकः – तुए महहत्थेणदिण्णोहि। [त्वया मम हस्ते न दत्तो हि।]

कृष्णः – (सावेगं) क्व निहितो मया? अपि नाम क्वापि पातितो भवेत्? किमिदानीं करोमि?

विदूषकः – णं प्पिअसहीए 'दिण्णा एक्कीवली तुह कंठम्मि वट्टइ तं पेक्खंतो कंचिकाळं णेहिदाव। [ननु प्रियसख्या दत्ता एकावली तव कण्ठे वर्तते। तां पश्यन्कञ्चित्कालं नय तावत्।]

कृष्णः – (सहर्षं) साधु सखे, साधु, सम्यक्स्मारितम्। (इति कण्ठादादाय)–

कान्तायाः करिकुम्भडम्बरहरस्फीतस्तनालिङ्गना-
त्कण्ठाश्लेषणतोऽपि च प्रियसखीवैकावलि त्वं सदा।
क्रीडायां स्वपनेऽपि मण्डनविधावप्राप्तविश्लेषणा
धन्याप्यद्य पुनर्वियोगजनितं ते मे च दुःखं समम्।।४।।

(निःश्वस्य) तत्कण्ठाश्लेषविरहितामेनां द्रष्टुं न पारयामि। (इति निजकण्ठे अर्पयति।)

विदूषकः – किं करिस्सं तुह संदावो सच्चहामाए एव्व मोआविदव्वो। [किं करिष्यामि? तव सन्तापस्सत्यभामयैव मोचयितव्यः।]

कृष्णः – (पार्श्वमवलोक्य) किमिदं निहितमत्र कुसुमभाजनम्?

विदूषकः – कुंदलिआए भणिदं खु सच्छहामा केणवि ओहरिदा पुप्फभाअणं उण तत्थसिळादळे एव्ववट्टदित्ति। तं एदं हवे। [कुन्तलिकया भणितं खलु सत्यभामा केनाप्यपहृता, पुष्पभाजनं पुनस्तत्रैव शिलातले वर्तते इति। तदेतद्भवेत्।]

कृष्णः – (कराभ्यामादाय)–

प्रियया करपल्लवेन मन्दं
परिलूनानि सुमानि भाजनेऽस्मिन्।
कबरीमनवाप्य चञ्चलाक्ष्याः
ग्लपितान्यद्य विडम्बयन्ति मां हि।। ५।।

कञ्चुकी – (प्रविश्य, कृष्णमवलोक्य)–
चिन्तार्धमीलितदृगम्बुज एष कृष्णः
निःश्वासधूसरितबिम्बफलाधरोष्ठः।

संस्रस्तपीतवसनाञ्चितबाहुदण्डः
पीठे निषीदति विषादपरिश्लथाङ्गः ॥ ६ ॥

(इत्युपसृत्य) जयतु जयतु देवः ।

कृष्णः – कथं, महाराजोग्रसेनकञ्चुकी प्रियन्धरः । प्रियन्धर, किमर्थमत्रागतोऽसि ?

कञ्चुकी – (सविनयं) देव, देवो महाराजोग्रसेनः भवन्तमाज्ञापयति ।

कृष्णः – किमिति ?

कञ्चुकी – अद्यैव तावद्धर्मासनमधिरोहामि । तत्सभ्येन भवता भवितव्यमिति ।

कृष्णः – (स्वगतं) किं निमित्तं स्यान्ममानयनम् ? (प्रकाशं) अयमहमागतः । (इति सपुष्पभाजनमुत्तिष्ठति ।)

विदूषकः – (स्वगतं) अवि णाम तं तक्खरत्तणं इमस्सिं वअस्से केणवि आरोविदो हवे । (प्रकाशं) कह्ण हंउण । [अपि नाम तत्तस्करत्वमस्मिन्वयस्ये केनाप्यारोपितो भवेत् ? कृष्ण ! अहं पुनः ....]

कृष्णः – याहि तावत्प्रासादम् ।

विदूषकः – तहा (इति निष्क्रान्तः) [तथा ।]

कञ्चुकी – इत इतो देवः ।

(कृष्णः परिक्रामति)

(ततः प्रविशति धर्मासनोपविष्टस्समुचितपरिवारः विष्टरोपविष्टाभ्यां शतधन्वसत्राजिद्भ्यां सहोग्रसेनः ।)

उग्रसेनः – (उभावप्यवलोक्य) स तु कृष्णो नैवं प्रवर्तत इति मन्ये यतो गम्भीरप्रकृतिः ।

शतधन्वा – न तथा वक्तव्यं यतस्तस्मिंश्चिरानुवृत्तं चौर्यम् ।

उग्रसेनः – किमद्यापि चिरयति।

कृष्णः – (परिक्रम्योग्रसेनमवलोक्य) अहो, अधिकारमहिमा –

नासंस्तुतो नायमबान्धवश्च
मातामहः किन्तु ममैष साक्षात्।
तथापि गन्तुं पुरतो यथेच्छं
रुणद्धि मां मेति मनो मदीयम्॥ ७॥

(इति मन्दमुपसृत्य) देव, वासुदेवः प्रणमति। (इति प्रणम्य) अयमहमस्मि। आज्ञापयतु देवः।

उग्रसेनः – इदमासनम्। (इति दर्शयति) (कृष्णः आसने समुपविशति।)

सत्राजित् – (स्वगतं) किन्नु खल्विदं पुष्पभाजनम्? सत्यभामायाः खल्विदम्?

उग्रसेनः – (सत्राजितमवलोक्य) तदुच्यतां तावत् यद्वक्तव्यम्।

सत्राजित् – अस्मत्पक्ष्योऽयं शतधन्वैव सर्वं कथयति।

उग्रसेनः – तथैवास्तु।

शतधन्वा – नन्वस्य सत्राजितस्सकाशे तावदासीत्स्यमन्तकरत्नमिति। श्रुतपूर्वमेव देवेन।

उग्रसेनः – अथ किम्? दृष्टपूर्वं च।

शतधन्वा – तद्रत्नमसकृदयाचत स कृष्णोऽयम्।

उग्रसेनः – (कृष्णमवलोक्य) अपि नाम सत्यम्?

कृष्णः – अथ किम्?

उग्रसेनः – (शतधन्वानमवलोक्य) ततः।

शतधन्वा – ततश्चानेन सत्राजिता नानुमतं तद्रत्नं दातुमस्मै।

उग्रसेनः – ततः।

शतधन्वा – ततश्च बद्धवैरोऽयं कृष्णः रत्नापजिहीर्षया रन्ध्रान्वेषी बभूव।

उग्रसेनः – (कृष्णमवलोक्य) अपि नाम सत्यम्?

कृष्णः – शृणुमस्तावत्।

उग्रसेनः – एकदा मृगयायै कान्तारं प्रति प्रस्थितमेकाकिनं तद्रत्नालङ्कृतकण्ठं सत्राजितोऽनुजं प्रसेनं रत्नापजिहीर्षया जघानायम्।

कृष्णः – (सशीर्षान्दोलनस्मितं) अपि नाम दृष्टं त्वया?

शतधन्वा – (सतिरस्कारं) नाहं भवते निवेदयामि, अपि तु देवाय।

उग्रसेनः – अलमनुयोगेन। अहमेव पृच्छामि तावत्। भोश्शतध न्वन्, अपि दृष्टं भवता?

शतधन्वा – न मया दृष्टम्।

उग्रसेनः – किमथवा सत्राजिता?

सत्राजित् – न मयाप्यवलोकितम्, अपि तु मद्दुहित्राभिहितं, हरिणा प्रसेनो हतः, तत्कण्ठादपहृतं रत्नं चेति।

उग्रसेनः – कृष्ण, अयमप्येवं कथयति। भवता तावत्किमुच्यते?

कृष्णः – तत्सत्यमेव नगरोपान्तकान्तारचारिणा केसरिणा हतः प्रसेनः। तत्कण्ठाद्रत्नं चापहृतम्। कुन्तलिकया प्रेरितोऽहं तत्र गत्वा तं केसरिणं निहतवान्। किमेतावता? अत्र तावत्सत्यभामैव (इत्यर्धोक्तौ) सैव नास्ति।

सत्राजित् – (स्वगतं) एतदेव सत्यं स्यात्। रत्नकृते न हन्यात्प्रसेनं दयालुः।

उग्रसेनः – कुन्तलिकामपि वा प्रक्ष्यामः। यथावृत्तं सा यदि जानीयात्।

सत्राजित् – तथैवास्तु।

कृष्णः – अभिमतमेव।

उग्रसेनः – कः कोऽत्र भोः ?

द्वारपालः – (प्रविश्य) आणवेदु देव्वो। [आज्ञापयतु देवः।]

उग्रसेनः – इदानीमेव कुन्तलिकां द्रष्टुमिच्छामि।

द्वारपालः – जंदेव्वो आणवेदि (इति निष्क्रान्तः) [यद्देव आज्ञापयति।]

शतधन्वा – (स्वगतं) किं करोमीदानीं सा तु यथार्थं प्रकटयेदपि।

द्वारपालः – (प्रविश्य, सविनयं) देव, सण्णिहिदा कुंदळिआ। [देव, सन्निहिता कुन्तलिका।]

(कुन्तलिका प्रविश्य सभयं तिष्ठति।)

उग्रसेनः – वत्से, मा भैषीः। नानृतमत्र वक्तव्यम्। अपि नाम जानासि केन हतः प्रसेन इति।

कुन्तलिका– (संस्कृतमाश्रित्य, सोत्कम्पं) देव, प्रसेनो मृगयायै वनं गतः।

शतधन्वा – (सामर्षमिव) केन वा पृष्टमेतत्सर्वम् ? प्रश्नस्य तावदुत्तरं दातव्यं, केन हतः प्रसेन इत्यनुयोगः।

उग्रसेनः – कथयतु नाम। इयं तावत्प्रथममेव भीता। भवांस्तु ततोऽपि भीषयति बालामबलाम्। वत्से, कथय तावद्यथार्थम्।

कुन्तलिका– सत्यभामापि मया निवारितापि प्रसेनेन गता।

उग्रसेनः – सा तु सत्राजिता न निवारिता ?

कुन्तलिका– स पुनर्जपन्देवमन्दिरे तावदासीत्। तस्मात्तेन न निवारिता।

उग्रसेनः – ततस्ततः।

कुन्तलिका– ततो भीतया मया तावदेनं वृत्तान्तं कृष्णस्य निवेद्य तत्र प्रेषितो रक्षितुं सत्यभामां प्रसेनं च।

शतधन्वा – (साट्टहासं) कृष्णः कुतः प्रेषितः ?

कुन्तलिका– समर्थ इति।

उग्रसेनः – त्वं तावत्तदा कुत्रासीः ?

कुन्तलिका– गृहे।

उग्रसेनः – ततस्ततः।

कुन्तलिका– तत्र प्रबलेन सिंहेन लङ्घितो हतः प्रसेनः। अपहृतं च रत्नम्।

शतधन्वा – गृहे स्थितायास्ते कथमेतत्सर्वं विदितम् ?

कुन्तलिका– अनन्तरं सत्यभामयाभिहितं सर्वमपि।

उग्रसेनः – अलं वत्से, गच्छ भवनम्।

कुन्तलिका– यदाज्ञापयति देवः। (निष्क्रान्ता)

उग्रसेनः – एतावता कृष्णेन न हतः प्रसेनः, नाप्यपहृतं रत्नमिति स्थिरीकृतम्। (शतधन्वानमवलोक्य) किमप्यस्ति वक्तव्यम् ?

शतधन्वा – बह्वस्ति।

उग्रसेनः – तर्हि उच्यताम्।

शतधन्वा – ततश्चावामपि प्रस्थितौ नगरोपान्तकान्तारम्। तावता कालेन कृष्णस्सान्त्वयन्सत्यभामामभ्यगात्।

उग्रसेनः – ततस्ततः।

शतधन्वा – ततश्चायं सत्राजित्प्रणम्य कृष्णं तेन दत्तं रत्नं सत्यभामां चादाय प्रसेनदिदृक्षया तमेव देशं गतवान्।

उग्रसेनः – (कृष्णमवलोक्य) रत्नं सत्यभामां च ददता भवता न किञ्चिदप्युक्तं किमु?

कृष्णः – तदा सत्राजिता तावत्–

त्वं वत्सलश्श्रितजनेष्विति सुप्रसिद्धः
कृष्णाहमद्य भवता न विचिन्तितो हि।
मत्प्रीतिपात्रमयमित्यपि स प्रसेनो
नैवाद्य नाथ भवता परिरक्षितो हि॥ ८॥

इत्यभिहितम्। अहं तावत्तस्मान्मृगेन्द्रान्न परिरक्षितः प्रसेन इत्युक्तमिति मन्वानः, सानुतापं एवं भवितव्यता किमत्र विधीयते इत्यभिहितवान्।

उग्रसेनः – (सस्मितं) उभयोरपि वागर्थान्तरपर्यवसायिनी।

शतधन्वा – ततश्चास्तंगते गभस्तिमालिनि समयमनुपालयता तावदनेनैवापहृता सत्यभामा रत्नं च।

कृष्णः – (सक्रोधं)–

अद्यैव चूर्णयामि त्वां पादाघातैर्नराधमम्।
किं किमुक्तं पुनर्ब्रूहि नामशेषं करोम्यहम्॥ ९॥

(इत्युद्धतमुत्तिष्ठति)

सत्राजित् – (सहसोत्थाय) भगवन्, अलममर्षेण–

कुपिते त्वयि चेतनौघ एषः
कथमास्ते भुवि हन्त चक्रपाणे।
भवता ननु रक्षणीय एषः
क्षमया नाथ निषीद विष्टरे तत्॥ १०॥

(इत्यासने समुपवेशयति)

शतधन्वा – (साट्टहासं)–

ज्वरातिसन्तापितवद्यथेच्छं
निरर्थकं जल्पसि रक्तनेत्रः।
बिभेमि नाहं तु बिभीषिकायाः
तवेदृशैस्तिष्ठ कृतं प्रलापैः॥ ११॥

सत्राजित् – शान्तं पापं शान्तं पापम्।

कृष्णः – दुरात्मन्, त्वं तावन्न जानासि मां कीदृश इति।

शतधन्वा – (सोल्लुण्ठनं) जानाम्येव रुक्मिण्यपहर्तेति। इदानीमपि दर्शयामि भवतो महिमातिशयम्।

कृष्णः – (सौदास्यं) हुं किं दर्शयसि ?

शतधन्वा – (सशीर्षान्दोलनं) किंदर्शयसीति ? सत्यभामायास्तावदेकावली कथमागता भवत्कण्ठम्? कस्या इदं पुष्पभाजनम् ?

कृष्णः – (स्वगतं) हन्त ! स्मरपरवशचेतसा मया तावदेतदुभयमपि अत्रैवानीतम्।

शतधन्वा – (सहासं) न किमपि फलं चिन्ताभिनयेन।

उग्रसेनः – अलं परस्परं कलहेन।

शतधन्वा – देव, अनेनैवापहृता सा रत्नं च।

उग्रसेनः – तत्कथमिवावधार्यते ?

शतधन्वा – मया निर्धार्यते प्रदर्श्यन्ते च चिह्नानि।

उग्रसेनः – तर्हि प्रदर्श्यन्ताम्।

(शतधन्वा सत्यभामया लिखितं चित्रं पद्यं च प्रदर्शयति।)

कृष्णः – (स्वगतं) अहो, अनेनापहृतं फलकद्वयमपि। हन्त, चिरादनुबद्धवैरोऽयम्।

उग्रसेनः – केन लिखितमिदम्?

शतधन्वा – देव, अनेनैव।

कृष्णः – (सामर्षं) वाचाटोऽसि। कथमिवावधार्यते मया लिखितमिति।

उग्रसेनः – कृष्ण, अलममर्षेण। मयैव पृच्छ्यते। (शतधन्वानमवलोक्य) अनेन लिखितमिव न दृश्यते हि। यतः कृष्ण एवात्र लिखितः। यतश्च नायकमुद्दिश्य नायिकया पद्यमेतत्कृतम्।

शतधन्वा – देव, परातिसन्धानार्थमेव कृतमेवमनेन।

उग्रसेनः – तत्कथमिव?

शतधन्वा – आत्मनः प्रतिकृतिव्याजेन निजशरीरस्य कामकार्श्यं प्रदर्श्य परातिसन्धानार्थं कयाचिन्नायिकया विलिखितमिवात्मसन्देशं स्वयमेव पद्यरूपेण निवेद्य सत्यभामायै दित्सुरासीत्।

उग्रसेनः – स्यान्नामैतत्। कथमिव ते हस्तमायातमिदम्?

शतधन्वा – कामपरतन्त्रेणानेन मधुवनमार्गे पातितं समयमनुपालयता मया तावदुपात्तम्।

कृष्णः – (स्वगतं) नूनमन्यमनस्केन मधुवनं गच्छता मया तावत्पातितं भवेत्। हन्त, अयं तावच्चिरान्मयि रन्ध्रान्वेषीव।

शतधन्वा – अन्यदपि प्रदर्श्यते।

कृष्णः – (स्वगतं) किं वान्यत्प्रदर्शयतीति न जाने।

उग्रसेनः – तथास्तु। तदपि पश्यामः।

शतधन्वा – मधुवनमागच्छतु देवः। (सर्वेऽप्युत्थाय परिक्रामन्ति)

शतधन्वा – देव, मधुवनमिदम्।

उग्रसेनः – किमत्र ?

शतधन्वा – (क्षितितलं प्रदर्श्य) पश्यतु देवः –

शङ्खचक्रकलशाम्बुजध्वज–
च्छत्रवज्रपरिलाञ्छितं पदम्।
न्यस्तमत्र नवपल्लवोपमं
स्त्रीपदं तदनुसृत्य वर्तते॥ १२॥

(कतिचित्पदानिगत्वा) पश्यतु देवः, एतच्छिलापर्यन्तमेव पदपङ्क्तिर्दृश्यते। न पुनरितोऽप्यग्रे। तदिदं कृष्णस्यैव चेष्टितम्। न काप्यत्र विचिकित्सा।

उग्रसेनः – (सवैलक्ष्यं स्वगतं) किन्नु खल्विदम्? कृष्णस्यैव पदपङ्क्तिः नात्र विचिकित्सा। (कृष्णमवलोक्य प्रकाशं) कृष्ण, अस्यां पदरेखायां निधेहि तावत्तव चरणम्। (कृष्णः निजचरणं निदधाति)

सर्वे – (सवैलक्ष्यं) हन्त, कृष्णस्यैव चरणरेखा। (कृष्णः सवैलक्ष्यं चिन्ताकुलस्तिष्ठति)

शतधन्वा – (सहस्ततालहासं श्मश्रुकलापं परामृशन्) किमुच्यते तावदिदानीम्? (उग्रसेनः चिन्ताकुलस्तिष्ठति) (आकाशे) भो भो महाराजोग्रसेन, शतधन्वनैवैतत्सकलमप्याचरितम्। स्यमन्तकरत्नमप्यस्यैवावलग्ने वर्तते। केनचित्कृष्णरूपधारिणा मन्त्रवादिना धनप्रोत्साहितेन सत्यभामां चोरयति स्म।

शतधन्वा – (आकर्ण्य सावेगं निष्क्रान्तः)

कृष्णः – (सामर्षं) आः दुरात्मन्, अयं न भवसि। (इति निष्क्रान्तः)

सत्राजित् – (नेपथ्याभिमुखमवलोक्य) हन्त –

पादाघातेन तं भीतं बद्धाञ्जलिमपि प्रभुः।
निहत्य शतधन्वानं रत्नपाणिरिहैष्यति॥ १३॥

कृष्णः – (प्रविश्य) पश्यन्तु भवन्तः, विनिहितमिदं तेन पापेन निजावलग्न एव। (इति रत्नं प्रदर्शयन् शिलायां दक्षिणचरणं निदधाति)

(तत्क्षणमेव सा शिला सत्यभामा भवति)

सत्यभामा – (सर्वानवलोक्य संस्कृतमाश्रित्य) अहो, अत्र सर्वेऽपि। (इति सहर्षलज्जं तिष्ठति।)

कृष्णः – अहो, अतर्कितोपनता प्रमोदपरम्परा।

सर्वे – (नासाविकासमभिनीय) कोऽयमनाघ्रातपूर्वो दिव्य–कुसुमामोदो नभसः प्रसरति।

कृष्णः – (गगनमवलोक्य) अहो, भगवान्नारदः –

वेगात्कर्षन्मुदिरनिकरं पिङ्गलं कायकान्त्या
विद्युल्लेखावलयसदृशीं पारिजातस्रजञ्च।
वीणां मन्दं पवनवशतस्साधु शश्वद्ध्वनन्ती–
मंसे कुर्वन्सपदि गगनान्नारदोऽयं समेति॥ १४॥

(ततः प्रविशति गगनाद्यथानिर्दिष्टो नारदः)

(उग्रसेनः प्रणमति। सर्वेऽपि प्रणमन्ति)

नारदः – (उग्रसेनमवलोक्य) –

श्वेतातपत्रप्रच्छाये चिरात्साम्राज्यसम्पदम्।
भवाननुभवन्नजन्जीयादाचन्द्रतारकम्॥ १५॥
(सत्राजितमवलोक्य)–
श्रीवत्सकौस्तुभरमावनमालिकाढ्य–
वक्षस्स्थले श्रितजनावनबद्धदीक्षे।
दिव्यायुधाञ्चितचतुर्भुजदण्डकान्ते
भक्तिस्सदा तव भवत्वचला मुकुन्दे॥ १६॥
(कृष्णमवलोक्य) –
निश्शेषितनृशंसौघो भक्तावनपरायणः।
सत्यभामाख्यया भूम्या समेतस्सुखमाप्नुहि॥ १७॥

(सत्यभामामवलोक्य) –
रुक्मिणी भूयसा लक्ष्मीर्यथैनमनुवर्तते।
तथैव सत्यभामे त्वमनुवर्तस्व मेदिनी॥ १८॥

सत्राजित् – कथमियं मेदिनी भगवन्? किमर्थमियं शिला संवृत्ता?

नारदः – (सस्मितं) शतधन्वप्रेरितेन केनचित्कलिङ्गदेशवासिना मायाकलापकोविदेन कामन्धरनाम्ना मायापरिगृहीत-कृष्णरूपेण विप्रेण क्वापि नीयमानेयं सत्यभामा गगनगामिना मया तावद्दृष्टा। पापात्तस्मान्मोचयितुं कृष्णपदकमलस्पर्शपर्यन्तं शिला भवेति मयैव शप्ता। तं पापिनमपि शापेन भस्मसादकरवम्।

सत्राजित् – (साञ्जलिबन्धं) नायं शापः। अपि त्वनुग्रहः। भगवन्, सत्यभामां स्यमन्तकं च कृष्णाय दातुमिच्छामि।

नारदः – महानानन्दः। एतदर्थमेव पाकशासनसकाशादानीते पारिजातस्रजौ। (इति सत्यभामाकृष्णयोः पाणिषु मालामर्पयति।)

(सत्यभामाकृष्णावुभावपि सस्मितं परस्परं कण्ठयोः मालामर्पयतः।)

(गगनात्पुष्पवृष्टिः पतति)

सत्राजित् – कृष्ण, स्यमन्तकमपि त्वदीयं संवृत्तम्।

कृष्णः – रत्नहारी खल्वस्मन्महाराजोग्रसेनः। तदिदानीं तदहं तस्मै समर्पयामि। (इत्युग्रसेनाय तत्प्रयच्छति।)

सत्राजित् – महान्प्रमोदः। भगवन् कृष्ण, नीतिज्ञोऽसि। समयज्ञोऽसि। सर्वज्ञः खलु भवान्। (साञ्जलिबन्धं) किं ते भूयः प्रियमुपहरामि ?

कृष्णः – (सस्मितं)–

सत्यभामा त्वया दत्ता स्यमन्तकमणिस्तथा।
चौर्यशङ्का निरस्ता च किमितोऽप्यस्ति मे प्रियम्॥

तथापि इदमस्तु

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ २०॥

(निष्क्रान्तास्सर्वे)

॥ इति सप्तमोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
स्यामन्तकं नाम नाटकं
सम्पूर्णम्।

वितीर्णामृतम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

कृष्णः

रुक्मिणी

द्वारपालः

दारुकः

शाण्डिल्यः - तपोधनः

कौण्डिन्यः - तपोधनः

घण्टाकर्णः

भ्राता - घण्टाकर्णस्य

शङ्करः

जनाः

भृत्याः

ब्राह्मणः

वितीर्णामृतम्

॥ प्रथमोऽङ्कः ॥

त्यक्त्वान्यदैवान्निजपादमानसान्
यः प्रापयत्यात्मविशुद्धसम्पदम्।
कारुण्यपाथोनिधिमम्बुजेक्षणं
वन्दे मुकुन्दन्तमशेषशेषिणम्॥ १ ॥

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि–
नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये)

सर्वसम्पत्समृद्धापि नैवापत्यमिति प्रिया।
सर्वदा दुःखसन्तप्ता रुक्मिणी धिगपुत्रताम्॥ ३ ॥

सूत्रधारः – किन्नु खलु मयि विज्ञापनैकताने शब्द इव। (नेपथ्याभिमुखम् अवलोक्य) आं ज्ञातम्। अनपत्यताविदीर्णहृदयां रुक्मिणीमनुचिन्त्य चिन्ताकुलः कृष्णः इत एवाभिवर्तते। (निष्क्रान्तः)

॥ प्रस्तावना ॥

(ततः प्रविशति सचिन्तः कृष्णः)

कृष्णः – (सर्वसम्पदिति पूर्वोक्तमेव पठित्वा) दिष्टापेक्षिणः खलु केचन विषयाः। तदधुना दिष्टसम्पादनार्थं शङ्करमाराधयामि–

शं करोति स तु शङ्करो मया
पूजितो हिममहीधरोपरि।
तद् व्रजामि तपसा तमीश्वरं
पूजयन्वरमहं लभेय च॥ ४॥

एतदुदन्तेन सान्त्वयामि तावद्वल्लभां रुक्मिणीम्। (परिक्रम्य, नेपथ्याभिमुखमवलोक्य) हन्त!

एकाकिनी समुपविश्य च मञ्चदेशे
गण्डस्थलाहितकरा नमिताननाब्जा।
बाष्पाकुलायतमनोहरनेत्रदृश्या
निःश्वासधूसरितबिम्बफलाधराऽऽस्ते॥ ५॥

(उपसर्पति)

(ततः प्रविशति यथानिर्दिष्टा रुक्मिणी)

रुक्मिणी – (कृष्णमवलोक्य सदैन्यमुत्थाय नयनाश्रु निजाङ्गुल्या परिनुद्य) किण्णु खु एदं अतक्किआअमणं (इत्यासनं ददाति) [किन्नु खलु एतदतर्किातागमनम्]

कृष्णः – (सस्मितं रुक्मिणीबाहुं गृहीत्वा पर्यङ्के समुपवेश्य स्वयमपि उपविश्य) ननु कल्याणि, किमिदम्?

सूर्यांशुफुल्लकमलाभमिदं मुखं ते
संम्लापयस्यतुलदुर्भरचिन्तयैव।
कादम्बिनीव दृगियं स्तनशैलशृङ्गे
वर्षत्यनल्पमुदकं कबरी च शीर्णा॥ ६॥

रुक्मिणी – ण्हादं वि एव्वं पुच्छइ अज्जउत्तो। [ज्ञातमप्येवं पृच्छत्यार्यपुत्रः।]

कृष्णः – किन्नु खलु तदेव किमु कारणम् ?

रुक्मिणी – किं अण्णं अत्थि ? दाणिं सव्वसमिद्धिणिदाणं अम्हाणं भवणं वणं संउत्तंत्ति। [किमन्यत् अस्ति ? इदानीं सर्वसमृद्धिनिदानमस्माकं भवनं वनं संवृत्तमिति।]

कृष्णः – प्रिये, मा शुचः। पुत्रार्थं तपसा स्तोत्रजालैः शङ्करं सन्तोष्य वरमुपलप्स्ये।

रुक्मिणी – (संस्कृतमाश्रित्य सस्मितम्) सर्वस्तव्यो हि आर्यपुत्रः कथमसंस्तुतपरस्तोत्रः शङ्करं तोषयिष्यति ?

कृष्णः – (सस्मितम्) तत्तु सत्यम्। तथापि तत्समयानुगुणं यथा निस्सरति जिह्वायां स्तोष्यामि तावत्तथा।

रुक्मिणी – भवतु नाम। कुत्र तपः ?

कृष्णः – हिमवति गिरौ।

रुक्मिणी – (सावेगम्) हन्त! शरीरजर्झरीकरणनिपुणतुहिनकरम्बिते शैलतले कथं स्थास्यते तपसे ?

कृष्णः – अलमावेगेन। भवत्यैव असकृत् श्लाघितोऽस्मि सर्वशक्तः इति।

रुक्मिणी – तथापि क्लेशसाध्यमिति।

कृष्णः – भवतु नाम। प्रस्थितोऽस्मि तपसे। (उत्तिष्ठति)

रुक्मिणी – (उत्थाय) आर्यपुत्रस्य तपस्तावत् सफलयतु सः भगवान् शङ्करः।

कृष्णः – तत्र कस्सन्देहः ? (परिक्रम्य) कः कोऽत्र भोः ?

द्वारपालः – (प्रविश्य) आणवेदु देव्वो। [आज्ञापयतु देवः।]

कृष्णः – इदानीमेव दारुकं द्रष्टुमिच्छामि।

द्वारपालः – तहा [तथा] (निष्क्रान्तः)

दारुकः – (प्रविश्य) अयमहमस्मि।

कृष्णः – सारथे हिमवद्गिरिं जिगमिषुरस्मि। तत्सज्जीक्रियतां स्यन्दनः। (दारुकः सवैलक्ष्यं तिष्ठति)

कृष्णः – किन्नु खलु स्थीयते?

दारुकः – न किमपि।

कृष्णः – किमर्थमिति वा?

दारुकः – आम।

कृष्णः – (सस्मितं) तपसे।

दारुकः – (साञ्जलिबन्धस्मितम्) हन्त, भगवतो भवतोऽपि तपः?

योगिध्येयोऽसि शौरे त्वं ब्रह्मरुद्राभिवन्दितः।
कमुद्दिश्य तपस्तत्र हन्त माया तवानघ॥ ७॥

कृष्णः – पुत्राभिलाषिण्यै रुक्मिण्यै शङ्करमुद्दिश्य तपश्चर्यते।

दारुकः – तत् सत्यम्। लोकविडम्बनमेवेदम्। (स्वगतम्) निर्निमित्तं नैव प्रचलेद्भगवान् वासुदेवः। तत्र कमपि भक्तमुद्दिधीर्षोरस्य भवेत्तपश्छद्माचरणम्। भवतु नाम। (प्रकाशम्) सज्जो रथः। इत इतो देवः।

कृष्णः – (परिक्रम्य द्वारि स्थितं रथमधिरुह्य उपविशति) (दारुकः वाहान् प्रेरयति)

कृष्णः – सखे, पश्य–

राजमार्गे रथो गच्छन् जनसङ्घानिवालयान्।
पृष्ठतः प्रेरयन्वेगादग्रे धावति वल्गयन्॥ ८॥

दारुकः – देव, नगरोपान्तकान्तारमागताः स्मः।

पृष्ठान्नुन्नास्तटसृतजलादुत्थितास्स्फीतफेनाः
कल्लोलास्ते त्वजगरनिभास्सम्पतन्त्युच्चघोषाः।
अब्धिर्मध्ये मरकतशिलानीलनीलो विशालः
दूरप्रान्ते गगनकलितो भाति हन्तैकरूपः॥ ९॥

दारुकः – विस्मयावहं खलु भगवतस्सृष्टिकौशलम्।

कृष्णः – वाजिनः प्रजविनः कुरु।

दारुकः – (तथा कृत्वा) पश्यतु देवः–

हरिणफेरवकासरकेसरि–
प्रभृतिवन्यमृगातिभयङ्करे।
सरिदनल्पमहीरुहमञ्जुले
वनतटे कथमेष विधावति॥ १०॥

कृष्णः – (विलोक्य) हन्त, प्रजवी रथः–

वलयवत्पृथुपर्वतसन्ततिः
भ्रमति तत्र च तत्र कुटान्तरे।
कतिपये तृणगूहितपक्कणाः
ननु भवन्ति सुदृष्टतिरोहिताः॥ ११॥

दारुकः – देव, हिमवदुपत्यकां संप्राप्तो रथः।

कृष्णः – (भागीरथीमवलोक्य) सारथे, पश्य तावदेनाम्–

गङ्गा सुनिर्मलजला विततातिघोषा
पापैकसक्तजनतापरिपावनाय।
धावत्यतन्द्रितरया निरयादराप–
हाराय निम्नकटुकण्टकभाजि मार्गे॥ १२॥

दारुकः – भवत्पादोदकं खलु जगदेव पुनाति। (अञ्जलिं बद्धा) देव, महात्मनां तपः लोककल्याणाय खलु। (रथादवरुह्य उपस्पृशति)

कृष्णः – (रथादवरुह्य तीर्थोदकमुपस्पृश्य) सारथे ! रथेन प्रतिनिवर्तस्व। अहं तावत्पर्वतमधिरोहामि।

दारुकः – देव भवांस्तावत् –

क्वचिन्निविडवृक्षके क्वचिदनल्पगर्ताकुले
क्वचिद्विततनिर्झरे भृगुतटैकगम्ये क्वचित्।
क्वचिद्धिमवृते क्वचित्परिपतच्छिलाभीकरे
क्वचित्प्रसरदम्बुदे गिरिवरे कथं गच्छति॥ १३॥

क्लेशसाध्यं खलु हिमवदारोहणम्?

कृष्णः – आम। तथापि –

तत्र तत्र मुनयो विकिल्बिषाः
सञ्चरन्ति मृगचर्मवाससः।
तानहं समवलोकयन्मुदा
यामि पूतसरणौ श्लथश्रमः॥ १४॥

तद्गच्छतु भवान्।

दारुकः – महान्लाभः खलु देवस्य तपोधनसमागमः –

दृष्ट्वा भवन्तं परिपूतमानसाः
सेवापराः पुष्पफलप्रदानैः।
ते मन्यमाना ननु धन्यतां हृदि
स्मरन्ति पूर्वार्जितभाग्यपंक्तिम्॥ १५॥

तदिदं प्रथममेव चिन्तितं मया। (रथेन निष्क्रान्तः)

कृष्णः – मोक्षाभ्यर्थी हरपदयुगे सक्तचित्तो नितान्तं
बद्ध्वा घण्टे श्रवणपुटयोरन्यनामाप्रवेशम्।
घण्टाकर्णो हर हर इति ध्यानसक्तैकचित्तो
भ्रात्रा युक्तो हिमगिरितटे यातुधानोऽस्ति घोरः॥१६॥

तन्मनोरथसिद्ध्यै गन्तव्यं मया। (निष्क्रान्तः)

॥ इति प्रथमोऽङ्कः ॥

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति हिमवदधित्यकातटे तपोधनः शाण्डिल्यः ।)

शाण्डिल्यः – (शीतबाधां निरूपयन्) हन्त, विष्णुपदीकृतावगाहं मां पीडयति तुहिनवातः।

कौण्डिन्यः – (प्रविश्य) भगवन्, किमिदम् उषस्येव स्नानपूतोऽसि ?
आर्द्रवल्कलपरीतविग्रहः
शीतवातपरिबाधितोऽसकृत्।
कम्पमानतनुयष्टिरुच्छिखो
दन्तघट्टनचलार्द्रकूर्चकः ॥ १ ॥

शाण्डिल्यः – किमेवं न जानासि भगवान् वासुदेवः अनतिदूरवर्तिनि तपोवने तपश्चरतीति ? तद्दर्शनार्थं प्रस्थितोऽस्मि।

कौण्डिन्यः – किमिदं भगवान् वासुदेवोऽपि तपश्चरतीति ? किमर्थम् ? कमुद्दिश्य ?

शाण्डिल्यः – पुत्रप्राप्त्यर्थं शङ्करमुद्दिश्य।

कौण्डिन्यः – अखण्डब्रह्माण्डाभिवन्द्यस्स भगवान् वासुदेवोऽपि तपश्चरतीति महदिदमाश्चर्यम्।

शाण्डिल्यः – तर्कयामि तावत् केनापि कार्यान्तरेण भवितव्यमिति।

जगत्सृष्टिरक्षाविनाशादिकार्यं
तदायत्तमेव श्रुतिस्तुत्य एषः।
स्वसङ्कल्पमात्रेण पुत्रं च लब्धुं
समर्थः किमर्थं तपःक्लेशितोऽत्र॥ २॥

कौण्डिन्यः – मा प्रकाशय भगवद्वासुदेवदर्शनार्थं गमनम्। घण्टाकर्णपक्ष्यः यः कोऽपि यातुधानः पर्यटेदत्र। तदा महान् प्रमादः।

शाण्डिल्यः – (परितः पश्यन्) किमर्थम्?

कौण्डिन्यः – हरिनामवक्तारं ज़ीवग्राहं गृहीत्वा तत्पक्ष्या यातुधाना नयन्ति घण्टाकर्णसकाशम्।

शाण्डिल्यः – ततस्ततः।

कौण्डिन्यः – हरिनामग्रहणादस्मद्द्वेषीति तं खण्डशः कृत्वा प्राश्नाति। तदलं प्रकाशनेन। अहमपि स्नात्वा समायास्यामि तावत् कृष्णदर्शनार्थम्। (निष्क्रान्तः)

शाण्डिल्यः – कष्टं भोः कष्टम्। (ससाध्वसं परितः पश्यन्निष्क्रान्तः)

॥ इति शुद्धविष्कम्भकः॥

(ततः प्रविशति महामहीरुहमूलतले निषण्णः राक्षसगणपरिवृतः सानुजो घण्टाकर्णः)

घण्टाकर्णः – आहा एत्तिअं काळं हगे .हळणामं जप्पंते जहिं कहिं वि उम्मत्ते विअ अहिंडंते मोक्खकामे हुवमु।

शे उण हळे ण दिट्ठि ओअळे। किं कळिश्शम्? [आः, इयन्तं कालम् अहं हरनाम जल्पन् यत्र कुत्राप्युन्मत्त इव आहिण्डन् मोक्षकामोऽभवम्। स पुनर्हरो न दृष्टिगोचरः। किं करिष्यामि?] (शिखरप्रोतनानावन्यमृगं स्फीतं त्रिशूलं क्षितितले प्रघट्टयति।)

भ्राता – अय्या मा कुणु अमळिशं। तश्श घळं दुव्वण्णगोत्तं एव्व गदुअ पेक्खम्म। [आर्य, मा कुरु अमर्षम्। तस्य गृहं दुर्वर्णगोत्रमेव गत्वा पश्यामः।]

घण्टाकर्णः– शाहु भादा शाहु। दाणिं एव्व पश्चिदे ह्गे। तुं वि अणुचिष्ट। [साधु, भ्रातः साधु। इदानीमेव प्रस्थितोऽहम्। त्वमप्यनुतिष्ठ।]

भ्राता – रक्खशाणं किं ताहिं प्पवेशश्श ओआशे हवे। [राक्षसानां किं तत्र प्रवेशस्यावकाशो भवेत्?]

घण्टाकर्णः– अहइं, अम्हारिशे खु तश्श पळिवाळे गणे अण्णं अ ह्गेवि तश्श भत्ते खु। ता उट्ठेहि तत्थ गदुअ हळं पुच्छम्ह। मोक्खं देशिवाण वत्ति। [अथ किम्। अस्मादृशः खलु तस्य परिवारो गणः। अन्यदपि अहमपि तस्य भक्तः खलु। तदुत्तिष्ठ। तत्र गत्वा हरं पृच्छामः। मोक्षं ददासि वा न वेति।] (इत्युत्थाय परिक्रम्य नातिदूरे प्ररूढां सुपुष्पितां लतामवलोक्य) इमं पुप्फिदं ळदं उप्पाडिअ शमप्पेमि दाव हळपादमूळम्मि। [इमां पुष्पितां लतामुत्पाट्य समर्पयामि तावद्धरपादमूले।] (उपसृत्य

लतामुत्पाट्य) ही ही किण्णुखु एदं। [ही ही, किन्नु खल्वेतत्?] (साश्चर्यम्) एतत्स्पर्शमात्रेण संस्कृतमयी वाणी प्रसरति जिह्वायाम्। धन्योऽस्मि।

कैलासमासाद्य समर्पयामि
मालामिमां शङ्करपादमूले।
फालाक्षकारुण्यकटाक्षवीक्षा-
जालाभिबद्धस्सुकृती भवेयम्॥ ३॥

(परिक्रम्य सोन्मादनर्तनम्)

हर हर शङ्कर शङ्कर
कुरु करुणां करोमि करयुगलीम्।
भवदरुणचरणसरसिज-
परिचरणपरां परात्पराविरतम्॥ ४॥

(इति सकर्णघण्टानादमञ्जलिं बध्नाति। अग्रे पृथुतरतुहिनघनमापतन्तमालोक्य सानन्दम्)

आयातो भगवान् विशुद्धवृषभारूढश्शरद्वारिद-
स्वच्छाङ्गो भसितावगुण्ठिततनुश्चन्द्रार्धचूडो हरः।
धन्योऽस्म्यद्य कृतार्थतामुपगतोऽस्म्यात्मानुरूपं शुभं
मोक्षं दास्यति संश्रिताशयविनिर्वाहे निबद्धादरः॥

भ्राता – अय्या तुहिणघणे एशे। [आर्य, तुहिनघन एषः।]

घण्टाकर्णः– कथं तुहिनघनः? हन्त, विप्रलब्धोऽस्म्यनेन। आः नाद्यापि सन्निहितो हरः। (नेपथ्ये वादित्रघोषः)

घण्टाकर्णः– (आकर्ण्य) किमिदम्–

काहलध्वनिमर्दलाहतिपटहसन्ततिजर्झरी
डिण्डिमारवभेरिभाङ्कृतिपणवटाङ्कृतिमिश्रितः।
स्फोटिताण्डकटाहजोत्कटडमरुकप्रतिनादभाक्
दिक्तटप्रतिरावगुम्भनघोरविसृमरनिस्वनः॥ ६॥

(नेपथ्याभिमुखमवलोक्य सानन्दम्)
जटाजटिलमस्तकैर्भसितधूलिसन्धूलितैः
त्रिशूलदृढमुष्टिभिः कतिपयैर्गणैस्संवृतः।
मृगेन्द्रकिटिमर्कटप्रभृतिवन्यनानामुखैः
प्रलोलकृशकीकसैर्बहुगणैश्च भूतैर्वृतः॥ ७॥

किञ्च–
ध्वनत्पटहतालगप्रचुरकिङ्किणीसंवृत–
स्वपादपटुनर्तनैर्विविधवन्यचर्मावृतैः।
कराहितसमुज्ज्वलत्पृथुलदीपकैः कुब्जकैः
वृतश्च नटनोत्कटैः कतिपयैर्गणैर्भीकरैः॥ ८॥

वत्स, पश्य तावत् –
हरापदानगानेन पुरो नन्दी समर्दलः।
श्लाघमानशिरा मन्दमायाति मृदुनर्तनः॥ ९॥

हन्त, पश्य तावत् तत्पार्श्वे–
घण्टापङ्क्तिरणत्स्फीतंदण्डस्कन्धा जटाधराः।
काषायाम्बरसंवीतास्समायान्ति सभस्मकाः॥ १०॥

(साञ्जलिबन्धम्) वत्स, पश्य। कारुण्यपरीवाहो मदुपकण्ठं प्रसरति।

कपर्दतटनिस्सरत्सुरधुनीपयस्स्नापितं
सुधांशुशकलं वहन् शिरसि फालदीप्रेक्षणः।
गजाजिनधरो हरः करकपालभृत्पार्वती-
परिष्कृतनिजाङ्कस्समभियाति मद्भाग्यतः॥ ११॥

(ततः प्रविशति यथानिर्दिष्टः शङ्करः।)

शङ्करः – (स्वगतम्)

मत्तः कामयते मोक्षं राक्षसोऽयं चिरादिह।
सदा मन्नामजीवातुः किं करोमि कथं ब्रुवे॥ १२॥

घण्टाकर्णः– (सानन्दमञ्जलिं बद्ध्वा)

वृषभवाहन शैलसुताप्रिय
श्रुतिसमीडित देवसमर्चित।
श्रितजनार्तिहरेश्वर पाहि मां
वितर मोक्षमपेक्षितमद्य मे॥ १३॥

(पुष्पलतां समर्प्य प्रणम्योत्थाय)

चिरकालगवेषितं फलं मे
ह्युपलब्धं कृतकृत्यतां गतोऽहम्।
अविनाशिपदं ददाति मह्यं
किमितोऽप्यस्ति मुदावहं त्विहान्यत्॥ १४॥

(दण्डवत् प्रणमति)

शङ्करः – वत्स! उत्तिष्ठ। प्रीतोऽस्मि भवद्भक्त्या। वत्स! किमिति मां जानासि?

घण्टाकर्णः– भगवन् सर्वशक्तः सर्वफलप्रदाता चेति।

शङ्करः – कस्य कस्यचित् कश्चन कश्चनाधिकारो विहित इति न जानासि।

घण्टाकर्णः– भवन्तमन्तरा केन वान्येन विधीयते?

शङ्करः – अस्ति भगवान् वासुदेवः। स तु मोक्षप्रदाता।

घण्टाकर्णः– तर्हि भवता किं दीयते?

शङ्करः – ज्ञानम्।

घण्टाकर्णः– कथम्! ज्ञानं दत्तमिदानीम्। आचार्योऽसि मे। सम्यगुपदिष्टं निस्सारितं मदीयमज्ञानम्। मुमुक्षुरस्मि भवन्मुखात् तमाश्रये। क्व वर्तते स भगवान् वासुदेवः? तदप्युपदिश। वञ्चितोऽस्म्येतावत्पर्यन्तं भवादृशाचार्यालाभात्।

शङ्करः – साधु, वत्स साधु। स्थिरचित्तोऽसि। अत्रैवानतिदूरवर्तिनि तपोवने तपश्चरति स भगवान्।

घण्टाकर्णः– (साट्टहासम्) किमभिहितम्? सर्वज्ञः सर्वशक्तः स भगवान् तपश्चरति? किन्नु खल्विदम्? भवतु नाम। कमुद्दिश्य?

शङ्करः – मामुद्दिश्य।

घण्टाकर्णः– किमु सर्वज्ञस्यापि ज्ञानेच्छा? महदिदमाश्चर्यम्।

शङ्करः – न तावत् ज्ञानार्थम्।

घण्टाकर्णः– तर्हि किमर्थम्?

शङ्करः – (सस्मितम्) पुत्रार्थम्।

घण्टाकर्णः– (साट्टहासहस्ततालम्) ततोऽपि महदाश्चर्यं यत्सर्वशक्तः पुत्रार्थं तपश्चरतीति।

शङ्करः – शृणु तावद्यथार्थम्–

पुत्रार्थमिति सव्याजं भवत्प्राप्त्यर्थमेव सः।
भवदावासकान्तारे तपश्चरति साम्प्रतम्॥ १५॥

घण्टाकर्णः– (सगद्गदबाष्पम्) कथं मदर्थं तपश्चरति? स भगवान् वासुदेवो मदर्थम्। हन्त करुणा, हन्त करुणा!

योगिनोऽपि विचिन्वन्ति यं रमारमणं हरिम्।
स एव मां विचिन्वन्सन्नागतोऽत्रेति किन्विदम्॥ १६॥

(सोन्मादम्)

भगवन् करुणाकराद्य विष्णो
किमिदं नाथ तवोचितं मुकुन्द।
तव पादसरोजदासदासः
करुणाब्धौ विनिमज्जितोऽस्मि हन्त॥ १७॥

शङ्करः – वत्स, याहि तावत्तत्र। दास्यति स भगवान् भवदभीप्सितम्।

घण्टाकर्णः– आचार्यवर्य! अयमहं प्रस्थितोऽस्मि! सोपहारपाणिः यास्यामि तावत्। (सपरिवारो निष्क्रान्तः)

शङ्करः – (परिक्रम्य नेपथ्याभिमुखमवलोक्य) हन्त–

पतत्रिगणसङ्कुले विविधसान्द्रवृक्षाचिते
स्वपार्श्वनिपतज्झरीकलितशैलमालावृते।
विचित्रकुसुमाचितप्रसृतमञ्जुकुञ्जाञ्चिते
तपोवनतटे तपश्चरति हन्त विश्वम्भरः॥ १८॥

दर्शनीयोऽयं सन्निवेशः–

पद्मासनासीनतया सुदृश्य-
पादद्वयो निश्चलपूर्वकायः।
जानुप्रदेशाहितबाहुदण्डो
नीलाश्मनोत्कीर्ण इवोपविष्टः॥ १९॥

किञ्च-
नासाग्रदत्तात्मविशाललोचनः
फालांचलाकुञ्चितचूर्णकुन्तलः।
पुरोभिनुन्नायतहारमण्डितः
श्रीवत्सवक्षा लिखितो यथाम्बरे॥ २०॥

(इत्युपसर्पति)
(ततः प्रविशति यथानिर्दिष्टः कृष्णः)

शङ्करः – (वृषभादवतीर्य साञ्जलिबन्धम्) भगवन्-
श्रुत्यन्तघुष्टनिरवद्यगुणाकरोऽसि
ब्रह्माण्डषण्डतनुरस्यमलायताक्ष।
सङ्कल्पमात्रजगदुद्भवरक्षणैत-
न्नाशादिकार्यकुशलोऽसि नमो नमस्ते॥ २१॥

कृष्णः – (नेत्रमुन्मील्य सत्वरमुत्थाय) हन्त, शङ्करः! (परिसरगणान् अवलोक्य) नृत्यन्तु भवन्तः। शङ्करमेनं स्तौमि तावत्-
कपर्दिने विमर्दिने सुघट्टितोग्रमर्दल-
प्रवृद्धचण्डताण्डवाय चण्डिकाकुटुम्बिने।
स्फुटानटद्धिशङ्कटोदरेभतुण्डनन्दिने
करोटिकूटमालिने प्रचण्डतीक्ष्णशूलिने॥ २२॥

(दिगम्बराय शम्बरारिवैरिणे नमोऽस्तु ते।)

शङ्करः – भगवन्, अलमलं लोकविडम्बनेन। जगद्वन्द्योऽसि। विदितमेव भवदागमनकारणम्। तन्निर्वर्तय तावत्। धन्योऽस्मि भवद्दर्शनात्। (सपरिवारोऽन्तर्दधे)

कृष्णः – मद्दर्शनकुतुकी घण्टाकर्णः पर्यटत्यटव्याम्। तद्गच्छामि। (निष्क्रान्तः)

॥ इति द्वितीयोऽङ्कः ॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति हिमवदधित्यकाकानने सपरिवारः सानुजः घण्टाकर्णः)

घण्टाकर्णः– (सानन्दम्) सर्वैरप्युच्चैरुच्यतां गोविन्देति।

सर्वे – (एककण्ठेन) गोविन्द गोविन्द (इति कूजन्ति)

घण्टाकर्णः– **ननु भवभयहर गोविन्द**
निरुपमरूप हरे गोविन्द।
श्रितजनवत्सल गोविन्द
विधिहरकारण गोविन्द॥ १॥

(सर्वैः सह सतालं नृत्यति। श्रान्तिमभिनीय ऊर्ध्वमञ्जलिं बद्ध्वा लोचने निमील्य)

दयापयोनिधे हरे रमाकराब्जसेवित
त्वया विना न वेद्मि नाथ दैवमन्यदत्र हि।
प्रदेहि मह्यमम्बुजाक्ष मोक्षमक्षयं विभो
सदा त्वदङ्घ्रिसेवया मुदं लभेय यत्र च॥ २॥

(बाष्पमुन्मार्ज्य) वत्स, मधुराणि फलानि आहर। त्वरितं प्रयाहि)

भ्राता – तहा [तथा] (निष्क्रान्तः)

घण्टाकर्णः– (भृत्यानवलोक्य) यूयं परिमलभोग्यातिस्पृहणीयानि कुसुमान्याहरत।

भृत्याः – तहा [तथा] (निष्क्रान्ताः)

घण्टाकर्णः– **भगवन् मधुसूदन प्रभो ते**
शबरीदत्तफले यथादरोऽभूत्।
अधुनापि तथा मयार्पितेऽपि
श्रितवात्सल्यगुणाविरस्तु कामम्॥ ३॥

अस्ति वा मे तादृशं भाग्यम्?

तामन्विष्यन् विपिनमभितो नाथ गच्छन्मुरारे
भुक्ता दत्तान्यमितमधुराण्यादरात्तत्फलानि।
सन्तुष्टो भूः कथमिव मया पापिना स्पर्शितानि
स्वीकुर्यास्त्वं तदपि वितराम्यद्य मद्वत्सलत्वात्॥

(सबाष्पम्) सर्वज्ञ, मनः पश्यसि तावद्भक्तस्य।

मालाकारगृहं गत्वा तद्दत्ताः प्रसवस्रजः।
यथा तथा मया दत्ताः स्वीकुरुष्व रमापते॥ ५॥

भ्राता – (फलपूर्णपिटकमानीय) अय्या शमाणीदे फळपिडए। [आर्य, समानीतः फलपिटकः।]

घण्टाकर्णः– वत्स गोमयलेपनेन पवित्रीकुरु स्थलमिदम्।

भ्राता – तहा [तथा] (तथा करोति)

भृत्याः – प्पहो आणीदे पुप्फपिडए [प्रभो, आनीतः पुष्पपिटकः]

घण्टाकर्णः– संग्रथ्य समलंकुरुत प्रदेशममुम्।

भृत्याः – तहा [तथा] (तथा कुर्वन्ति)

घण्टाकर्णः– (विचिन्त्य) भगवते भोग्यतममामिषं समर्पणीयं खलु। पूतमामिषं समर्पणीयं तदद्य किं करोमि? भवतु नाम। श्रोत्रियं कञ्चन विप्रोत्तमं निहत्य शकलीकृत्य च समर्पयामि तावत्। (नेपथ्याभिमुखम् अवलोक्य) हन्त, वत्स पश्य तावत्–

सुरसरिति कृतस्नानपूतो द्विजोऽयं
श्रवणमधुरमुच्चैस्सम्पठन्वेदसूक्तम्।
हरिपदवरिवस्यायोग्यपुष्पाढ्यपाणिः
व्रजति विपिनमार्गे तं गृहाणाशु गत्वा।। ६।।

भ्राता – तहा [तथा] (निष्क्रान्तः)

(नेपथ्ये) हा भगवन्, पाहि माम्।

घण्टाकर्णः– (नेपथ्याभिमुखमवलोक्य) हन्त–

मद्भ्रातुः करपञ्जरे प्रविलुठन् स ब्राह्मणो दीनवाक्
प्रालम्बिप्रसरच्छिरोरुहजटासंगुंठितास्यो व्रती।
शुष्काङ्गप्रविधूननप्रकटितप्रच्यावनैकोद्यमः
सावेगं परितो विलोकनपरो दैन्यैकसाराननः।। ७।।

भ्राता – (यथानिर्दिष्टब्राह्मणभुजः प्रविश्य) अय्या आणीदे बह्मणे [आर्य, आनीतो ब्राह्मणः] (अवतारयति)

घण्टाकर्णः– भो ब्राह्मण, तिष्ठ तावत्।

ब्राह्मणः – (सकम्पम्) भो राक्षस, किमर्थमानीतोऽहम्? मया तावन्न किमप्यपराद्धम्।

घण्टाकर्णः– तत्सत्यं निरपराधी भवान्। मां किमिति जानासि?

ब्राह्मणः – आमिषाहारी राक्षस इति जानामि।

घण्टाकर्णः– तर्हि निरपराधीति किमर्थं निवेदयसि? अपराधं पश्यति वा राक्षसः?

ब्राह्मणः – (साश्रुरिङ्खणम्) मुञ्चतु मां कृपया। भगवत्पूजा कर्तव्या। पुण्यं भवति ते।

घण्टाकर्णः– तवापि पुण्यं भवति। अद्य धन्योऽसि।

ब्राह्मणः – (सदैन्यहर्षविवर्णमुखम्) हन्त, कथं धन्योऽहम्।

घण्टाकर्णः– आम, भगवते वासुदेवाय अभ्यवहार्योऽसि।

ब्राह्मणः – कथं किन्नु खल्विदम्? मामश्नाति स भगवान्?

घण्टाकर्णः– अथ किम्? मया समर्पितमश्नाति भक्तवत्सलः खलु।

ब्राह्मणः – स तु ब्राह्मणप्रियः खलु। किमुचितं तस्मै मदामिषार्पणम्?

घण्टाकर्णः– न श्रुतं किमु भवता? यदन्नः पुरुषः तदन्ना तस्य देवतेति।

ब्राह्मणः – (साञ्जलिबन्धम्) राक्षसवर्य! भगवदाराधनानन्तरं तावत् अहमेवायास्यामि। तन्मुञ्च माम्।

घण्टाकर्णः– (साट्टहासम्) भगवते तावदात्मार्पणापेक्षया किमन्यदस्त्यर्चनम्? तत्तिष्ठ।

ब्राह्मणः – (सबाष्पम्) वासुदेव, का गतिः।

घण्टाकर्णः– मा चिन्तय। सद्गतिरेव–

मन एव हि कारणं नृणां तत्

भगवत्प्रीतिकरं निजामिषं त्वम्।

दृढचित्ततयार्पयाद्य तस्मै
स ददात्यद्भुतसद्गतिं च तुभ्यम्॥ ८॥

तदिदानीं तमेव संस्मरंस्तिष्ठ तावत्। (खड्गमुद्यम्य पातयति। ब्राह्मणः अन्तर्दधाति)

घण्टाकर्णः– (सोद्वेगम्) किमिदम्? मामपि प्रतार्यान्तर्हितः। (ससंभ्रमं परितः पश्यन् अग्रे स्थितं श्रीकृष्णमवलोक्य सानन्दबाष्पं बद्धाञ्जलिपुटः) वत्स, क्वासि पश्य तावत्–

मणिमयमुकुटविराजितमूर्धा
कनकवसनरुचिमञ्जुलकायः।
मसृणलुलितमृदुकुन्तलफालः
विकचकमलततलोचनयुग्मः॥ ९॥

भुजयुगयुगधृतहेतिमनोज्ञः
मणिरुचिरमकरकुण्डलकर्णः।
उरसि धृतजलधिजो वनमाली
विलसति मम पुरतो घननीली॥ १०॥

भ्राता – (साञ्जलिबन्धम्) पेःक्खामि अय्या पेःक्खामि [पश्यामि, आर्य पश्यामि।] (सगद्गदबाष्पं तिष्ठति। भृत्याः साञ्जलिबन्धं तिष्ठन्ति)

घण्टाकर्णः– भगवन्, फलमिदमङ्गीकृत्य अनुगृहाण माम्। (अर्पयति)

कृष्णः – किन्नु खलु भवदन्नमामिषं नैवार्पितम्?

घण्टाकर्णः– (सखेदम्) भगवन्, प्रयततमब्राह्मणामिषदित्सया समानीतः कश्चन विप्रोत्तमः निकृन्तनावसरे काप्यन्तर्हितः। किं करोमि?

कृष्णः – हन्त, अन्तर्हितः किमु? तर्हि इदानीं निकृत्य समर्पय। (स एव ब्राह्मणो भूत्वा तिष्ठति)

घण्टाकर्णः– (सवैलक्ष्योन्मादम्) मास्तु, कृष्ण मास्तु। (अञ्जलिं बध्नाति)

कृष्णः – हन्त, ते मौर्ख्यम्। मद्भक्ता ब्राह्मणाः मत्प्रियाः। अथवा ममापि पूज्याः। भवांस्तावत् ब्रह्महत्यापातकी मा भूदिति मया तावदेवं कृतम्।

घण्टाकर्णः– क्षन्तुमर्हसि भगवन् करुणानिधे, पापिनमेनं क्षन्तुमर्हसि।

कृष्णः – मा चिन्तय। भवता तावद्भक्तिपारवश्येन व्यवसितमेवम्। न कोऽपि दोषः।

घण्टाकर्णः– (प्रणम्योत्थाय) अनुगृहीतोऽस्मि धन्योऽस्मि। भक्तवत्सल, पूर्वरूपेण तिष्ठ तावत्। दृगासेचकं तद्रूपं नेत्रपुटाभ्यां पायं पायं धन्यो भवेयम्।

कृष्णः – (स्वेन रूपेण तिष्ठति।)

घण्टाकर्णः– हन्त आश्रितवत्सल, पश्यामि पश्यामि–

मन्दस्मितोज्ज्वलमुखं नलिनायताक्षं
पीताम्बरं मकरकुण्डलशोभिगण्डम्।
श्रीवत्सकौस्तुभलसत्तुलसीन्दिराढ्य–
रम्योरसं हरिमहं सुकृती समीक्षे॥ ११॥

(पुष्पमालां समर्प्य प्रणम्योत्थाय साञ्जलिबन्धम्) भगवन् आर्तत्राणबद्धदीक्ष, मत्प्रार्थनामङ्गीकुरु। देहि मे भवच्चरणसरसिजवरिवस्यैकतानस्थानं मोक्षम्–

अमितदुरितपात्रं पूतिगन्धप्रपूर्णं
वनमृगहननात्तक्रव्यसंवर्धितं च।
अनवधिरिपुसंघैर्धातुवर्गैश्च पुष्टम् ॥
निपततु भुवि शीघ्रं मच्छरीरं गतासु॥ १२॥

(सध्यानं तिष्ठति) (कृष्णः पाणिना तं परामृशति।)

घण्टाकर्णः– किन्नु खल्विदम्–
सुधास्यन्दिकरामर्शप्रोद्भिन्नपुलकोद्गमः।
अमृतह्रदमग्नात्मा संवृत्तोऽस्म्यद्य भाग्यवान्॥ १३॥

(आत्मानं निर्वर्ण्य सवैलक्ष्यम्) किमिदं हे दयालो वासुदेव? दिव्यदेहस्संवृत्तोऽस्मि। (सनिर्वेदम्) कृष्ण, किमनेन शरीरेण? मास्त्विदमपि शरीरम्। अनवरतमपि भवच्चरणारविन्दसेवैकयोग्यं देहि मे देहम्। तदा धन्यो भवेयम्।

कृष्णः – सर्वलोकसुखं भुक्त्वा भ्रात्रा त्वं मदनुग्रहात्।
ततः प्राप्स्यसि वैकुण्ठमकुण्ठितसुसम्पदम्॥ १४॥

घण्टाकर्णः– धन्योऽस्मि। अनुगृहीतोऽस्मि। यथा ते सङ्कल्पः तथैव भवतु।

कृष्णः – किं ते भूयः प्रियमुपहरामि।

घण्टाकर्णः– वासुदेव–
भवद्दर्शनलाभोऽभूद्भवान्मे मोक्षदोऽभवत्।
राक्षसत्वाद्विनिर्मुक्तः किमितोऽप्यस्ति मे प्रियम्॥ १५॥
तथापीदमस्तु।

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रत्नपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः ॥ १६ ॥

(निष्क्रान्तास्सर्वे)

॥ इति तृतीयोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
वितीर्णामृतं नाम नाटकं
सम्पूर्णम्।

❀ ❀ ❀

व्रतफलम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

मालूरकः - दरिद्रविप्रः

बालाः

मलयवती - विप्रपत्नी

रत्नपालः - श्रेष्ठी

सुशीला - श्रेष्ठिभार्या

वृद्धः

द्वारपालः

वसुमित्रः - कश्चन धनिकः

राजा - उल्कमुखः

अमात्यः

वसुमती - राज्ञी

जनाः

व्रतफलम्

(प्रथमोऽङ्कः)

उपासकेभ्यो व्रतभक्तिभाग्भ्यः
संप्रार्थितार्थप्रदमत्र सद्यः।
श्रीसत्यनारायणमम्बुजाक्षं
नमामि बृन्दारकबृन्दवन्द्यम्॥ १॥

सूत्रधारः – एवमार्यमिश्रान् विज्ञापयामि –
नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये)

इह जगति कदापि प्राप्तदैन्यो ह्यमानी
नहि भजति मनुष्यो गण्यतां स्वीयमध्ये।
कथमिव गणयेयुः स्वीयभिन्ना मनुष्याः
तमतिदुरितवह्निज्वालया दह्यमानम्॥ ३॥

(परिक्रम्य अवलोक्य च) हन्त ज्ञातम्। मालूरकनामा विप्रवर्यः निर्वेदेन प्रजल्पन् इत एवायाति। (निष्क्रान्तः)

॥ प्रस्तावना॥

(ततः प्रविशति मालूरकः)

मालूरकः – (आत्मानं निर्वर्ण्य सनिर्वेदहासम्)

नतोन्नमितकीकसैर्धमनिजालबद्धैर्धृतां
वहंस्तनुमहं वलित्रयविभुग्नशातोदराम्।
अहो बत दरिद्रतामनुभवन् जरत्सन्निभः
युवापि वसुधातले ननु चरामि जीवन् विधे।।

हुं, किमनेन विध्युपालम्भेन–
जन्मान्तरकृतस्याद्य भुञ्जानः कर्मणः फलम्।
अस्मिन् जन्मनि निर्वेदाद्दैवं साक्षीकरोम्यहो।। ५।।

(दीर्घं निःश्वस्य) हन्त भोः तिष्ठेद् देहल्यां धान्यकणान्वेषणगतं मामेव प्रतिपालयन्ती सार्भका सहधर्मिणी। रिक्तहस्तं मामवलोक्य कथं भवेत् सा ?

तातस्समेष्यति च दास्यति भोक्तुमन्नम्
आनीय मा रुदत तद्भवतात्तमौनाः।
इत्यात्मबालकसुसान्त्वनसक्तचित्ता
मन्मार्गदृष्टिरचला त्वनुपालयेन्माम्।। ६।।

(ऊर्ध्वमवलोक्य साञ्जलिबन्धम्) भगवन्दीनबन्धो।
दयालुरिति विख्यातः सत्यनारायणो ह्यसि।
क्षान्त्वा मन्तूननन्तान्मे प्रसादसुमुखो भव।। ७।।

(कतिचित् पदानि गत्वा) हन्त, इयं सती–
खरकिरणकरप्रसारदीप्ते
भ्रमरकृतामितरन्ध्रदारुचित्रे।
कुटिलितपटले वितानितोर्णे
ननु निलये प्रतिपालयत्यमुं माम्।। ८।।

(परिक्रामति)

(नेपथ्ये) अम्ब, क्षुद्बाधते मातः, न पारयामि सोढुम्। अम्ब, देहि मे पानीयमपि वा। वत्साः, स्तोकं स्तोकं पिबत पर्युषितं यवागूरसम्।

एकः – मास्तु मे पर्युषितम्। मास्तु पानीयमपि।

मालूरकः – (आकर्ण्य) हन्त भोः, हा नियते ! इदमपि भवल्लीलाकार्यं यथासङ्कल्पः तथा प्रचलतु नाम। (सबाष्पमुपसर्पति)

(ततः प्रविशति यथानिर्दिष्टगृहदेहलीगता मलयवती।)

मलयवती – (अर्भकमध्यात् स्तोकमुपसृत्य) अपि नाम किमप्यानीतम् ?

मालूरकः – (दीर्घं निःश्वस्य) किमानयेयम्? विपणौ पर्यटतां मया तावन्मुष्टिचतुष्टयपरिमितं पिष्टमात्रमुपलब्धम्। (चेलाञ्चलात् ददाति)

मलयवती – अनेन किं करोमि? (सबाष्पमभ्यन्तरं गत्वा नूत्नं परिधानयुग्ममानीय) क्वापीदम् इभ्यहस्ते निक्षिप्य स्तोकमपि वा वित्तमानयत्वार्यपुत्रः। (ददाति)

मालूरकः – (आदाय निःश्वस्य)

पापिनोऽस्य न युक्तं हि नूत्नवस्त्रस्य धारणम्।
इति दैवविधानं स्याद्धन्त दारिद्र्यवैभवम्॥ ९॥

(परिक्रम्य) कस्य हस्ते निक्षिपामीदम्? आढ्यस्तावदिदं गणयति वा? किमनया चिन्तया? अहं तावत् समुद्रसम्पदमधिगतवानस्मि।

दीनो नदीनोऽपि निजोदराग्निना
संबाध्यमानो नहि वृद्धिभाग्भवेत्।
नायाति पानीयमुपात्तुमप्यहो
पिपासया कोऽपि मदन्तिकं यतः॥ १०॥

(कतिचित् पदानि गच्छति।)

(नेपथ्ये)

समार्जितमिदं मया द्रविणमल्पकालोर्जितं
पुनस्त्रिगुणयाम्यहं विनिमयेन रत्नावलेः।
विचित्रबहुभूषणप्रचुरकान्तिसम्मोहिनीं
तनोमि दयितां सदा मुदितमानसां वृद्धिभाक्॥

मालूरकः – (आकर्ण्य) हन्त, आशाजल्पितमिदं वार्धुषिकस्य श्रेष्ठिनो रत्नपालस्य। भवतु, तावदेतद्धस्ते निक्षिपामि परिधानयुग्ममिदम्। (परिक्रामति)

(ततः प्रविशति निजगृहे पुरो निहितायोमयमञ्जूषिको रत्नपालः।)

रत्नपालः – (अयः पेटिकामुद्घाट्य) ही ही –

हीरप्रायमिदं सुवर्णरुचिरं त्वेतत्प्रवालाञ्चितं
नीलाश्मप्रचुरं विभूषणमिदं मुक्तामयं माल्यकम्।
एतत्पुष्पकरागमेदुरमिदं माणिक्यपंक्त्युज्ज्वलं
नक्षत्रग्रहतारकापटलकं भात्यन्तरिक्षं यथा॥ १२॥

भवतु, एवमितोऽप्यधिकं सम्पाद्य वृद्ध्या विडम्बयामि धनदम्।

मालूरकः – (गृहद्वारि देहल्याः बहिरेव अन्तर्हितगात्रः स्थित्वा) अभ्यन्तरे चरणं निधित्सुं मां मेति निरुणद्धि मनः। हन्त किं करोमि? अयं त्वसितस्थूलकायः –

उष्णीषदीप्रकनकायतपत्रभङ्ग–
प्रान्ताभिशोभितशिराः पृथुकर्णभूषः।
श्मश्रुद्वयं प्रकटयन्निजदन्तकान्त्या
पत्रोर्णबद्धपृथुकुक्षिरहो निषण्णः॥ १३॥

भवतु, उपसर्पामि। (परिक्रामति)

रत्नपालः – आयातु। उपविशतु भवान्।

मालूरकः – (उपविश्य सदैन्यं कक्षान्तरात्परिधानयुग्ममादाय मन्दं पुरः प्रसारयति।)

रत्नपालः – (सौदास्यं विलोक्य) किन्नु खल्विदम्?

मालूरकः – दीयतां तावदेतद्विनिमयेन स्तोकमिव वित्तम्।

रत्नपालः – (परिधानमादाय विलोक्य सामर्षम्) रे रत्नपालोऽस्मि न चेलपालः। एतस्य तावत्काकाणिकापि न शक्यते दातुम्। गच्छ।

मालूरकः – (सदैन्यम्) गृहे तावत् क्षुधया प्रलपन्त्यर्भकाः। तत् कृपया दीयतां यवागूकरणार्थं वा।

रत्नपालः – (सभ्रूभङ्गम्) अस्य चेलस्य कियद् दातुं शक्यते? तदन्यत्र क्वापि प्रार्थ्यताम्।

मालूरकः – न क्वापि लब्धं श्रेष्ठिवर्य, तत् कृपां कुरु मयि।

रत्नपालः – न कदापि आपमित्यकमीदृशं वस्तु। गच्छ रे (परिधानं सुदूरं प्रक्षिपति।)

मालूरकः – (सदैन्यनिर्वेदमुत्थाय) किं कुर्मः ? क्षुत्पीडिता वर्तन्ते तावदर्भकाः। मदीयमिदं दौर्भाग्यम् –

लक्ष्मीस्सदा प्रवहति प्रतिपन्नरागा
यत्रर्द्धिरस्त्यनवलोकितसत्स्वभावा।
नूनं नदी सततनिम्नतलप्रवाहा
सृष्टौ विधेः किल विचित्रतरा प्रवृत्तिः ।। १४ ।।

(सनिःश्वासं परिधानमादाय) तर्हि अपि नाम गमनानुज्ञा ?

भार्या – (सरभसं प्रविश्य) (संस्कृतमाश्रित्य) धिगिदं शुष्कं हृदयम्। धिगिदं चाप्रयोजकं द्रविणम्।

रत्नपालः – (सक्रोधम्) याह्यभ्यन्तरम्। त्वं तावत्केन समाहूता ?

सुशीला – भवतस्तावत् कठोरेण वचसा।

रत्नपालः – मा प्रविश व्यवहारेऽस्मिन्।

सुशीला – अस्य गृहे रुदन्ति क्षुत्पीडिता बालकाः। किमीदृशावसरेऽपि निरर्थकं भवद्धनम् ?

रत्नपालः – रुदन्तु नाम। किं कर्तव्यं मया त्वया वा ?

सुशीला – हुं, किं कर्तव्यमिति ? (सोन्मादम्) यदि वयमपि सापत्यकाः तदानीं विदितं भवेत्। नाहं तादृशभाग्यभागभवम्। (रोदिति)

रत्नपालः – यदि सापत्यका भवती तदा विभक्तं भवेद्धि धनमिदम्। तदलं रोदनेन।

सुशीला – हन्त कृपणता। जगतीदृशमप्यस्ति वा हृदयम् ? किं ब्रवीमि ?

दत्तं वित्तं ननु भगवता नैव दत्तं त्वपत्यं
शून्यं धिङ्मे सदनमधुना रिक्तबालैकलीलम्।
धन्यास्ते ये सुतकरपरामर्शशर्मप्रमुग्धाः
तत्संश्लेषप्रकटपुलकास्साधुकालं क्षिपन्ति॥ १५॥

(बाष्पं विसृजति।)

मालूरकः – (स्वगतम्) तदा सुन्दरं भवेत् मादृशेषु पातितां करुणामत्र यदि पातयेद्भगवान्। अथवा –

ऋणानुगुणमायान्ति पुत्रमित्राणि बान्धवाः।
तदहं नैव शोचामि बह्वपत्यैकभाग्यभाक्॥ १६॥

(परिक्रामति।)

सुशीला – तिष्ठ तावत्।

मालूरकः – (परावृत्य) अम्ब! किमुक्तम्? तिष्ठ तावदिति। (उपसर्पति।)

सुशीला – (शिवपरिमितं तण्डुलमानीय दातुमुद्युंक्ते।)

रत्नपालः – (झडित्युत्थाय भार्यामुपसृत्य) किन्नु खल्विदम्?

सुशीला – तदर्भकार्थं तण्डुलं दित्सामि।

रत्नपालः – (सुशीलापाणिमवलम्ब्य) न दातव्यम्।

सुशीला – (सानुनयम्) रुदन्त्यर्भका गृहे क्षुत्पीडिताः।

रत्नपालः – (सदन्तपीडम्) रुदन्तु नाम।

सुशीला – दत्त्वा सुकृती भव।

रत्नपालः – (सावहेलनहासम्) हुं, सुकृतं सुकृतम्। अलसायास्मै मद्द्रव्यदानेन सुकृतं ननु। अयि मुग्धे–

अशक्तैरलसैर्विप्रैः परद्रव्याभिलाषिभिः।
पुण्यं भवति दानेनेत्युपदिष्टासि वञ्चिता॥ १७॥

सुशीला – हुं, कृपणता तावद्भाषयति वञ्चितेति।

रत्नपालः – (सामर्षम्) किमभिहितं कृपणतेति? तथैवास्तु। (सदन्तपीडम्) गच्छाभ्यन्तरम्।

सुशीला – एतद्दत्त्वा गच्छामि।

रत्नपालः – नैव दातव्यम्। (तद्ग्राहुं गृहीत्वा बलादन्तर्नुदति।)

सुशीला – (अधः पतति। तण्डुलः प्रकीर्णः क्षितितले पतति।)

मालूरकः – भोः श्रेष्ठिवर्य, अलममर्षेण। मा ददातु सा।

सुशीला – (मन्दमुत्थाय सबाष्पगद्गदम्) हन्त भोः –

प्रकीर्णं वीक्ष्य सन्तुष्टो यथाभूस्तण्डुलं भुवि।
न तथा दानतो धिक् तत् कृपणत्वस्य चेष्टितम्॥

मालूरकः – अम्ब, कदापि माभूः पत्युः प्रतिकूला। गच्छाम्यहम्। (परिक्रामन्, गगने लक्ष्यं बध्वा)

श्रिया जुष्टश्श्रीमन् सततमपि नारायण विभो
दरिद्रस्य क्लेशं कथमिव च जानाति स भवान्।
कुचेलोऽहं पीताम्बर ननु भवन्नाममननाद्
अहो भूत्वा पीताम्बर इह भवत्साम्यमभजम्॥

(दीर्घं निःश्वस्य नेपथ्याभिमुखमवलोक्य)

वृद्धः पलितकेशोऽयं भुवं दण्डेन घट्टयन्।
आयात्यानतपूर्वाङ्गो मन्दं कोऽपि चलच्छिराः॥ २०॥

(ततः प्रविशति यथानिर्दिष्टो वृद्धः)

वृद्धः – सदा युवाप्यहं सद्यो वृद्धत्वं प्राप्य दुस्सहम्।
जरतां चेतनानां तु क्लेशं जानामि साम्प्रतम्॥ २१॥

तथाहि –

दन्ताभावान्मधुरमधुरं वर्जितं खाद्यमेवं
चक्षुर्मान्द्यान्नयनसुभगं दर्शनीयं सुदूरे।
अन्यापेक्षा प्रतिदिनमपि स्नानपानादिकार्ये
निद्रा क्षुद्रा जनमिह जरोद्वेजयत्यन्यमध्ये॥ २२॥

(उपसर्पति)

मालूरकः – भगवन्, अभिवादयते मालूरकनामा दासजनोऽयम्। (प्रणमति। नूत्नवस्त्रयुग्ममधः पतति।)

वृद्धः – इष्टसिद्धिरस्तु। (इति मालूरकमुत्थाप्य नूत्नवस्त्रमादाय) वत्स, कुत्रोपलब्धमिदम्?

मालूरकः – आर्य, केनापि सत्यनारायणव्रतमाचरता विप्रोत्तमेन भगवत्प्रसादतया दत्तम्।

वृद्धः – कुत्र नीयते तावदिदम्?

मालूरकः – क्वापि निक्षिप्य आढ्यहस्ते वित्तप्रत्यादानाय।

वृद्धः – न श्रुतः किमु सत्यनारायणव्रतमहिमा? तदाचरणेन सर्वं सम्पत्स्यते।

मालूरकः – दुर्गतोऽहं कथं वा समाचरेयम्?

वृद्धः – (सस्मितम्) भक्तिक्रीतो हि जनार्दनः। तदलं चिन्तया। इदं परिधानं परिधाय व्रतमाचर। (ददाति)

मालूरकः – (सभक्त्यादाय) यथादिशति भगवान्। को भवान्?

वृद्धः – शान्तात्मनां विरक्तानां वने वल्कलवाससाम्।
मुनीनां विचरन्मध्ये नित्यं कालं क्षिपाम्यहम्॥ २३॥

किञ्च–

ऐश्वर्यमत्तान् करुणावियुक्तान्
दम्भप्रयुक्तद्रविणान्नदानान्।
धनार्जनारोपितभव्यवेषान्
संवर्जयाम्याशु जनान् सुदूरे।। २४।।

एतादृशः कश्चन वृद्धोऽहम्।

मालूरकः – (साञ्जलिबन्धम्) हन्त, शिक्षितोऽस्मि यतो भवदुक्तगुणभूयिष्ठश्रेष्ठिसकाशं गतोऽहम्। पापिनमेन मनुगृहाण। (प्रणमति)

वृद्धः – (अन्तर्दधाति)

मालूरकः – (उत्थाय क्षितितले पतितां सत्यनारायणप्रतिकृतिम् अवलोक्य सानन्दमादाय साश्चर्यगद्गदबाष्पम्) हन्त, क्व गतोऽसि?

हे सत्यनारायण दीनबन्धो
नाज्ञासिषं हा मदनुग्रहार्थम्।
जरत्स्वरूपेण समागतं त्वां
मायावृतोऽहं बत मायिनस्ते।। २५।।

हन्त, प्रतारितोऽस्मि। भगवन्, वामनः खलु भवान्? नूनं पापात्मकस्य मे क्व ते दर्शनभाग्यम्? भवतु, धन्योऽहं यत् समादिष्टोऽस्मि भगवतैव मामाराधयेति। कोऽहम्? भवानेव सर्वं किल। कर्ता कारयिता भोक्ता... (तां प्रतिकृतिं शिरसि निधाय निष्क्रान्तः।)

।। इति प्रथमोऽङ्कः ।।

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति सिद्धासनोपविष्टः उल्कमुखो नाम राजा।)

राजा – (सचिन्तम्)

श्रीरङ्गादिपवित्रदिव्यनगरीसञ्चारधन्योऽस्म्यहं
गङ्गादिप्रयतापगोदकमहास्नानेन पूतात्मकः।
सत्यप्येवमहो विधिर्न करुणां मय्यातनोद्यत्प्रभुः
प्राप्तापत्यमहोत्सवास्पदमहं नास्मीति खेदो महान्॥

द्वारपालः – (प्रविश्य) देव, कोऽपि वसुमित्रो नाम महानिभ्यः देवदिदृक्षया द्वारि तिष्ठति।

राजा – प्रवेशय।

द्वारपालः – तथा। (निष्क्रान्तः)

वसुमित्रः – (प्रविश्य सचिन्तम्)

नैवापत्यं गेहभूषायमाणं
कान्ता खिद्यत्यात्मजप्राप्तिकामा।
पूर्णं द्रव्यं निष्फलं साम्प्रतं मे
किं वा सौख्यं संसृतौ जन्मभाजः॥ २॥

(उपसृत्य साञ्जलिबन्धं तिष्ठति)

राजा – इदमासनम्। उपविशतु भवान्। (वसुमित्रः उपविशति) भो वसुमित्र, किमिदं चिन्ताव्याकुल इव–

धनेन धरणौ धन्यो धिक्कुर्वंस्त्वं धनाधिपम्।
धिनोषि दीनान्दानेन नानन्दस्त्वयि दृश्यते॥ ३॥

वसुमित्रः – तत् सत्यम्।

जरा मन्दं मन्दं मम कृतपदा वर्ष्मणि यदा
तदा दारा दूरीकृतनिजमहादौहृदहृदः।
निकाय्यः कायो मे द्वयमपि सदा दीप्तिविधुरं
धुरं वोढुं को वा मम तु भविता वेद्मि न विभो॥

राजा – (स्वगतम्) अयमप्यस्मत्समानयोगक्षेम इव। (प्रकाशम्) तेन किमद्य ?

वसुमित्रः – न किमप्यन्यत्र उत्तरत्र का गतिरस्मत्स्वापतेयस्येति ?

राजा – अये मन्मित्र वसुमित्र –

स्वतस्सिद्धस्त्वयि त्यागो दीनानाथेषु साम्प्रतम्।
तद्ब्रवीम्यनुभुंक्ष्वेति वित्तेन सुखमैहिकम्॥ ५॥

वसुमित्रः – किमभिहितं सुखमैहिकमिति। हुं, शृणोतु देवः –

अपत्याभावान्मे भवनविभवादत्तहृदया
प्रियाचिन्ताक्रान्ता स्पृहयति न भोगाय विमुखी।
स्रवद्भिर्बाष्पौघैर्विमलयति गण्डस्थलमये
मया किं वापेक्ष्यं सुखमिह सदा दीनमनसा॥ ६ ॥

राजा – साध्वभिहितम्।

द्वारपालः – (प्रविश्य) देव, देवदिदृक्षया द्वारि तिष्ठति कोऽपि विप्रोत्तमः।

राजा – प्रवेशय।

द्वारपालः – तथा। (निष्क्रान्तः)

ब्राह्मणः – (प्रविश्य) विजयतां महाराजः।

राजा – (उत्थाय साञ्जलिबन्धम्) इदमासनम्। (विप्रः उपविशति।)

विप्रवर्य, किमागमनप्रयोजनम् ?

विप्रः – शृणोतु देवः –

एको बालः क्षुदभितपितः कर्षति प्राप्तवाष्पः
मातुश्चेलं शिशिरविधुतो याचते चेलमन्यः।
अन्या कन्या तरुणिरभवद्धीनताक्षामगात्री
राजन्नेवं मम तु सुकवेः बालकास्सन्ति दीनाः॥

(सखेदम्) अवधारयतु महाराजः –

कविं बुधं विलोक्यैव लक्ष्मीरुद्वेजिता स्वयम्।
दूरं धावति संत्यज्य कामिनीव नपुंसकम्॥ ८॥

राजा – हन्त, विधिविलसितम्। जगति क्रीडति खलु नियतिः। कः कोऽत्र भोः ?

द्वारपालः – (प्रविश्य) अयमहमस्मि।

राजा – कोशाध्यक्षमाह्वय।

द्वारपालः – तथा। (निष्क्रान्तः)

कोशाध्यक्षः – (प्रविश्य) आज्ञापयतु महाराजः।

राजा – दीयतामस्मै द्रविणं सपुत्रकलत्राय यावत्पर्याप्तम्।

कोशाध्यक्षः – यथादिशति महाराजः। (विप्रेण सह निष्क्रान्तः।)

राजा – वसुमित्र, अपि दृष्टं जगतो द्वन्द्वात्मकत्वम्।

वसुमित्रः – राजन् –

विधायैवं विधाता तु निस्सारा संसृतिर्ध्रुवम्।
इति वाचं विनाज्ञेभ्यो बोधयत्यनिशं बत॥ ९॥

अमात्यः – (प्रविश्य) राजा त्वनवरतमपि चिन्ताकुल एव –

सर्वस्मिन्नपि सत्त्वेऽपि वैभवे निरपत्यता।
हन्त वेश्म च चित्तं च तनुते दैन्यभाजनम्॥ १०॥

किञ्च –

गजाश्वपत्तिप्रमुखप्रभूत–
सैन्येन राज्ञात्वनपत्यभाजा।
आक्रम्यते नैव परस्स लोकः
यश्चानुभुज्येत हि पुत्रिणैव॥ ११।

राजा – वसुमित्र –

यद्यच्छास्त्रप्रोक्तमत्र द्विजाग्र्यैः
तत्तत्सर्वं कारितं पुत्रहेतोः।
नैवापत्यांकूरचिह्नं च हन्त
प्रेक्षे दैवं मत्परं नास्ति सत्यम्॥ १२॥

सचिवः – (सहसोपसृत्य) देव, भवत्परमेवास्ति दैवम्।

राजा – तत्कथमिव ?

सचिवः – मया श्रुतं साक्षात् दृष्टं च सत्यनारायणव्रतम् अचिरफलप्रदमिति।

राजा – किन्नु खलु अचिरफलप्रदम् ?

सचिवः – अथ किम् ?

राजा – तर्हि सज्जोऽस्मि।

सचिवः – कारयतु महाराजः मालूरकनामकविप्रवरमुखात्। स त्वनवरतमपि व्रतनिष्ठोऽस्ति।

राजा – महान् प्रमोदः। (वसुमित्रमवलोक्य) भवदीयं स्वापतेयमपि विनियोजय सत्यनारायणसपर्यायै। भवेश्च

तत्कृपाभाजनम्।

वसुमित्रः – (साञ्जलिबन्धम्) तथास्तु। महान् प्रमोदः।

नारायणाय मम वित्तमहं समर्प्य
धन्यो भवेयमधुना तदनुग्रहार्थम्।
सार्थक्यमेष्यति मदीयमहो धनं च
सत्कर्मणे हि विनियुक्ततया नरेन्द्र॥ १३॥

राजा – साधूक्तं मित्रेण। तथापीदमवधारय। अहं मम इत्यहंकारममकारपुरस्सरं कृतं भगवदाराधनं तु नाङ्गीकरोति स भगवान्। शृणु तावत् –

अहन्ता ममता मर्त्यं सन्तापयति सन्ततम्।
ऊर्ध्वारोहणनिःश्रेणिखण्डनाय भवेद् ध्रुवम्॥ १४॥

वसुमित्रः – सत्यमभिहितम् –

नारायणस्य मायैव कारयत्येवमात्मनि।
तस्यैवानुग्रहाद्राजन्विनिवर्तेत तद्द्वयम्॥ १५॥

राजा – एवमेव। तत्सज्जो भव व्रतानुष्ठानाय। (उत्तिष्ठति)

वसुमित्रः – यथादिशति महाराजः। (उत्थाय निष्क्रान्तः)

राजा – (सचिवमवलोक्य) तं मालूरकविप्रवर्यं द्रष्टुमिच्छामि।

सचिवः – अहमेव यास्यामि तावत्तमानेतुम्।

राजा – महान् प्रमोदः। सगौरवमानय।

सचिवः – तथा। (निष्क्रान्तः)

राजा – (नेपथ्याभिमुखमवलोक्य) किन्तु खल्विदं प्रिया तावदित एव आगच्छतीव।

चिन्तामपास्य मुखदर्शितहर्षभारा
नेत्रप्रदर्शितमदीक्षणकौतुकेयम्।
सद्यः कृतस्नपनशुद्धतनुस्तमाल–
पत्रालिकाग्रकृतविश्लथकेशबन्धा॥ १६॥

(ततः प्रविशति यथानिर्दिष्टा वसुमती।)

वसुमती – किण्णु खु एदं प्पत्थिदो विअ अज्जउत्तो। (किन्नु खल्वेतत्? प्रस्थित इवार्यपुत्रः।)

राजा – (सस्मितमुपसृत्य) भवद्दिदृक्षया।

वसुमती – किंणिमित्तम्? (किंनिमित्तम्?)

राजा – यत्किञ्चिद्विवक्षया।

वसुमती – भणादु अज्जउत्तो। (भणत्वार्यपुत्रः)

राजा – सद्यः फलप्रदं कान्ते सत्यनारायणव्रतम्।
चिकीर्षुरस्मि भक्त्या तद्यदि स्यात्तव सम्मतिः॥ १७॥

वसुमती – (संस्कृतमाश्रित्य) अहमप्येतद्विवक्षयैव सन्निहितास्मि।

राजा – केन निवेदितम्?

वसुमती – आर्यया सचिवभार्यया।

राजा – (सहर्षम्)
ऐकरूप्यं हि वचसोर्मनसोरावयोरपि।
अस्मद्व्रताख्यव्रततिः व्यनक्त्याशु फलेग्रहिम्॥ १८॥

सचिवः – (प्रविश्य) देव, भगवत्सपर्यैकतानोऽस्मि। तदद्य तावत् नावकाशस्समागन्तुमित्यभिहितं तेन।

राजा – मदादेशोऽपि विप्रेण तेन हन्त तृणीकृतः।
भगवद्भक्तितृप्तैस्तु जगदेव तृणीकृतम्॥ १९॥

किमत्र चित्रं स्यान्नाम, गत्वा तावदहमेवाभ्यर्थये।
(निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति रत्नपालः)

रत्नपालः – किं करोमि? निर्बध्नाति मां सहधर्मिणी सत्यनारायणव्रतदर्शनार्थम्। हन्त, मौढ्यं जनानाम्। श्रमसमार्जितस्वापतेयव्ययस्तावत् ईदृशे कर्मणे वृथैव। न मे रोचते।

भुक्त्वा यथैच्छममृतोपमभक्ष्यभोज्या–
न्यात्मानुरूपवसनाभरणाञ्चितस्सन्।
सौधे वसन् सुसुखमब्जदृशा सुदत्या
तुष्येज्जनः किमिदमेवमहो व्रतं तत्॥ १॥

सुशीला – (प्रविश्य सनिर्वेदं संस्कृतमाश्रित्य) हन्त, भर्तुः कृपणतां कया विधया कथयेयम्? (सखेदम्)

पिपासयाध्वनीनाय याचमानाय लुब्धकः।
पानीयं दातुमिच्छन्तीं मेति मां निरुणद्धि हा॥ २॥

(गगने लक्ष्यं बद्ध्वा साञ्जलिबन्धम्) भगवन्, देहि मे दयिताय वदान्यताबुद्धिम्। (उपसृत्य सदैन्यम्) अपि नाम गच्छामः?

रत्नपालः – कुत्र?

सुशीला – उक्तं हि महाराजः कारयति सत्यनारायणव्रतम्। तद्दर्शनायेति।

रत्नपालः – न मे दिदृक्षा। गच्छतु भवती।

सुशीला – (सानुनयम्) न तथा। दृष्ट्वा धन्या भवामः। मदर्थमागच्छतु आर्यपुत्रः।

रत्नपालः – (सस्मितम्) हुं, तद्दर्शनेन किमु धन्यता? हन्त मौढ्यम्।

सुशीला – मास्तु धन्यता। कथं प्रचलतीत्यपि वा द्रष्टुमागच्छतु।

रत्नपालः – (विचिन्त्य) तर्हि तथैव भवतु। भवद्वचनादागच्छामि।

सुशीला – (ससम्भ्रमं निष्क्रान्ता)

रत्नपालः – इतस्तावत्।

सुशीला – (सप्रमोदं प्रविश्य) इयमहमस्मि।

रत्नपालः – सर्वाङ्गीणाभरणा सज्जा भव।

सुशीला – तथास्तु। (निष्क्रान्ता)

रत्नपालः – (पेटिकामुद्घाट्य हीरमयैरङ्गुलीयकैः अङ्गुलीरलङ्कृत्य धृत्वा च हीरमयकण्ठाभरणं पत्रोर्णपरिष्कृतः) अपि सज्जा?

सुशीला – (सर्वालङ्कारालङ्कृता फलकुसुमभाजनपाणिः प्रविश्य) अपि नाम गच्छामः?

रत्नपालः – (निर्वर्ण्य)

मेनका कौशिकस्येव तपोविच्छेदकारिणी।
सर्वभूषोज्ज्वला कान्ते भासि मे पुरतः स्थिता॥ ३॥

सुशीला – (सस्मितम्) तथैव भवतु। (स्वगतम्) तव कृपणतातपोविच्छेदकारिण्यपि नाम भवेयम्?

रत्नपालः – (सुशीलापाणिमवलोक्य) किन्नु खल्विदम्?

सुशीला – (सानुनयम्) भगवन्निवेदनार्थम्।

रत्नपालः – किमश्नाति चित्रगतस्स भगवान्? स त्वाददात्यर्चकः तत्पुरतः प्रदर्श्य। धिक् ते मौढ्यम्।

सुशीला – न तथा। सर्वे समर्पयन्ति खलु।

रत्नपालः – सर्वेऽपि भवादृशा एव। तदन्तर्निक्षिप्य याहि।

सुशीला – (सबाष्पं निष्क्रम्य चेलपिहितैकपाणिः प्रविश्य) अपि नामेदानीं गच्छामः?

रत्नपालः – किं तत्? प्रदर्शय तावत्।

सुशीला – (सदैन्यस्मितम्) न किमप्यन्यत्। भगवन्नीराजनाय कर्पूरमात्रम्। (दर्शयति)

रत्नपालः – (सक्रोधमाच्छिद्य दूरतः प्रक्षिप्य) हुं, गच्छेदानीम्। (सुशीलया सह परिक्रामति।)

(ततः प्रविशति विततसत्यनारायणप्रतिकृतिपुरोनिहितस्य सुमाभरणादि समलङ्कृतस्य कनककलशस्य पार्श्वे भार्यया सह निषण्णो राजा।)

राजा – (साञ्जलिबन्धम्)

हे सत्यनारायण वासुदेव
भक्तार्च्यरूपाच्युतचक्रपाणे।
हे पुण्डरीकाक्ष रमात्तवक्षः
नमो नमस्ते श्रितपारिजात॥ ४॥

रत्नपालः – (तत्प्रतीहारमुपसृत्य ऊर्ध्वमवलोक्य च) हन्त, भोः किन्नु खल्विदम्? कियत्स्वापतेयव्ययेन परिकल्पितं स्यात्? वृथेदम्–

उल्लोचमुक्ताफलगुच्छरम्भा–
माकन्दपत्रप्रसवाभिरामम्।

सञ्चिन्तयाम्यद्भुतकायमानं
निर्मापितं हन्त कुतो वृथेति॥ ५॥

(सनिर्वेदसूचकशिरःकम्पम्) हुं, एतदखिलमपि क्रमेण शुष्कं भविष्यति खलु। न तथा रत्नाभरणादिकम्। हन्त, मौढ्यं राज्ञः।

सुशीला – एवं न ब्रूयादार्यपुत्रः।

रत्नपालः – (अभ्यन्तरमवलोक्य सभ्रूभङ्गम्) किमिदं हैयङ्गवीनधाराभिः कनकदीपस्तम्भोज्ज्वलनम्? मौर्ख्यकार्यमेवैतत्। जनता तावदेतत्प्राशनेन पुष्टा दृढकाया च भविष्यति। किमर्थमेवं व्यर्थयति नृपालः? हुं, मादृशानां प्रजानां धनं हि तत्।

सुशीला – (सदैन्याञ्जलिबन्धम्) प्रार्थयेऽहं मा कुप्यत्वार्यपुत्रः। भगवदर्थं कृतं व्यर्थमिति न ब्रूयात्।

रत्नपालः – किमन्यत्? यः कोऽप्येवं क्वापि कुर्याद्वा? (कनककलशम् अवलोक्य) इदमपि मौढ्यविजृम्भणमेव। अस्ति वा तस्मिन् भगवान्? अथवा–

एकया कुसुममालयैव तत्–
पूजनाय न कयाप्यलं किमु।
पुष्पराशिरिह गन्धबन्धुरः
तन्मुधैव कृतवान् वसुव्ययम्॥ ६॥

सुशीला – (सबाष्पं स्वगतम्) भगवन्, अस्य तावत्सद्बुद्धिमापादय

रत्नपालः – (जनानवलोक्य) हन्त, अनधिगतवित्तार्जनमार्गास्तावत् अलसाः कति संघीभूय तिष्ठन्ति जनाः? एतेषां जीविका तावदेवमेवेति ज्ञायते। (सस्मितम्) किन्नु खल्विदम्–

केचिज्जृम्भारम्भविस्तारितास्याः
केचित्कण्ठालम्बिताक्षोरुमालाः।
केचित्तालासक्तहस्ताः प्रमुग्धाः
केचिद्गानैश्शब्दिताशामुखाश्च॥ ७॥

हुं, गतानुगतिको लोकः।

सुशीला – (सबाष्पदैन्यं कराभ्यां कर्णौ पिधाय) हा हन्त! श्रोतुं न पारयामि किमिदमेवमभिधीयते?

रत्नपालः – (अन्यतो विलोक्य) हन्त, योषितोऽपि वर्तन्ते संघीभूय। (सस्मितम्)

काश्चिन्निद्रामीलिताक्ष्यो निषण्णाः
काश्चिच्चान्या भूषणे दत्तनेत्र्यः।
काश्चिच्चान्यापत्यलीलैकतानाः
काश्चित्स्वीयागारकार्यैकवार्ताः॥ ८॥

किमिदमखिलमपि भक्तिकार्यम्? (बृहद्भाजनानि विलोक्य) हन्त भोः–

(नासाग्रे तर्जनीमादाय) –

तत्पात्रं नवघृतपक्वभक्ष्यपूर्णं
पात्रेऽस्मिन्बहुविधसंस्कृतान्नराशिः।
चन्द्रैलावरयुतकोष्णदुग्धभाण्डः
कुम्भाग्रे वत निहितानि खल्विमानि॥ ९॥

यथानिहितं तथैव वर्तते। न किञ्चिदप्यादत्तं भगवता। सुशीले मयाभिहितं खलु। स्वोदरपूरणायालसानामियं जालवितितिरिति।

सुशीला – हन्त, किं कथयेयम्? दृष्ट्वा तृप्यति खलु भगवान्। किञ्च भक्तानां जिह्वासु आस्वदते स भगवान्।

रत्नपालः – (सशिरश्चालनम्) आम। एवं केनचिद्वञ्चकेन विप्रेणोपदिष्टो राजा विप्रलब्धः। हन्त, कियद् द्रविणव्ययः कृतो राज्ञा? यदि भवेयं सचिवोऽहं नैव स्यादेवम्।

मालूरकः – (कर्पूरनीराजनं करोति)

रत्नपालः – (सवैलक्ष्यमक्षि वितत्य) सुशीले, किमिदमेवम्–

देदीप्यमानविविधाभरणाञ्चितोऽयं
चित्रार्पितोऽपि पुरतो मम चक्रपाणिः।
तिष्ठन्निवात्मविभवं प्रकटय्य भाति
किंन्वेतदत्र किमिदं स्वपनं व्रतं वा।। १०।।

सुशीला – (सानन्दबाष्पगद्गदमञ्जलिं बद्ध्वा) अहमप्येवं पश्यामि। धन्यास्मि। आर्यपुत्र! कथं वर्तते भगवतो दया? किमनुभूता भवतापि?

रत्नपालः – (पुनरपि प्रतिकृतिमवलोक्य) एतन्मतिभ्रम एव। कर्पूरनीराजनावसरे तावत्तेजोविशेषेण प्रतिकृतौ थालथल्यमाविरासीत्। अत एव तथा दर्शनम्। हुम्, अहो बृहत्कर्पूरपिण्डः प्रज्वालितः। किमनेन प्रदग्धो नामशेषतामाव्रजत्ययम्? हुं, मुधा द्रविणव्ययः।

सभार्यो राजा (सर्वैस्समुत्थाय साञ्जलिबन्धम्)

नमो नमो देवगणार्चिताङ्घ्रये
नमो नमस्संश्रितकल्पशाखिने।

नमो नमो लोकहितैककांक्षिणे
नमो नमश्शार्ङ्गधराय चक्रिणे॥ ११॥

(कलशोपरिपुष्पाञ्जलिंविकिरति।पुष्पकूटमध्यादुत्तानशयः शिशुः प्ररुदन्नुत्तिष्ठति।)

वृद्धब्राह्मणः (प्रविश्य) (कम्पमानाभ्यां पाणिभ्यां तं शिशुमादाय) राजन्–

गृहाणैनं भवत्पुत्रं शिशुरत्नमयोनिजम्।
जृम्भतेऽस्य हृदावाले हरिभक्तिलता सदा॥ १२॥

राजा – (शिशुमवलोक्य सहर्षविस्मयम्) किन्नु खल्विदम्? अयं तु–

माकन्दपल्लवतनुर्विकचाब्जनेत्रः
रक्ताधरोऽर्धशशभृन्निभफालदेशः।
आकुञ्चितालकपरम्परया मनोज्ञः
राजीवकुड्मलकरो हरतीक्षणं मे॥ १३॥

(प्रणम्य आदाय सानन्दोन्मादबाष्पम्) हन्त, किमिदम्? कोऽहम्? कुत्रास्मि? अपि नाम सत्यमिदं प्रिये! गृहाणैनम्। (भार्याहस्ते शिशुं निक्षिप्य साञ्जलिबन्धस्तिष्ठति।)

मालूरकः – भगवन्!

पुरा मां वृद्धभावेन प्रतार्यान्तर्दधे भवान्।
अधुना तु न मुञ्चामि भवत्पादसरोरुहम्॥ १४॥

(सबाष्पं प्रणम्य वृद्धचरणौ दृढं गृह्णाति।)

रत्नपालः – (सवैलक्ष्यम्) प्रिये किमिदम्?

सुशीला – (सबाष्पम्) किं ब्रवीमि?

वृद्धः – वत्स उत्तिष्ठ। (उत्थापयति)

मालूरकः – (साञ्जलिबन्धम्)

बलिं वामनवन्नाथ! मा प्रतारय मां हरे।
दर्शयाद्य स्वरूपं ते दृष्ट्वा धन्यो भवाम्यहम्॥ १५॥

भक्तवत्सलो हि भवान्। (पुनः प्रणम्योत्थाय) हन्त किमिदम् –

धृतोन्मुकुटकुण्डलप्रथितकण्ठभूषाङ्गदं
चतुर्भुजधृतायुधं विकचपुण्डरीकेक्षणम्।
उरस्स्थलधृतेन्दिरं कटिनिबद्धपीताम्बरं
पदाङ्गदपदं दरस्मितमहं समीक्षे हरिम्॥ १६॥

(सोन्मादसम्भ्रमम्) भोः केशव, क्वासि? नारायण! शीघ्रमायाहि। माधव गोविन्द, कुत्र गतोऽसि? विष्णो मधुसूदन, आयाहि आयाहि। त्रिविक्रम, पश्य। वामन, क्व लीनोऽसि? श्रीधर क्वासि? हृषीकेश, आयाहि। पद्मनाभ, भो दामोदर! प्रिये मलयवति, त्वरितमागच्छन्तु। सर्वेऽपि पश्यन्तु प्रणमन्तु।

सर्वे – (सङ्घीभूय आगत्य प्रणम्य उत्थाय साञ्जलिबन्धं तिष्ठन्ति।)

मालूरकः – सर्वेऽप्येककण्ठाः सादरं वन्दन्तां भवन्तः–

विजयीभव देव देव बन्धो
विजयीभव शङ्खचक्रपाणे।

विजयीभव कामितार्थदातः
विजयीभव भार्गवीश शौरे॥ १७॥

सर्वे – (साञ्जलिबन्धमुच्चैर्वदन्ति। भगवानन्तर्दधाति।)

रत्नपालः – सुशीले, पश्य तावत्। अपि नाम स्मरसि स एषः यश्च पुरा वस्त्रद्वयेन मत्सकाशमागतः ?

सुशीला – पश्यामि पश्यामि। साक्षात्कृतभगवानयं महात्मा।

रत्नपालः – (निर्वर्ण्य सवैलक्ष्यम्) हन्त, किन्नु खल्विदम् ? द्वादश पुत्राः भगवद्द्वादशनामालङ्कृताः। धन्यः खल्वयम्–

दीप्रकुण्डलमनोहराननः
सन्निबद्धबहुमूल्यभासुरः।
भूसुरो मणिसराढ्यकन्धरः
भात्ययं बत धनीव साम्प्रतम्॥ १८॥

सुशीला – एतत्सर्वं भगवदनुग्रहात्।

रत्नपालः – (सबाष्पम्) किन्नु मयि पापीयसि नास्ति भगवदनुग्रहः ?

सुशीला – (सगद्गदम्) अस्त्येव। याचस्व क्षमां भगवद्भक्ते मालूरके।

रत्नपालः – (सरभसमुपसृत्य) भगवन्, पुरा कृतं मदीयमपराधं क्षन्तुमर्हति भवान्। (चरणयोः पतति)

मालूरकः – श्रेष्ठिन्, किं वा कृतमागः ? उत्तिष्ठ। (उत्थापयति)

रत्नपालः – (सबाष्पगद्गदाञ्जलिबन्धम्) भगवन्, पापीयानहम्।

मालूरकः – भोः श्रेष्ठिन्, इदमेकमभिधीयते–

दत्तं वित्तं ननु भगवता पूर्वपुण्यानुरूपं
जन्मन्यस्मिन् सफलय मुदा विष्णुतद्भक्तवर्गे।
नानीतं तज्जननसमये नाप्यसूनां प्रयाणे
ना चायातीत्यचलमतिमान् दानतो हर्षभाक् स्याः ॥

रत्नपालः – अनुगृहीतोऽस्मि। तथैवास्तु।

व्रतफलमवलोक्य प्राप्तसन्तोषकाष्ठः
कृतहृदयविवर्तो नर्तितात्मा नितान्तम्।
विषयगणवितृष्णो लब्धसौहित्यशान्तिः
ननु तव कृपयाहं सार्थयाम्यर्थजातम्॥ २०॥

(स्वाङ्गात् भार्याङ्गाच्च भूषणान्यवतार्य दातुमिच्छति।)

मालूरकः – मास्तु मास्तु –

भवन्मन्दिर एव स्यात् सत्यनारायणव्रतम्।
तदाराधय विप्रांस्त्वं प्रभूतं द्रविणव्ययैः॥ २१॥

रत्नपालः – (सानन्दम्) प्रिये! यथाभिहितं महात्मना विप्रोत्तमेन तथैवाचरामः।

सुशीला – (सानन्दबाष्पम्) महान्प्रमोदः। अनुगृहीता वयमनेनैव विप्रोत्तमेन कारयामः।

रत्नपालः – बाढम्।

राजा – (सभार्यमुपसृत्य साञ्जलिबन्धम्) भगवन्, भवदनुग्रहात् व्रतफलं साक्षादनुभूय भूयो भूयस्सम्मदसमुद्रमग्ना धन्या वयमभूम। (वस्त्राभरणपूर्णं सुवर्णभाजनमर्पयति।)

मालूरकः – किमिदम्? मास्तु मे, सर्वमपि भगवदायत्तं तत्समर्पय तावद्भगवते।

राजा – न तथा–

मन्त्राधीनो ननु स भगवान् कर्मसाक्षी रमेशः
तन्मन्त्रं च प्रयतमनसां ब्राह्मणानामधीनम्।
तस्माद्वन्द्यो जगति निखिलैर्मानवैर्विप्रवर्यः
यस्माच्छ्रीशः कमलनयनोऽप्यस्ति विप्रानुवर्ती॥

तदिदमङ्गीकृत्य अनुगृह्णातु।

मालूरकः – तर्हि तथास्तु। (आदाय) राजन्, किं ते भूयः प्रियमुपहरामि ?

राजा – कारितं भवता स्वामिन् व्रतं तत्फलमप्यभूत्।
सुप्रसन्नस्स भगवान् किमितोऽप्यस्ति मे प्रियम्॥ २३॥

तथापीदमस्तु।

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ २४॥

(निष्क्रान्तास्सर्वे)

॥ इति तृतीयोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
व्रतफलं नाम नाटकं
सम्पूर्णम्।

कलिकालुष्यम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः

नटी

वाजपेयः

विशालाक्षी - वाजपेयपत्नी

सत्यव्रतः

बालकः

चन्द्रमौलिः

नलिनी

कलिकालुष्यम्

॥ प्रथमोऽङ्कः ॥

सूत्रधारः – (साञ्जलिबन्धं प्रविश्य)

सङ्कल्पमात्रेण विचित्ररूपं
नानाविधं कर्म कलौ सलीलम्।
प्रवर्तयन् यो जनतोऽस्त्यदृष्टः
स पातु युष्मान् भगवान् मुकुन्दः॥ १॥

नटी – (प्रविश्य) कीदृशीयं नुतिः ?

सूत्रधारः – कलिकालुष्यप्रवर्तयितुः भगवतो नुतिरियम्।

नटी – किन्नु खल्वेवम्? भगवता प्रवर्त्यते किमु कालुष्यम्?

सूत्रधारः – अथ किम्? तेन विना तृणमपि न चलति हि।

नटी – मया तावच्चिन्तितं जनानां दोष इति।

सूत्रधारः – तदपि सत्यम्। कलौ तावत् तादृशा एव जना जायन्ते। पश्य–

सत्कर्म कर्तुं जनता न सज्जा
जारत्वचौर्यैकरतानृतोक्तिः।
अराजकं हन्त जगद्धनार्थं
परस्परं हन्ति भयात्मिका भूः॥ २॥

एतादृशे जगति जीवितुमुद्विजते हृदयम्।

नटी – एतदपि भगवदायत्तं खलु।

सूत्रधारः – अथ किमथ किम्? तदिदानीं जनमनःपरिवर्तनाय कलिकालुष्यं नाम रूपकमभिनेतव्यमिति।

नटी – अपि नाम परिषदनुमतिः ?

सूत्रधारः – अथ किम् ? पश्य तावत्। सोत्साहं पारावारतरङ्गपरम्परेव एतद्दिदृक्षया सम्मिलिता संसत्।

नटी – तर्हि कः कर्तास्य रूपकस्य ?

सूत्रधारः – हन्त, किं न जानासि ? जगद्विख्यातमपि तं कविवरम्। शृणु तावत्–

नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः॥ ३॥

नटी – किन्नु खलु स कविः ? किमु वक्तव्यं सहृदयावर्जने ?

(नेपथ्ये)

हविर्दानेन देवानां पितेवासि हुताशन।
पुनीहि प्रणतावावां कलिकिल्बिषघस्मर॥ ४॥

नटी – (आकर्ण्य) किमिदम् ? शब्द इव।

सूत्रधारः – वाजपेयो नाम विप्रोत्तमः हवनकर्मानन्तरं सप्रदक्षिणं जातवेदसं प्रणमतीव।

नटी – (सवैलक्ष्यम्) किमिदम् ? कलावपि सन्ति वैतादृशा विप्रोत्तमाः ?

सूत्रधारः – सन्ति प्राचीनशिरस्काः कतिपये ब्राह्मणाः।

नटी – तद्दर्शनेन आवामपि धन्यौ भवावः।

(इति निष्क्रान्तौ)

॥ प्रस्तावना॥

॥ प्रथमोऽङ्कः ॥

(ततः प्रविशति विशालाक्ष्या सह वाजपेयः)

वाजपेयः – ननु पूर्वेद्युरभिहितं द्वीपान्तराच्चन्द्रमौनितः पत्रमायातमिति? आनय तावत् पश्यामः। (विशालाक्षी आनीयार्पयति।)

वाजपेयः – (उद्घाट्य दृष्ट्वा) पञ्चषदिनाभ्यन्तरे समागमिष्यामीति लिखितम्।

विशालाक्षी– ननु ब्रवीमि – समागतस्य तस्य निर्वर्तयिष्यामः पाणिपीडनमिति।

वाजपेयः – ममाप्ययमेवाशयः। (नेपथ्याभिमुखमवलोक्य) आयाति वत्सस्सत्यव्रतः।

स्नात्वा सरस्यार्द्रशिखस्सपुण्ड्रः
उच्चारयन् वेदमनल्पतेजाः।
धावल्यचञ्चत्परिधानरम्यो
ब्राह्मण्ययोग्यात्मसुवेष एषः॥ ५॥

मम तावदष्टसु पुत्रेषु अयमेक एव ब्राह्मण्यमभिपालयति दिष्ट्या।

विशालाक्षी– तदा रम्यं स्यात् यद्ययमपि आंग्लविद्याभ्यासी भवेत्।

वाजपेयः – किमिदानीं न रम्यम्?

विशालाक्षी– आम्, को वा पुरस्करोत्यस्मिन् काले वेदाभ्यासव्यसनिनम्?

वाजपेयः – हुम्! कालमहिमा। वेदाभ्यसनं व्यसनं खलु।

सत्यव्रतः – (प्रविश्य आर्द्रचेलमाश्यानीकृत्य) यास्यामि तावत् पाठशालामध्ययनाय। (पितरौ प्रणमति।)

उभौ – चिरं जीव वत्स।

विशालाक्षी– वत्स, पञ्चषदिनाभ्यन्तरे समायास्यति चन्द्रमौलिः। ततः पत्रमायातम्।

सत्यव्रतः – एवम्। महान् प्रमोदः। (निष्क्रान्तः)

वाजपेयः – अपि नाम दृष्टमस्य शीलवृत्तादिकम्? अन्ये तावदेवं व्यवस्यन्ति वा भवत्पुत्राः?

विशालाक्षी– किमेतेन? पूरयति वा जठरमेतत्? न कोऽपि गणयत्येतत्। इदानींतनानां नापेक्षापि शीलवृत्तादिषु।

वाजपेयः – (सानुतापम्) हन्त मुग्धे! शीलवृत्तादिवर्जितो नरः पशुरेव। अथवा तदपेक्षया तुच्छः। किञ्च जठरपूरणमेव परमप्रयोजनं जानासीव। हन्त स्त्रीबुद्धिः। किं ब्रवीमि?

पशुपक्षिमृगादयोऽपि लोके
जठरं स्वीयमिह प्रपूरयन्ति।
मनुजत्वमुपेत्य बुद्धिपूर्वं
यदि तत्तुल्य इतीर्यते धिगेनम्॥ ६॥

विशालाक्षी– किमेवमभिधीयते? पशुपक्षिवन्निजोदरं पूरयितुं शक्यते वा मानवता मानवेन?

वाजपेयः – तत्तु सत्यमेव। केवलद्रविणार्जनपर एव मान्यः।

अधीताम्नायोऽयं गुरुजनविनम्रस्सुहृदयः
निजाचारासक्तो भगवति च भक्तो द्विजवरः।
कलौ मान्यो नैव प्रतिभटजनौघातिकलुषे
कथं वा जीवेद्धा! निगमशरणो विप्रवृषभः॥ ७॥

विशालाक्षी– एतदर्थमेव आंग्लविद्याभ्यासिना भवितव्यमित्यभिहितम्।

वाजपेयः – हुं मौढ्यम्। आंग्लविद्याभ्यासिनां सर्वेषामपि जीविका प्रचलिष्यतीत्यपि नाम मन्यसे! मौग्ध्यं हन्त मौग्ध्यम्।

त्यक्त्वा विद्यामस्मदीयां प्रतीक्ष्यां
हौणीं वाणीं सस्पृहं द्रव्यदानैः।
अभ्यस्यापि प्राप्तनानादिगन्ताः
खिद्यन्तेऽत्रोद्योगकामाश्च मर्त्याः॥ ८॥

तदत्र लाभालाभौ तत्तददृष्टायत्तौ।

विशालाक्षी– अदृष्टमदृष्टमिति तूष्णीं स्थातुं शक्यते किमु? पश्यतु नाम अभ्यस्तांग्लविद्यतया तावदधिकारिणा सन्दर्शनार्थम् आहूतो विरूपाक्षः। एवमाहूयते किमु सत्यव्रतः क्वापि? (नेपथ्याभिमुखमवलोक्य) सन्दर्शनार्थं गतस्समायाति विरूपाक्षः।

वाजपेयः – (विलोक्य) हुं, सन्दर्शनार्थमिति बहुद्रविणव्ययेन नूत्नतया यन्त्रस्यूतवर्मदीर्घचण्डातकालङ्कृतः गतः प्रत्यागच्छति। अयं तु–

आगुल्फसक्तासितनूत्नरम्य–
चण्डातकस्तादृशकान्तवर्मा।
कण्ठप्रलम्ब्यम्बरपट्टिकश्च
स्निग्धासितोपानदलङ्कृतांघ्रिः॥ ९॥

(विरूपाक्षः प्रविश्य वेत्रासने समुपविश्य शिरसि हस्तमाधाय दीर्घं निःश्वसिति।)

विशालाक्षी– वत्स, किन्नु खलु म्लानवदनस्संवृत्तोऽसि ? किमुक्तमधिकारिणा ?

विरूपाक्षः – (करवस्त्रेण मुखस्वेदं मार्जयन्) किमुच्यतेऽम्ब ? भवतु, पश्यामस्तावत् इति प्रेषितः।

वाजपेयः – विशालाक्षि, अपि नाम विदिता आंग्लविद्याभ्यासिनाम् अवस्था ?

ऐहिकामुष्मिकसुखं नांग्लविद्याविदां ध्रुवम्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ १०॥

इदानीमपि वा तावज्जानीहि।

विशालाक्षी– अद्य तावदलब्धेऽपि अग्रे लप्स्यत एव। एतदर्थं कुतो वात्र चिन्ता ? वत्स, उत्तिष्ठ भोजनाय।

विरूपाक्षः – अम्ब, अत्रैवानय धटायाम्। अश्नामि तावत् चतुष्पात्पीठे।

वाजपेयः – (सक्रोधम्) किन्नु खल्विदम् ?

प्रक्षालितौ न चरणौ न च पादरक्षा–
प्युन्मोचिता कवचमप्यपनेयमेतत्।
भोक्तुं कथं तव मनस्समभूत् द्विजस्या–
प्येतन्निदानमभवद्भवदीयविद्या॥ ११॥

विरूपाक्षः – (सामर्षम्) किमिदम् ? अनवरतमपि आंग्लविद्या आंग्लविद्येति जल्पस्युच्चैः ? वेदमधीत्य वदने तावत् पातनीया मृत्तिका।

वाजपेयः – (सामर्षातिशयम्) हुं किं किमुक्तम् ? मूर्ख ! मृत्तिकापि न लभ्यते हूणभाषाभ्यासिना।

विरूपाक्षः – वेदाभ्यासिनां भैक्षमेव शरणम्।

वाजपेयः – आर्जितांग्लविद्येन भवता तावत् उद्योगार्थं प्रतिदिनमपि तत्र तत्र परिभ्रमता किमुपलब्धम्?
(विशालाक्षी धटायामभ्यवहारादिकमानीय चतुष्पात्पीठे निक्षिपति।)

विरूपाक्षः – नाहमश्नाम्यम्ब। यत्र कुत्रापि गच्छामि। (उत्थाय निष्क्रान्तः)

विशालाक्षी– किमिदं प्रथममेव अनधिगतोद्योगतया खिन्नं वत्सं निष्ठुरोक्त्या खेदयत्यार्यपुत्रः?

वाजपेयः – गच्छतु नाम। पश्याम्यहमपि क्व वा गच्छेदिति?

विशालाक्षी– नहि किमु भवतां खेदः वत्सः क्वाप्येवमाहिण्डतीति?

वाजपेयः – खेदः? किमत्र खेदः? अविनीतानाम् अविवेकिनाम् इयमेव गतिः।

सत्यव्रतः – (प्रविश्य पितरौ प्रणम्य) अम्ब, नाद्याप्यागतो विरूपाक्षः?

विशालाक्षी– आगतस्त्वभुक्त्वा क्वापि प्रयातः।

सत्यव्रतः – किमर्थम्?

वाजपेयः – किमर्थमिति?

विशालाक्षी– (सबाष्पम्) अलं विस्तार्य। (सरभसं निष्क्रान्ता)

सत्यव्रतः – किमिदमिति न ज्ञायते।

वाजपेयः – वत्स 'प्रक्षालितौ न चरणौ ...' इति पूर्वोक्तमेव पठित्वा) एवमभिहितं मया। तावता क्रुद्धस्तावत् अभुक्त्वा क्वापि गतः।

सत्यव्रतः – (सखेदम्) हन्त भोः, कष्टं खलु–

पूर्वाचारनिवेदनं च जनता नैवानुमन्येत चेत्
हन्तानुष्ठितिवर्त्मनीह कटुके क्लिष्टे कथं वादरात्।
स्वेच्छासञ्चरणैकतानहृदया सा संप्रवर्तेत किं
धिक् कष्टं कलिकल्मपातिविकले लोके निवासः कथम्॥

वाजपेयः – वत्स, अत्र कुतो वा चिन्ता? कलिकालुष्यमेतत्। पश्य–

संसेव्य वारुणीं रक्तो वसुत्यक्तो मदादिव।
विजहात्यम्बरं मन्दं कलिलीलां विडम्बयन्॥ १३॥

तदायाहि वत्स सन्ध्योपासनाय। (निष्क्रान्तौ)

॥ इति प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः

(ततः प्रविशति सरसि कृतस्नानः करतलनिहितोद कुम्भः मन्त्रं पठन् वाजपेयः।)

वाजपेयः – (परिक्रम्य गृहाभ्यन्तरमवलोक्य) किन्नु खलु भगवन्मन्दिरद्वारे कोऽपि समुपविशतीव?

आखुभुक् किमिति नेदृशो भवे–
न्नाप्ययं शुनक इत्यवैम्यहम्।
शुभ्रलोमपरिगुण्ठिताङ्गकः
यन्निषीदति सृतात्मजिह्वकः॥ १॥

(स्तोकमुपसृत्य) हन्त अयं तावत् –

क्रकचसन्निभदन्तपरम्परः
किसलयारुणचिक्कणजिह्वकः।
मसृणशुभ्रतनूरुहमञ्जुलः
पटुतराक्षियुगोऽरुणनासिकः॥ २॥

(इति परिक्रामति) (शुनकः भुकुकरोति)

वाजपेयः – (सोद्वेगमुदकुम्भम् अधः पातयित्वा) धिक्, धिक् कोऽत्र? शुनकस्तावद्भगवन्मन्दिरद्वारमागतः। हन्त, न कोऽपि पश्यति।

(काचित् तरुणी सरभसं प्रविश्य शुनकमादाय असकृत् चुम्बन्ती प्रविशत्यभ्यन्तरम्।)

वाजपेयः – (सवैलक्ष्यं विलोक्य) कास्विदियं हूणतरुणीव–

मधुवर्णशिरोरुहा सुधाभा
बहुवर्णाढ्यतनुत्रगुप्तकाया।
निजजानुतलान्तभङ्गिचेला
निटिलानाहितचित्रका बतेयम्॥ ३॥

किमिदं शुना सममभ्यन्तरं प्रविशति? विशालाक्षि भो विशालाक्षि!

विशालाक्षी– (प्रविश्य) किमहमाहूता?

वाजपेयः – कास्विदियं गृहाभ्यन्तरं गता?

विशालाक्षी– (सस्मितम्) न जानातीव आर्यपुत्रः। आगतश्चन्द्रमौलिः।

वाजपेयः – आगच्छतु नाम। इयं का?

विशालाक्षी– भवतां स्नुषा।

वाजपेयः – (शिरसि हस्तमाधाय दीर्घं निःश्वस्य) हन्त भोः ! इदानीं मज्जन्म सार्थमासीत्।

श्रोत्रियाणां कुले जातः स्वाचारनिरतोऽभवम्।
इतः परं कथं वा स्याद् बान्धव्येनेदृशेन हा॥ ४॥

(इति भित्तितलाहितदेहभारः समुपविशति।)

वाजपेयः – अम्ब ! सन्तोषः। सत्यं सन्तोषः। भवत्यास्तावत् महान् प्रमोदः खलु।

विशालाक्षी– अथ किम् ? द्वीपान्तराच्चिरादागतं पुत्रमवलोक्य कस्य वा नोदेति सन्तोषः ?

वाजपेयः – पुत्रमालोक्य सन्तोषः। स्नुषामालोक्य ?

विशालाक्षी– तामालोक्यापि सन्तोष एव।

वाजपेयः – (दीर्घं निःश्वस्य) विशालाक्षि, किमु वक्तव्यमत्र ? वात्सल्यकार्यमेतत्, न तु विवेककार्यम्। हन्त भोः–

हूणस्त्रीकरपीडितोऽद्य तनयो द्वीपान्तरादागतः
सद्वंशप्रभवां द्विजातितनयामानीय शीलान्विताम्।
पुत्रस्योद्वहनं करोमि सदने स्वीयेऽहमित्यादरात्
प्राग्यच्चिन्तितमद्य तत्तु भसिते प्राज्याज्यहोमोपमम्॥

(नेपथ्याभिमुखम् अवलोक्य) हन्त, मुग्धो बालकोऽपि–

असितानुमिश्रमधुवर्णकुन्तलः
समुदञ्चदिन्दुनिभकान्तवक्त्रकः।
पृथुबाहुसक्थितलरेखिकाञ्चितः
स्खलिताङ्घ्रिरेष कतिचित्प्रदाङ्कुरः॥ ६॥

(ततः प्रविशति शुना सह क्रीडन् बालकः।)

बालकः – (निजोपरि समुल्लङ्घनैकतानं शुनकं कण्ठे गृहीत्वा संश्लिष्टाक्षरम्) अपि नाम खादसि? (रोटिकां ददाति)

वाजपेयः – (बालकं निर्वर्ण्य स्वगतम्) मुग्धमुग्धं बालकमेनं तावत् नोज्झितुमप्यादातुमपि प्रवर्तते मनः। किं करोमि? इतिकर्तव्यतामूढोऽस्मि। (सप्रेम तमेव पश्यति) (बालकः क्रीडन् मन्दं मन्दं स्खलद्गतिः वाजपेयोपरि पतति)

वाजपेयः – हन्त, किन्नु खल्विदम्? (सहसा अपसरति) (बालकः अधों निपत्य रोदिति।)

विशालाक्षी– (सहसा बालकमादाय) किमिदमुचितम्? सम्यक् आचरितम्। (बालकं समाश्वासयति)

वाजपेयः – अशुद्धोऽयं मदुपरि निपतितः। किं करोम्यधुना?

विशालाक्षी– नाल्पापि दया, नापि वात्सल्यं, भवतां शिलामयं हृदयम्।

वाजपेयः – किमेवं ब्रवीषि?

विशालाक्षी– आम। जगति जना व्याहरन्ति शिशुस्तावत् भगवत्समानः इति। भवतां तावदशुद्धः खलु? कीदृशोऽयमाचारो दयाशून्यः इति न वेद्मि।

वाजपेयः – किमद्य करोमि विशालाक्षि–

दयामेकां पुरस्कृत्य किमाचारं त्यजाम्यहम्।
आचारः प्रथमो धर्मः धर्मस्य प्रभुरच्युतः॥ ७॥

विशालाक्षी– सम्यगभिहितम्। धर्मस्य शिशुरेव प्रभुः; यतो भगवत्समानः।

चन्द्रमौलिः– (आजानुपरिधृतवस्त्रकः प्रविश्य, करवस्त्रेण मुखं कण्ठतलं च परिमार्जयन्) भवादृशां तावत् लोकव्यवहारोऽत्यावश्यकः।

वाजपेयः – तर्हि किमहं तावल्लोकव्यवहारानभिज्ञ इति?

चन्द्रमौलिः– किमन्यत्? केवलं ग्रन्थावलोकनेन लोकव्यवहारो न ज्ञायते किन्तु जगत्परिभ्रमणेन।

वाजपेयः – तर्हि भवतेव मयापि द्वीपान्तरं गन्तव्यम्।

चन्द्रमौलिः– द्वीपान्तरमेव गन्तव्यमिति न। इहैव तत्र तत्र परिभ्रमणे नानाजनपरिचयात् मनः परिवर्तते। एकत्र स्थितानां नैवम्। (इति वेत्रासने समुपविश्य) अत एव शिशुमशुद्धं ज्ञातवान्।

वाजपेयः – (स्वगतम्) केयं रीतिः? यदि वाच्यतया कथयेयं हूणस्त्रीशिशुरिति तदा तनयहृदयक्लेशजनयिता भवेयम्। हा नियते! कीदृश्यवस्था मयि प्रापिता भवत्या? (प्रकाशम्) चन्द्रमौले, शुनकमेनं क्वापि बहिर्बधान; नो चेन्महानसमपि प्रविशति।

चन्द्रमौलिः– तात, स तु न सहते बन्धनम्। सोऽपि पर्यटतामस्माकं पुरतः पश्चाच्च पर्यटन् वर्तते।

वाजपेयः – (सनिर्वेदस्मितम्) विशालाक्षि, श्लाघनीया ते बुद्धिः। हन्त, पुत्रमुखदर्शनात् सर्वोऽपि पूर्वाचारो दूरीकृतः इति ज्ञायते।

चन्द्रमौलिः– (सस्मितम्) ननु भवादृशैरेवोक्तं शुनि चैव श्वपाके च पण्डितास्समदर्शिन इति।

वाजपेयः – चन्द्रमौले, हन्त ते सौलभ्यं तत्र वक्तव्यं बहु वर्तते। सर्वज्ञ इव कथयसि बहुसुलभतया गीतार्थम्।

चन्द्रमौलिः– (सस्मितम्) वर्ततां नाम। भवद्भिरेव चिन्त्यतां तावत् तस्य गुणविशेषः–

प्रकाशयन् कृतज्ञत्वं स्वामिरक्षैकतत्परः।
आपत्काले स्वयं प्राणांस्त्यक्तुं सज्जो निजप्रभोः॥ ८ ॥

वर्तते वा मनुष्ये तावदीदृशी निष्ठा?

वाजपेयः – तर्हि चिरन्तनाः किमु मूढाः?

चन्द्रमौलिः– अथ किम्? मौढ्यमेव तेषां; न कोऽपि सन्देहः।

वाजपेयः – (सानुतापम्) हन्त, आधुनिकानां बुद्धिवैपरीत्यम्। मान्यास्तावच्चिरन्तनाः मौढ्यपदवीमारोपिताः। तर्हि जातिमतादिविमर्शो न कार्य इति भवदभिसन्धिः। यतो गुणैकपक्षपाती खलु भवान्?

चन्द्रमौलिः– कस्सन्देहः?

वाजपेयः – अत एव गुणभूयिष्ठां हूणतरुणीमूढवान्।

चन्द्रमौलिः– आम्।

वाजपेयः – (दीर्घं निःश्वस्य) चन्द्रमौले, किं ब्रवीमि? न ते तावदपराधः। यौवनमपराध्यति।

तारुण्यं किल पुरुषं विवेकशून्यं
कृत्वा तं निजपथगामिनं विधाय।
मौढ्याद्यद्रचितमकृत्यमप्यहो तत्
सत्कार्यं नरि ननु भासयत्यनार्ये॥ ९॥

(इति नेपथ्याभिमुखमवलोक्य) नलिन्यप्यायातीव। किं ब्रवीम्यस्या वेषविशेषम्? हन्त भोः कालमहिमा–

वेणीं कृष्णभुजङ्गभोगसदृशीं सेयं दधाना सुता
तारुण्यारुणगण्डपालिरलिकारालस्फुरत्कुन्तला।
आबद्धामलचीनवर्मविशदस्फीतोच्चवक्षोरुहा
पुंसो वेषधरा करात्तपटला चागुल्फचण्डातका॥ १०॥

(ततः प्रविशति यथानिर्दिष्टा नलिनी।)

नलिनी – (दूरादवलोक्य) कोऽयमुपविशति?

उच्छूनपाटलकपोलतलो विशाल–
फालोल्लुठच्चिकुरकोंऽसलवृत्तकण्ठः।
स्थूलप्रवेष्टयुगलो विततोच्चवक्षाः
तारुण्यपण्यतनुरत्र विभाति कोऽपि॥ ११॥

(उपसृत्य) अहो भ्राता! भ्रातः, कदागतः? (शुनकमवलोक्य) हन्त, कथं वर्तते? सुन्दरतरोऽयम्। (ससंभ्रमहर्षं तमादाय चुम्बति।)

वाजपेयः – (सनिर्वेदं स्वगतम्) किमिदं शुनकस्य चुम्बनम्? केयं रीतिः?

नलिनी – (सानुनयम्) भ्रातः, मह्यमयम्। (विशालाक्ष्यवलग्नगतं शिशुमवलोक्य) अहो शिशुरपि। आयाहि आयाहि वत्स, आयाहि। (शुनकमुत्सृज्य शिशुमादाय कपोलयोश्चुम्बति।)

चन्द्रमौलिः– नलिनि, अपि कुशलम्? कथं प्रवर्तते भवत्या विद्याभ्यासः?

नलिनी – सम्यक् प्रचलति भ्रातः।

वाजपेयः – चन्द्रमौले, अस्यास्तावद्विवाहो निर्वर्तनीयः अस्मिन्नेव वर्षे।

चन्द्रमौलिः– अपि नाम जामाता निश्चितः ?

वाजपेयः – एको मनसि वर्तते। स तु–

अधीतविद्यो गुणवान् सुशीलः
रूपेण मारं च तिरस्करोति।
उद्योगसम्पादितभूरिवित्तः
सम्बन्धयोग्यस्सुकुलोद्भवश्च॥ १२॥

नलिनी – (सभ्रूभङ्गम्) अहं तावत् कृतविवाहा। किं पुनर्विवाहवार्तया ?

वाजपेयः – (सावेगम्) अम्ब, कथम् ? अस्माकमनिवेद्यैव ?

विशालाक्षी– (सावेगम्) वत्से, जामाता कः ?

नलिनी – कश्चन यवनः।

विशालाक्षी– हा हतास्मि। (पतति)

वाजपेयः – (स्ताम्भितगात्रः शिरसि हस्तमाधाय दीर्घं निःश्वस्य, उपविश्य)

कुतो वा भूभागे मम जनिरभूद्धन्त नियते
कुतो वा जीवामि प्रथितकुलजन्मा द्विजवरः।
कुतो वा ब्राह्मण्यं कलिकलुषकाले नियमकृत्
धिगेनं मां हा धिक् कुलमपि च धिक् धिक् च कलिजान्॥

(सोन्मादाट्टहासम्) विशालाक्षि विशालाक्षि, किन्नु खल्विदम् ? सन्तोषयितव्ये समये रोदिषि ?

किमिदमुचितं ते? उत्तिष्ठ। सन्तुष्टा भव। सन्तुष्टा भव। स्त्रीजन्मप्रदात्र्यास्तवापि जन्म पूतमभवत्। अनया दुहित्रा अस्मत्कुलमप्युद्धृतम्। हा नियते, केन सह रोदिमि? कस्मै निवेदयामि?

पुरा न सुकृतं कृतं तदधुना ममैतादृशाः
सुतास्समभवन् मुधा किमनुतापतो रोदिमि।
फलं परिददात्यहो भुवि समुप्तनिम्बाय किं
तरुस्स मधुराम्रजं तदिह मे दशैवेदृशी॥ १४॥

नलिनी – को दोषः? सोऽपि सुगुणी रूपवान् युवा। अत एव विश्वविद्यालये तावदेककक्ष्याव्यासङ्गिनावावां परस्परं कृतस्नेहावभूव।

वाजपेयः – (सक्रोधम्) निर्लज्जे, पिधेहि वदनम्। न तावन्नारी, त्वं ममारिः। रचिताकृत्या सधैर्यं प्रलपसि मत्पुरतः?

विशालाक्षी– (सबाष्पम्) वत्से, किमाचरितम्? परेभ्यः कथं वा मुखमिदं दर्शयेयम्?

वाजपेयः – विशालाक्षि, कुतो रोदिषि? भवत्पुत्रास्सर्वेऽपि गुणैकपक्षपातिनः। तस्य म्लेच्छस्य गुणमवलम्ब्यैव व्रजतु नाम। इतः परं मद्भवनदेहलीमपि पदा न स्पृशेत्। गच्छ, इदानीमेव गच्छ। नैव जाता मम दुहिता।

विशालाक्षी– (सावेगम्) किमिदम्? एवं ब्रवीति आर्यपुत्रः?

नलिनी – गच्छाम्यम्ब। नाहमितः परं भवद्भवनसरणिमपि अवलोकयामि। (सरभसं निष्क्रान्ता)

विशालाक्षी– हन्त, गतैव दुहिता। कथं पश्यन्नार्यपुत्रः तूष्णीमास्ते?

वाजपेयः – किं ब्रवीषि? जामात्रा सह तामप्यानीय सदने वासयाम इति? एकत्र स्नुषा हूणतरुणी। अन्यत्र जामाता यवनः। मल्ललाटलेखस्य नास्ति सीमैव।

चन्द्रमौलिः– एतत् सर्वं द्रष्टॄणां न समीचीनतया भासते। (विशालाक्षी रुदती निष्क्रान्ता।)

सत्यव्रतः – (प्रविश्य) हन्त भ्रातः। कदा?

चन्द्रमौलिः– प्रातरेवागतः।

सत्यव्रतः – (शुनकं बालकं च विलोक्य स्वगतम्) किमिदम्? (परिक्रम्य महानसमवलोक्य) कास्विदियं हूण-तरुणीव? (तिष्ठति) (हूणतरुणी पाकार्थं कुक्कुटाण्डं दित्सति)

विशालाक्षी– (सावेगम्) मा तावदानय महानसं प्रत्यण्डम्। श्वशुरः कुप्येत्। (हूणतरुणी सभ्रूभङ्गं सरभसं निष्क्रान्ता)

सत्यव्रतः – (विलोक्य सनिर्वेदम्) अम्ब–

किमिदं किमिदं भगवान् भवनात्
चलितः किमितः परमत्र गृहे।
वसतिर्मम नैव मता तदहं
निवसामि पवित्रगृहे प्रयतः॥ १९॥

(निष्क्रान्तः)

विशालाक्षी– (परिक्रम्य सबाष्पम्) हन्त, सत्यव्रतोऽपि क्व गतः?

वाजपेयः – गच्छतु नाम। सर्वे गच्छन्तु! अहमपि यास्यामि तावत् सरसीं माध्यन्दिनानुष्ठानाय। (सकलशपाणिः निष्क्रान्तः)

चन्द्रमौलिः– अम्ब क्षुद्बाधते।

विशालाक्षी– आयान्तु। परिवेषयामि।

चन्द्रमौलिः– (उत्थाय सर्वैस्सह निष्क्रान्तः)

॥ इति द्वितीयोऽङ्कः ॥

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति मुखे निर्वेदं सूचयन् वाजपेयः।)

वाजपेयः – (दीर्घं निःश्वस्य) किं कथयेयं जगद्वैचित्र्यम्?

त्रिपूरुषं वंशमवेक्ष्य शुद्धं
निरामयं तत्रभवां सुशीलाम्।
कन्यां समानीय निजात्मजाय
कुर्याद्विवाहं त्विति पण्डितोक्तिः॥ १॥

हुं, चिरन्तनोक्तिमतिलंघ्य स्वेच्छाप्रवृत्तिमतां स्थितिः ईदृशी खलु।

विशालाक्षी– (प्रविश्य सबाष्पम्) किमेतत्? सा तु स्नुषा मुग्धमुग्धं बालकमप्यादाय अनिवेद्यैव गता। क्व गतेति न जानीमः।

वाजपेयः – गच्छतु नाम। चन्द्रमौलिनाभिहितं गुणवती शीलवती इत्यादिकम्। अनुभवतु नाम, अनुभवतु।

विशालाक्षी– किमिदमेवमभिधीयते? मास्तु वा पत्नी चन्द्रमौलेः?

वाजपेयः – हुं, कीदृशी पत्नी सा? तेन कृतस्समीचीनो वा विवाहः? तारुण्यविनोदार्थमेव। मां तु वेदान्तं बोधयति। स्वेच्छाप्रवृत्तेः फलमिदम्। भवती कुतो मुधा रोदिति?

तामसाहारपुष्टा सा त्वज्ञातकुलगौरवा।
स्वेच्छात्यक्तपतौ हूणवंशे जाता पशूपमा॥ २॥

अपि नाम जानासि हूणानामाचारम्?

वैधव्यं पतिमरणेऽपि नैव तासां
स्वेच्छातः पतिमपरं समेत्य हृष्टाः।
स्वापत्येऽप्यनिहितवत्सलत्वबन्धाः
नारीणां पशुसदृशी विचित्ररीतिः॥ ३॥

विशालाक्षी– किमेवमभिधीयते? पवित्रतमे भारतभूमिभागेऽपि ईदृशी व्यवस्था प्रचलिता वर्तते राजकीयनियोगात्।

वाजपेयः – राजकीया अपि आधुनिका ननु। अपि नाम मन्वते ते तावदार्यधर्मम्? किञ्च –

चिरन्तनोक्तिं त्विह तेऽन्यथैव
कर्तुं यतन्ते मनुधर्मशास्त्रम्।
तिरस्कृतं तैर्बत बुद्धिपूर्वं
चेष्टन्त एते कलिकालनुन्नाः॥ ४॥

तथाप्यद्यापि केचन चिरन्तनोक्तिषु बद्धादरा वर्तन्ते पूर्वाचारनिष्ठाः।

विशालाक्षी– किमिदं पूर्वाचारः पूर्वाचार इति? उद्योगैकतानानां यत्र कुत्रापि निवसतां पूर्वाचारानुष्ठितिः कथं भवेत्?

वाजपेयः – तदर्थं हूणतरुणीविवाहः कर्तव्य इति?

विशालाक्षी– स्वसौकर्यार्थमेवमपि भवेत्।

वाजपेयः – स्वसौकर्यार्थमेवमपि भवेत्। अत एव–

पूर्वानुवृत्तरीत्यैव स्वजातिकुलसम्भवाम्।
कन्यामेवोद्वहेत् धीमान् अविच्छिन्नसुखेप्सया॥ ५॥

विशालाक्षी– एवमपि यदि विच्छेदो भवेत्?

वाजपेयः – अग्निसाक्षिकविवाहे तु न तावदेवं सुलभो विच्छेदः। कलहायमानावपि वर्तेते दम्पती। हूणजातौ तु विच्छेदस्तावत् अनूचानादागतः। तत्र दोषबुद्धिरपि न जायते। अत एव पशुकल्पा इत्युक्तम्। (नेपथ्याभिमुखमवलोक्य) आयाति चन्द्रमौलिः। कथं वर्तते? पश्य तावत्–

आतपभ्रमणशोणिताननः
फाललम्बिचिकुरः श्रमाम्बुभाक्।
निष्फलत्वधिषणाप्रकाशितः
क्षोभदैन्यगलितात्मपाटवः॥ ६॥

चन्द्रमौलिः– (प्रविश्य दीर्घं निःश्वसन् वेत्रासने समुपविशति।)

विशालाक्षी– किन्नु खलु वत्स न लब्धा?

चन्द्रमौलिः– कथं लभ्यतेऽम्ब?

विशालाक्षी– कुत्र तस्याः स्थितिरित्यपि न ज्ञातम्?

चन्द्रमौलिः– द्वीपान्तरमेव गतेति ज्ञायते।

विशालाक्षी– तत्कथमवगतम्?

चन्द्रमौलिः– व्योमयानप्रयाणानुमतिपत्रकविक्रेतुः प्रदर्श्य तत्प्रतिकृतिम् अपृच्छम्। अपि नाम गतैतादृशी काचिदिति? स तु चिरं विचिन्त्य कापि सापत्यका गतेवेति ज्ञायते इति अभिहितवान्।

विशालाक्षी– अत्रत्याचारव्यवहारादिकम् असह्यमासीदिति ज्ञायते।

चन्द्रमौलिः– एवं स्यात् ?

वाजपेयः – किं कुर्मः ? स्नुषार्थं कुक्कुटाण्डः पक्तव्यः। क्रमेण गृहे कुक्कुटोऽपि पक्तव्यो भवेत्।

विशालाक्षी– अलमिदानीम् अनया वार्तया। प्रथममेव स तु वत्सः खिन्नः।

वाजपेयः – (सक्रोधम्) पिधेहि वदनम्। चन्द्रमौलिना तावत् अकृत्यं कृतम्। तत्पक्षपातिनी भवती तावत् मद्वक्त्रं पिधातुमुद्युक्तेव। अलं विकत्थनेन।

विशालाक्षी– स्पृहणीयरूपं तं बालकं त्यक्त्वा कथं वर्ते ? (रोदिति)

चन्द्रमौलिः– ममापि तावत्तं स्मारं स्मारं खिद्यते हृदयम्।

विशालाक्षी– (सगद्गदबाष्पम्) अस्मद्वंशकरीर इति हृष्टं मे हृदयम्। नेच्छा दैवस्येति ज्ञायते।

वाजपेयः – सत्यम्। नेच्छा दैवस्य–

मान्यवंशजनिमत्सु मादृशे–
ष्वीदृशः स्मृतिविगर्हितः सुतः।
हूणयोषिदुदरोद्भवः कथं
वंशवृद्धिकरतां व्रजेदिह॥ ७॥

विशालाक्षी– हन्त, हृदयस्य काठिन्यम्। स्वाभाविकसौन्दर्यैऽपि न दृष्टिः।

वाजपेयः – आम्। न मे दृष्टिस्सौन्दर्ये। सौन्दर्यैकाधीनस्य चन्द्रमौलेः पश्य तावदवस्थाम्।

सौन्दर्यं न खलु चिरानुवर्ति नार्याः
सूत्यन्तं हि तदथवा कथञ्चिदास्ताम्।
वार्धक्ये गलितकलेवरे कथं स्यात्
तत् पुंसा सुचिरविचारिणैव भाव्यम्॥ ८॥

(नेपथ्याभिमुखमवलोक्य) का स्विदियं सरभसमितः एवागच्छतीव।

निस्स्नेहधूसरितविश्लथकेशपाशा
सूर्यातपासितमुखी परिपाटलाक्षी।
अक्षालितातिमलिनाम्बरधारिणीयं
आयात्यनाश्रयवतीव निरस्तधैर्या॥ ९॥

विशालाक्षी– (निर्वर्ण्य) कथं नलिनीव ज्ञायते ?
(ततः प्रविशति यथानिर्दिष्टा नलिनी।)

नलिनी – (सबाष्पार्तनादम्) अम्ब ! (विशालाक्ष्याः चरणयोः पतति।)

विशालाक्षी– अम्ब नलिनि, किं संवृत्तम् ? कुतो वा एवमसि ?

नलिनी – (सगद्गदिकाक्षरम्) अम्ब, किं ब्रवीमि ?

विशालाक्षी– वत्से उत्तिष्ठ। (उत्थापयति।)

वाजपेयः – 'नाहमितः परं भवद्भवनसरणिमपि अवलोकयामि' इति जल्पन्ती प्रस्थिता। निर्लज्जे, कुतः पुनरागतासि ? कोऽयं वेषः ?

नलिनी – (अवनतमुखी सबाष्पं मूकेव तिष्ठति।)

विशालाक्षी– (नलिन्याः शिरः परामृशन्ती) किमासीत् वत्से ? निवेदय मे।

वाजपेयः – (सामर्षम्) मा स्पृश तां म्लेच्छदूषिताम्।

विशालाक्षी– (सबाष्पगद्गदम्) किमिदमेवं ब्रवीत्यार्यपुत्रः ? मदुदर–सम्भवा ननु दुहितेयम् ?

वाजपेयः – (सदशनदंशनम्) विशालाक्षि ! तदैव प्रमीता ते दुहिता यदा म्लेच्छेन सङ्गता। निर्लज्जे नलिनि,

न तावत् क्षणमपीह स्थातव्यं भवत्या। हुं प्रयाहि। क्वापि प्रयाहि। त्वां तु द्रष्टुं न पारयामि।

नलिनी – (साञ्जलिबन्धम्) पितः (इति वक्तुमारभते।)

वाजपेयः – (सक्रोधम्) पिधेहि वदनम्। नाहं ते पिता। त्वमपि न मे दुहिता।

विशालाक्षी– एवं क्रुद्धे तावदार्यपुत्रे किं करिष्यतीयं बाला ?

वाजपेयः – (सदन्तपीडम्) हुं बाला ... बाला... –

कृत्याकृत्यविवेकशून्यहृदयाः तारुण्यगर्वोद्धताः
स्वेच्छाचेष्टितमर्त्यमानसहरालङ्कारधूल्युज्ज्वलाः।
यूनां स्नेहपराः परस्परकरान्दोलैकबद्धादराः
खिद्यन्ते च मुधा ततोऽनुतपनात् भ्रष्टाश्च मुग्धास्सदा॥

हुं, किं ब्रवीमि कलिवैभवम् ?

विशालाक्षी– ननु किमपि गदितुकामेव वत्सा। निवेदयतु तावत्।

वाजपेयः – नाहं शृणोमि। भवत्येव शृणोतु नाम।

विशालाक्षी– किं संवृत्तं वत्से ?

नलिनी – सोऽपि युवा यवनः निजपितरौ प्रत्यनिवेद्यैव मामूढवान्।

विशालाक्षी– हन्त, ततस्ततः।

नलिनी – क्रमेण विदितोदन्तौ तत्पितरौ रुष्टौ तावदावाभ्याम् अनिवेद्यैव कथमन्यजातीययुवतिमूढवान् इत्यतर्जयताम्।

वाजपेयः – विशालाक्षि, अपि नाम श्रुतम् ?

यवनाः स्वजातिकुलगौरवस्य तेऽ
प्यवनाय नैजनियमेऽभिमानिनः।

द्विजजातिजातमनुजस्य तादृशो
ह्यभिमान एव कुलगौरवे न हि॥ ११॥

महदिदमाश्चर्यम्।

चन्द्रमौलिः– (स्वगतम्) सत्यमभिहितं पित्रा।

विशालाक्षी– ततः किं व्यवसितं तेन?

नलिनी – (सबाष्पम्) स तु मामत्यजत्। इतः परं मद्गृहं न समायातव्यं भवत्येति अभिहितवान्।

वाजपेयः – (सदन्तपीडम्) मूर्खे! लोकव्यवहारानभिज्ञे! सोऽपि गुणवान् रूपवान् इति प्रजल्प्य निर्गता हि। अपि नामेदानीं स्यात् तद्गुणानुभवः? हुं, नहि भवति लोकव्यवहारज्ञानम् आंग्लपुस्तककन्थाभारपठनेन। नाप्यलंकृत्य विश्वविद्यालयगमनेन। हुं, न ते दोषः अपि तु तारुण्यस्य। तस्य तावन्न चक्षुः।

तारुण्यव्यतिकरलब्धमूढभावाः
स्वेच्छातोऽप्यविदितभाविघोरदुःखाः।
कामार्ता भुवि मनुजा निरङ्कुशा द्राक्
जात्यन्धा इव कुहरे पतन्ति घोरे॥ १२॥

चन्द्रमौलिः – (स्वगतम्) शिक्षितोऽस्म्यहमपि।

सत्यव्रतः – (प्रविश्य) हन्त भोः, कलुषमयोऽयं कालः।

स्वाचारनिरतस्यापि ब्राह्मणस्य कलौ युगे।
उपद्रवैर्बहुविधैः स्थितिः क्लेशप्रदायिनी॥ १३॥

(परिक्रम्य, पितरौ प्रणम्य) किमिदं किंवदन्ती?

वाजपेयः – (सावेगम्) किं किं किंवदन्ती?

सत्यव्रतः – आम। अत एवागतोऽहं विचारयितुम्।

वाजपेयः – ब्रूहि वत्स, कीदृशी सा?

सत्यव्रतः – म्लेच्छदूषितां वाजपेयसुतां नलिनीं म्लेच्छपिता सन्तर्ज्य निराचकारेति।

वाजपेयः – हा हतोऽस्मि। (झटित्युपविश्य) अम्ब, विशालाक्षि त्वदुदरान्नलिनी नैव जाता किन्त्वपकीर्तिः। भो वाजपेयहतक किमित्यद्यापि जीवसि?

सत्यव्रतः – किञ्च अस्मत्प्रजावती सापत्या तावदनिवेद्यैव क्वापि गतेति।

वाजपेयः – (सदन्तपीडम्) प्रजावती प्रजावती। कीदृशी सा प्रजावती हूणतरुणी?

चन्द्रमौलिः– (स्वगतम्) हन्त, अस्मद्गृहमेव आन्दोलितमिव।

सत्यव्रतः – वाजपेय इति नाम ते पितुः
सार्थतां भवदगारमप्यहो।
पूततामभजतामितः परं
ब्राह्मणोऽहमिति नो वदेद्भवान्॥ १४॥

नलिनी – (सगद्गदम्) मातः, मत्सखी सरोजिन्यपि मद्गृहं मा प्रविश म्लेच्छदूषिता भवतीति निराचकार।

विशालाक्षी– (सगद्गदम्) अम्ब, विदितोदन्तः को वा प्रवेशयति गृहाभ्यन्तरम्?

सत्यव्रतः – उत्पथगामिनां सर्वेषामपि ईदृशी दशा, सम्यग्जानीहि।

हन्त बन्धुजनाः साक्षात् प्रेमपूरितमानसाः।
अपीदृशानां भ्रष्टानां सहवासं न मन्वते॥ १५॥

दुर्वृत्तैकतानास्तरुणा यावत्तारुण्यं स्त्रीषु तावत् स्निह्यन्ति। किञ्च तुच्छान्यजातीयानाम् अस्मादृशेषु स्थिरतरा प्रीतिः कथं सम्भवेत्? किञ्च अधिगतविद्याप्युद्योगरतापि निराश्रया नारी कथमेकाकिनी स्वातन्त्र्येण स्थातुं शक्नोति? न स्त्री स्वातन्त्र्यमर्हतीति ज्ञानिभिः मुधा नोक्तम्। नलिनि, इदं तावत् सम्यक् मनसि निधेहि–

मनुप्रभृतिपण्डितैर्नहि मुधानृतं प्रोच्यते
न चापि ललनाजने ननु तिरस्कृतिः कापि च।
गृहस्थितिसुखोन्नतिप्रदमनीषयैवेरितं
स्त्रियस्तु परतन्त्रतां पुरुषनिर्मितां मन्वते॥ १६॥

अधीतविद्या अपि लब्धोद्योगा अपि विवेकविदितैतत् विषयाः स्वजातीयपुरुषकृतपाणिग्रहाः गृहस्थधर्मे तावत्सुखमेधन्ते। भवादृश्यस्तावत् एवंविधाः।

वाजपेयः – वत्स सत्यव्रत, अलं बोधनेन। ऊषरक्षेत्रे तावदुप्तमिव।

सत्यव्रतः – पितः, न हि तथा। इदानीं तावदियं स्वकृत्ये पश्चात्तापाग्निपरिप्लुष्टा वर्तते।

वाजपेयः – हुं, निर्वर्तिताकार्यायाः किमेतेन पश्चात्तापेन? भिन्नः मृद्घटः पुनर्योजयितुं शक्यते वा? तेन सलिलमाहर्तुं शक्यते वा?

सत्यव्रतः – तत्सत्यमेव। भ्रष्टाचाराणां दशां कथं कथयेयम्?

भ्रष्टाचारप्रचुरजगतीकुक्षिपातास्ततोऽन्ते
पश्चात्तापप्रगुणहृदयक्लेशवह्निप्रदग्धाः।

स्वात्मन्येव स्मृतिपथसमायातदुष्कृत्यदीर्णाः
संलीयन्ते निजजनुधुरि स्थातुमेव त्रयातीः॥ १७॥

नलिनी – (सबाष्पगद्गदमञ्जलिं बद्ध्वा) घोरतरे गर्ते पतितां मां कथमपि उद्धर्तुमर्हन्ति भवन्तः।

वाजपेयः – (सदन्तपीडम्) उद्धारः उद्धारः। हुं, प्राणत्याग एव उद्धारः।

विशालाक्षी– हन्त हन्त! किन्नु खल्विदम् एवमभिहितम्? वत्से नलिनि, मा रोदीः। रुदतीं भवतीं दृष्ट्वा मम तावत् उदरे वह्निपात इव भवति। वत्स सत्यव्रत, अस्यास्तावत् कञ्चन मार्गं प्रदर्शय।

सत्यव्रतः – अम्ब –

सर्वत्र प्रसृतां हन्त किंवदन्तीं सुदुस्सहाम्।
पिधातुं नैव शक्नोति कोऽपि किं करवाण्यहम्॥ १८॥

विशालाक्षी– तर्हि का गतिः?

वाजपेयः – हुं दुर्गतिरेव गतिः।

नलिनी – (सबाष्पम्) पितः, कथमपि मां पालय विवेकशून्यतया भ्रष्टास्मि।

वाजपेयः – भ्रष्टया त्वया कथमत्र स्थातुं शक्यते?

इह स्थितां त्वामवलोक्य बान्धवाः
विगर्हयन्त्यन्तत एव मामपि।
परित्यजन्त्यात्मगतिः कथं ततः
द्विजस्य कर्म प्रचलेत् कथं वद॥ १९॥

नलिनी – (सार्तनादम्) अम्ब किं करोमि ? पित्रा तावद्यथाभिहितं तथैव त्यक्ष्यामि यत्र कुत्रापि प्राणान्।

विशालाक्षी– सत्यव्रत! किमिदं तूष्णीं स्थितोऽसि ?

सत्यव्रतः – (विचिन्त्य) अम्ब, मम तावदेवमाशयः।

विशालाक्षी– (सदैन्यबाष्पम्) तात सत्यव्रत! आशय इति त्यक्तुमेनाम् अबलां कृपया मा यतस्व।

सत्यव्रतः – (सस्मितम्) हुं, अबला स्यान्नाम। निवेदयामि मदाशयम्।

विशालाक्षी– तात, किं तत् ? निवेदय।

सत्यव्रतः – अस्मद्गृहे तावदेनां निवेशयितुं नैव शक्नुमः। यतो जना विगर्हन्ते।

विशालाक्षी– तर्हि किं कर्तुमिच्छसि ?

सत्यव्रतः – गृहान्तरं परिकल्प्य तत्र निक्षिपामः।

विशालाक्षी– तस्या जीविका कथम् ? कथं वा विद्याभ्यासः ?

वाजपेयः – (सामर्षम्) अलं विद्याभ्यासेन।

सत्यव्रतः – पितः ! न तथा। पूरितविद्या यत्र कुत्रापि प्राप्तोद्योगा निर्वहतु निजजीविकाम्। मास्तु अस्माकमस्या भारः।

वाजपेयः – साधु वत्स, साध्वभिहितम्।

संसर्गजो दोषलवोऽपि नास्ति
त्यक्ता न सेयं दुहितापि दूरे।
जनापवादस्य न वावकाशो-
प्यस्मद्गृहं शुद्धमभूच्च दिष्ट्या॥ २०॥

विशालाक्षी– (सहर्षम्) तथैवास्तु वत्स।

सत्यव्रतः – (चन्द्रमौलिमवलोक्य) भ्रातः, कथं भवान्?

चन्द्रमौलिः– यथादिशसि तथा कर्तुं सिद्धोऽस्मि।

सत्यव्रतः – धृतनूतनयज्ञोपवीतः तावदिहैव आस्व। यदा कदापि येन केनापि द्विजन्मना यदि दीयेत निजदुहिता, तदा कृतोद्वाहः क्वापि तावदिहैव कृतोद्योगस्सुखी भव।

चन्द्रमौलिः– तथैवास्तु। महान् प्रमोदः।

वाजपेयः – (सहर्षम्) वत्स सत्यव्रत! अस्मद्गृहस्थितिस्तावत् भवता सम्यग् व्यवस्थापिता। भवानपि इहैवास्मद्गृहे गृहमेधी भवतु।

सत्यव्रतः – (सस्मितम्) पितः, वेदाभ्यासजडाय मह्यं को वा ददाति कन्याम्?

विशालाक्षी– न हि तथा वत्स। भवादृशो विवेकी क्वापि लभ्यते वा? केवलांग्लविद्याभ्यासेन नैव जायते तावदीदृशी विवेकिता।

वाजपेयः – (सस्मितम्) हन्त, तवाम्बाया वक्त्रादपि सद्यस्तावत् ईदृशी वाक् समुद्गता।

सत्यव्रतः – अनुभूता खल्वम्बयापि इदानींतनी स्थितिः? स्त्रीणां मौढ्यमेवम्।

वाजपेयः – अथ किम् अथ किम्?

सत्यव्रतः – पितः, किं ते भूयः प्रियमुपहरामि?

वाजपेयः – वत्स सत्यव्रत–

दूरत्यक्ता सुता नाभूत् चन्द्रमौलिर्विवेकभाक्।
अम्बा ते त्यक्तमोहा च किमितोऽप्यस्ति मे प्रियम्।।२१।।

तथापीदमस्तु।

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः।। २२।।

(निष्क्रान्तास्सर्वे)

।। इति तृतीयोऽङ्कः।

जग्गूवकुलभूषणमहाकविकृतं
वीरसौभद्रं नाम नाटकं
सम्पूर्णम्।

मैरेयपारम्यम्

भूमिकाः

(प्रवेशानुक्रमेण)

सूत्रधारः
गान्धिः
पानलम्पटौ पुरुषौ
योषित्
भर्ता
सत्यव्रतः
नास्तिकः

मैरेयपारम्यम्

॥ प्रथमोऽङ्कः ॥

कृष्णाग्रजो हली श्रीमान्मदिरामोदमेदुरः।
मदघूर्णिततात्राक्षः पातु वश्शुभ्रविग्रहः ॥ १ ॥

(ततः प्रविशति सूत्रधारः)

सूत्रधारः – (साञ्जलिबन्धं)
एवमार्यमिश्रान् विज्ञापयामि –
नानानाटकनिर्माता यः कोविदमुदावहः।
स एवास्यापि कर्ता हि जग्गूवकुलभूषणः ॥ २ ॥

(नेपथ्ये)

पिपासाक्रान्तमेतद्धि जगन्मैरेयमज्जितम्।
किं करोमि कथं वैतद्वारयामि न वेद्म्यहम्॥ ३ ॥

सूत्रधारः – हन्त, मयि विज्ञापनैकताने शब्द इव। ज्ञास्यामि तावत्। (नेपथ्याभिमुखमवलोक्य) आं, ज्ञातम्। महात्मा गान्धिः पानलम्पटानां विषये निर्वेदेन व्याहरति। (निष्क्रान्तः)

(ततः प्रविशति महात्मा गान्धिः)

गान्धिः – (पिपासाक्रान्तेति पूर्वोक्तमेव पठित्वा नेपथ्याभिमुखम् अवलोक्य) कावेतौ?

निजभुजपरिरम्भादर्शितस्नेहहृष्टा–
वनुलपनपरौ तौ घूर्णितात्मोत्तमाङ्गौ।
अरुणनयनघोरौ निर्निमित्तं हसन्तौ
स्खलितचरणधूतौ स्वेच्छया गन्तुकामौ॥ ४॥

(ततः प्रविशतः यथानिर्दिष्टौ पुरुषौ)

एकः – (गान्धिमवलोक्य भ्रामितमस्तकस्सम्लिष्टाक्षरं) को भवान् ?

गान्धिः – किं मां न जानासि ?

अन्यः – (सोल्लुण्ठनं) रे, अयं तावज्जगत्प्रसिद्ध इव भणति।

गान्धिः – (सस्मितं) स्यान्नामैतत्। कौ युवाम् ?

एकः – सुरलोकादागतवन्तावावाम्।

गान्धिः – (विहस्य) कथं वर्तते सुरलोकः ?

अन्यः – **भ्रमति च सुरलोको भ्रामयत्यस्मदादीन्**
जगदिदमिव सोऽपि प्लावयत्यासमन्तात्।
सुखजलनिधिमध्ये क्वापि तारापथं द्राक्
नयति च किमु हन्त ब्रूमहे तस्य सौख्यम्॥५॥

गान्धिः – केन तावदेतादृशसुरलोकप्राप्तिः ?

अन्यः – (काचचषकं प्रदर्श्य) अनेन, भवतोऽपि सुरलोकप्राप्तिरस्तु। ददामि ते। (इति काचचषकं दातुं पुरः प्रसारयति)

गान्धिः – मास्तु। किञ्चिद्विवक्षुरस्मि यदि श्रोतुकामौ।

उभौ – (परस्परं मुखमवलोक्य साट्टहासं) किमपि वक्तुमिच्छत्यावाभ्याम्। किं वक्ष्यति लोकानभिज्ञोऽयम् ?

गान्धिः – न तथा। समुपविशतम्।

उभौ – शृणुवस्तावत्। (इत्युपविशतः)

गान्धिः – त्यज्यतां व्यसनमिदम्।

उभौ – (साट्टहासं) किमुक्तम् व्यसनमिति ? न जानाति भवान्। यदि परिचयो भवेत् तदा भवानपि न मुञ्चति।

गान्धिः – (सस्मितं) मास्तु तावदेतत्परिचयो मे।

एकः – तथा न वक्तव्यम्। किञ्चिदास्वाद्यताम्। तदनन्तरमेवं न वदसि। आत्मानमेव विस्मारयति। गगने क्वापि प्लावयति च।

गान्धिः – ततस्ततः।

उभौ – ततश्च निद्रादेव्या समालिङ्गितौ जगदेव विस्मृत्य तस्यामेव लीनौ भवावः।

गान्धिः – निद्रानन्तरं प्रजागरे कीदृगनुभवः?

एकः – **ग्लानिश्शरीरे नयनं सुशोणम्**
अपाटवं चावयवेषु वक्त्रम्।
दुर्गन्धपूर्णं निजकार्यसक्तता–
व्यपोह एवं भवति प्रबोधे॥ ६॥

गान्धिः – पानार्थं कियन्ति द्रविणान्यपेक्षितानि प्रतिदिनम्?

एकः – (सहासं) किं ब्रवीमि? न पर्याप्तं धनम्।

गान्धिः – तर्हि, किं करोषि?

अन्यः – तत्र तत्र कर्मणा संपाद्यते। पर्याप्त्यर्थं गृहिण्या विभूषणादिकं विक्रीयते।

गान्धिः – किमु ददाति गृहिणी सन्तोषेण?

एकः – हन्त भोः, यदि न दीयते तदा ताडयित्वा बलादूह्यते।

गान्धिः – कत्यपत्यानि युवयोः?

उभौ – सन्ति पञ्चषाणि।

गान्धिः – तेषां का गतिः?

एकः – भगवानेव।

गान्धिः – किमुचितेयमुक्तिः ?

भगवता ननु सूनुरिरक्षिषुः
प्रथममेव पिता विहितो भुवि।
तदधुना स भवान्भगवान्खलु
स्वतनयावनकर्मणि धर्मतः॥ ७॥

तदधुना हितं ब्रवीमि। अभ्यास एव सर्वस्य निदानम्। क्रमेण मन्दं मन्दं तादृशोऽभ्यासः परित्याज्यः। अयमभ्यासोऽनर्थकारी। यद्यपि परित्यागे श्रमो भवति स तु सह्यः।

उभौ – (परस्परं मुखमवलोक्य) सम्यगभिहितमनेन। (ससंभ्रमं पटाक्षेपेण प्रविश्य कापि योषित् सरोदनं गान्धिपादयोः पतित्वा) भगवन्, त्रायस्व मां मङ्गलसूत्रदानेन।

गान्धिः – (सावेगं) किमभूत् ?

योषित् – मद्भर्ता संताड्य मामनुधावति।
(भर्ता सोच्छ्वासं सावेगं प्रविश्य सदन्तपीडं पाणिना भार्याचिकुरं गृहीत्वा कर्षति)

गान्धिः – हन्त भोः, शान्तात्मना भवता भवितव्यम्।

भर्ता – को भवान् मामुपदेष्टुम् ?

गान्धिः – (साञ्जलिबन्धं) भवन्तं प्रार्थये, शान्तो भव। किमर्थमेनामेवं पीडयसि ?

भर्ता – अस्मद्गृहविषये को भवान्मध्ये प्रवेष्टुम् ?

गान्धिः – आर्तामेनामवलोक्य दयया पृच्छामि।

योषित् – (साञ्जलिबन्धं) भगवन्, अहं तावदावेदयामि सर्वमपि।

गान्धिः – आवेदयतु भवती। शृणुमस्तावत्।

योषित् – प्रतिदिनमपि भर्ता भूषणेष्वस्मदीये-
ष्वतिकटुवचसैकं पीडयित्वैव गृह्णन्।
प्रमुदितवदनो द्राक्पानगेहं प्रयातः
प्रपिबति च यथेच्छं नैव शक्नोमि सोढुम्॥ ८॥

गान्धिः – अपि नाम ते भर्ता उद्योगे वर्तते?

योषित् – हन्त, तादृशं भाग्यं नैवार्जितं मया। तस्य नैवोद्योगः।

गान्धिः – तर्हि, देहयात्रा कथं प्रचलति?

योषित् – अहं तावदुपाध्यायी प्रवर्तयामि देहयात्राम्।

गान्धिः – अपि नामापत्यमस्ति?

योषित् – दैवयोगात्तन्नास्ति।

गान्धिः – किं करोति ते भर्ता?

योषित् – आसायं गृहे एव तूष्णीं तिष्ठन्प्राप्ते च काले पातुं धावति।

गान्धिः – हन्त, महदिदं कष्टम्।

योषित् – (सबाष्पगद्गदं) किं कथयेयं भगवन्? सर्वस्वदानेन तावदिदानीं रिक्ता संवृत्तास्मि।

भर्ता – (सदन्तपीडं) अलं विकत्थनेन।

गान्धिः – किमिदं विकत्थनम्? अम्ब, निवेद्यतां तावन्नागरिक-स्यालाय।

योषित् – (सनिर्वेदं) किं तेन? सर्वेऽप्युत्कोचग्राहिणः। किञ्च गृहच्छिद्रं बहिः प्रकाशयितुं नोत्सहे।

गान्धिः – इदानीम्।

योषित् – इदानीं तु–

स्त्रीणां माङ्गल्यमेतद्धि कण्ठस्थं शोभते सदा।
आच्छिद्याशु तदादातुं न्यधात्पाणिमयं गले॥ ८॥

गान्धिः – (पुरुषमवलोक्य) हन्त भोः, किमिदमुचितन्ते? भर्तृत्वमपि तयैव निर्वाह्यते। शांतात्मा सन्विमृशतु भवानेव–

रुग्णता वपुषि वित्तनाशनं
भार्ययापि कलहोऽक्षिशोणिमा।
श्वासकोशशिथिलत्वमुद्भमः
प्राणहानिरपि संभवत्यहो॥ ९॥

तावुभौ – (परस्परं मुखमवलोक्य) समीचीनतया वदत्ययम्। सत्यमेव यदभिहितमनेन।

गान्धिः – (पुरुषमवलोक्य) यद्यपि दुस्त्यजमेव तथाप्यभ्यासेन मंदं मंदं त्याज्यम्।

भर्ता – महात्मन्, महानहमपराधी प्रबुद्धोऽस्मि भवदुपदेशेन।

गान्धिः – भवतु नाम। मत्सकाशे कञ्चित्कालं तिष्ठ।

भर्ता – यथादिशति भगवान्। (इति भार्यामुखं पश्यति)

योषित् – महान्प्रमोदः।

तावुभौ – (सांजलिबन्धं) आवामपि प्रबुद्धौ स्वः। (इति प्रणम्य निष्क्रातौ)

गान्धिः – (दीर्घं निःश्वस्य) एवमेव सावधानमुपदिश्य सर्वेषां पिपासालंपटत्वं कथमपि निवारयामि, अत्र भगवान्साह्यकृत् भवेत्।(इति निष्क्रान्तास्सर्वे)

॥ इति प्रथमोऽङ्कः ॥

।। द्वितीयोऽङ्कः ।।

(ततः प्रविशति गान्धिः)

गान्धिः – सत्यव्रतो व्रतपरायण एव नित्यं
स्वाचारनिष्ठहृदयो भगवत्प्रसादम्।
वांच्छन्सदा नियतभोजनकृत्प्रशान्तः
मन्मित्रतामुपगतो बत वर्ततेऽत्र।। १ ।।

स्यान्नाम। तमवलोकयामि। (इति परिक्रामति)
(ततः प्रविशति निजगृहे चतुष्पात्पीठे निषण्णो विषण्णहृदयस्सत्यव्रतः)

सत्यव्रतः – (सचिन्तं) किं ब्रूमो जगद्वैचित्र्यम्? हन्त, जगति कलिकलुषिते नियतस्ववृत्तौ स्थितानां स्थितिरेव क्लेशजननी खलु।

गान्धिः – (उपसृत्य) किन्नु खलु विषण्ण इव?

सत्यव्रतः – (सादरमुत्थाय) अहो, किमिदं मद्गृहं प्रत्यतर्किंतागमनम्? महान्प्रमोदः। उपविशतु भवान्। (आसनं दर्शयति)

गान्धिः – (उपविश्य)
जगदिदमवलोक्य क्लिष्टचित्तोऽहमद्य
त्वदुपमजनशून्यं द्रष्टुकामो भवन्तम्।
प्रमुदितहृदयोऽस्मि प्राप्तवांस्त्वत्सकाशं
तव कुशलमपीच्छन् प्रष्टुकामो भवामि।। २ ।।

सत्यव्रतः – किं कुशलं पृच्छसि? इदानींतनकाले कुत्र वा कुशलम्? तत्रापि स्वधर्मनिष्ठे जने नैव कुशलवार्तापि।

गान्धिः – किमेवं ब्रवीषि, किं संवृत्तम् ?

सत्यव्रतः – किं ब्रवीमि आधुनिकव्यवहारविषये ?

गान्धिः – किं संवृत्तम् ? निवेदय तावत्।

सत्यव्रतः – महाधिकारिणां भोजनार्थं गोष्ठी प्रचलिता।

गान्धिः – ततस्ततः।

सत्यव्रतः – अहमपि तद्गोष्ठ्यन्तर्गतः। अहमप्यधिकारी खलु।

गान्धिः – भक्ष्यापणात्सर्वमपि भोज्यवस्तु समानीतं स्यात्।

सत्यव्रतः – अथ किं, मया तावत्तदखिलमप्यनङ्गीकृतम्।

गान्धिः – स त्वेकोपराधस्स्यात्।

सत्यव्रतः – अथ किं, तेत्वधिकारिणः परस्परं मुखमवलोक्य स्मयन्ते स्म।

गान्धिः – ततः।

सत्यव्रतः – तदनु मैरेयचषकाः सर्वेषां पुरतः निक्षिप्ताः। मया तावच्चक्षुषापि नेक्षितः। तदा तावदस्मद्गोष्ठ्यनर्हो भवानिति तैराक्षिप्तः।

गान्धिः – हन्त, कालमहिमा। ततः ?

सत्यव्रतः – नियमोल्लंघनं कर्तुं न शक्नोमीत्युक्तं मया।

गान्धिः – अस्मिन्विषये प्रवेशस्तावत्तेषामनुचितमिति प्रतिभाति मे। किं कुर्मः ?

सत्यव्रतः – तदनु उपरितनाधिकारिणे निवेद्य तैरहमधःकक्ष्यायां पातितोऽस्मि।

गान्धिः – **किं किं न कारयति हन्त कलिर्मनुष्यैः**
स्वीयैकधर्मकरणेप्यमितांतरायम्।
उत्पाद्य धर्मशकलं यदि वर्ततेऽत्र
तच्चापि नाशयति किं वयमद्य कुर्मः॥ १२॥

किञ्च, जातिप्राधान्यं तावदनर्थाय। बुद्धिप्राधान्येन भवितव्यम्। इदानीं तदेव नास्ति।

सत्यव्रतः – अत एव नूतनतया निबद्धभवनसेतुनिपातः, भिषजामव्यवहारः।

गान्धिः – तत्सत्यमेव।

सत्यव्रतः – किं ब्रवीमि कलिवैभवम्?

कूपोदकं मृग्यमभूत्तटाकः
शुष्को बभूवाथ विहारभूमिः।
स्वकर्मकर्तुं नलिकोदकं स्यात्।
ब्राह्मण्यमासीत् स्वयमेव नष्टम्॥ १३॥

गान्धिः – अस्तु नाम ब्राह्मण्यवार्ता, वक्तुमपि जिह्वा परावर्तते।

केचिल्लवित्रं च्छुरिकांच केचित्
केचित्कुठारं लगुडं गृहीत्वा।
पानप्रमत्ताः पथि मानवान्प्राक्
संताडयामासुरनागसोऽपि॥ १४॥

सत्यव्रतः – (सनिःश्वासं) किं कथयेयम्–

जारभयं चोरभयं प्राणभयं च भवति सर्वत्र।
कथमिव सुखिनो मर्त्याः निवसेयुर्निर्भयं लोके॥ १५॥

गान्धिः – इतः परं लोके सुखं स्वप्नेऽपि दुर्लभम्। मत्संकल्पस्तावद्विपरीततया परिवर्तते।

सत्यव्रतः – तत्सत्यमेव–

बाह्यप्रपञ्चानुभवेन मर्त्याः
स्वपंति तच्चिंतनसक्तचित्ताः।

स्वप्नेऽपि तादृग्भयदर्शनेन
सावेगमुत्थाय पुनः स्वपंति॥ १६॥

गान्धिः – एवं भवितुं जनानां नैव दोषः। अपि तु कलेरेव।

सत्यव्रतः – एतादृशे कलौ तावदस्मादृशानां जनिरेव मास्तु इति भगवति प्रार्थये।

गान्धिः – हन्त भोः, कलेः प्रथमपाद एवेतादृशी दशा, उत्तरत्र किं वक्तव्यम् ?

(पटाक्षेपेण प्रविश्य नास्तिकसुहृत्)

नास्तिकः – भवता भगवति प्रार्थये इत्युक्तं, यदि विद्येत भगवान्।

सत्यव्रतः – किमेवमभिधीयते ? नास्ति किमु भगवान् ?

नास्तिकः – यदास्ति भगवान् तर्हि–

दुर्वृत्ता निर्दया ये च तेषामभ्युदयो भुवि।
दृश्यते धर्मनिष्ठानां कथं क्लेशो भवेन्मुधा॥ १७॥

किञ्च –

देवालये देवविभूषणानां
चौर्यं तथैवार्चकतोदनं च।
दैवं तु तूष्णीं बत वर्तते हि
तस्यापि भूयात्कलिचोदनं किम्॥ १८॥

सत्यव्रतः – मयाप्येतच्चिंत्यते।

नास्तिकः – पानेन संप्रत्यमितं सुखं तु
लभामहे हन्त वयं भवंतः।
व्यर्थं कृशा दैवमिति प्रलुब्धाः
भवन्ति यद्यस्ति तदेव रक्षतु॥ १९॥

गान्धिः – एवं न वक्तव्यम्। अस्त्येव भगवान्।

सत्यव्रतः – पानलंपटानां कलिवैभवभवमिदं किञ्च, सहधर्मिणीनां क्लेशं किं कथयेयम्? कस्यचिद्गृहमेधिनो गृहं गतवानहम्। सा तु–

नाधुनापि गृहमागतः पतिः
मध्यरात्रमभवत्कथं सहे।
पालयामि च बुभुक्षिता किय–
त्कालमित्यरुदद‌श्रुविक्लवा॥ २०॥

तदा केचिन्मार्गे पतितं तमूढ्वा गृहं प्रापितवंतः। तादृशं पतिमवलोक्य दीनदीना मूकेव सबाष्पा तस्थौ। तादृशावस्थं तमवलोक्य निर्व्यापारः स्थाणुरिव स्थितोऽभवम्। किञ्चि, किं कथयेयम्? काश्चिन्नार्यः निजपतिव्यवहारमसहमानाः प्राणानेव तत्यजुः।

गान्धिः – एवं स्थितेऽपि पुरुषाणां नैव जाता सद्बुद्धिः।

सत्यव्रतः – कथं वा जायेत सद्बुद्धिः? पानमहिमा तादृक् स्यादेतत्। नार्योऽपि कुत्रचित्पिबंति।

नास्तिकः – हूणाः पिबंति खलु। ते तु दृढकायाः रक्तप्रचुराः प्रकाशंते हि।

गान्धिः – मौढ्यमेतत् –

हिमानीव्याप्तत्वाज्जडपवनसंव्यापृततया
सदा तस्मिन्देशे प्रतिगृहमुपात्ताग्निनिकटाः।
पिबंत्येते हूणाः जडपवनपीडापरिहृतेः
कुतो वा हूणानामनुकरणमत्रापि च भवेत्॥ २१॥

सत्यव्रतः – सत्यम् अनुकरणमेवात्र। पानेन रुग्णा भवन्ति।

गान्धिः – किञ्च–

हिमपातातिरेकेण शिरस्त्राणं धरंति ते।
तस्य नास्त्यवकाशोऽत्र वृथा तद्धारणं खलु॥ २२॥

सत्यव्रतः – धूमपानं सुरापानं द्वयमेतद्विगर्हितम्।
सर्वत्र व्यापृतं ह्येतत्किं कुर्मो जगदीदृशम्॥ २३॥

गान्धिः – स्यान्नामैतत्। एतत्पानं सर्वत्र व्याप्तम्।

नास्तिकः – अथ किमथ किम्? एतदुपदेशेनैव वारयितुं शक्यम्।

सत्यव्रतः – गतानुगतिकः खलु लोकः। न कस्यापि परमार्थे दृष्टिः।

गान्धिः – (सस्मितं) एते जनाः सन्मार्गोपदेष्टारं जडं मन्यमानाः पाषाणशकलपातनेन धावयंति। इतोऽप्याश्चर्यं किम्?

सत्यव्रतः – किं ब्रूमः? केचिदपि हूणाः लब्धप्रज्ञाः पानादिकमुत्सृज्य वेषभाषादिषु भारतजनाननुकुर्वंति। संस्कृतभाषाभ्यासकृतादराः भवन्ति। अत्रत्यानां तदपि न।

गान्धिः – तस्माद्भगवन्तमेव प्रार्थयामः –

क्लेशावहं तद्व्यसनं व्यपोह्य
दीर्घायुरारोग्यसुखानि दत्त्वा।
सद्बुद्धिदाता भगवाञ्जनानां
सर्वत्र सन्मङ्गलमातनोतु॥ २५॥ इति

(भरतवाक्यम्)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक् पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैः संभृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥ २६॥

(निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

जग्गूवकुलभूषणमहाकविकृतं
मैरेयपारम्यं नाम नाटकं
सम्पूर्णम्।

❀❀❀

THE HINDU, FRIDAY AUGUST 24,1984

[ON THE HAPPY OCCASION OF SRI ALWAR IYENGAR WINNING THE INDEPENDENCE DAY AWARD]

RICH CONTRIBUTION TO SANSKRIT AND KANNADA

Jaggur Alwar Iyengar Popularly known by his pen name Jaggu Vakula Bhushana is a noted Sanskrit scholar who has made rich contribution to the language through his works in the last half a century.

Winner of the Independence Day award for Sanskrit scholars this year. 82-year old jaggu Vakula Bhuashana began his works at a tender age of 18 and in the last 50 years has covered a very wide area in prose, poetry, verse, drama, slokas, stotras, champukavya, dialogue and discussion styles. His forte being that of a 'poet dramatist'.

Born in a small village - chatraghosha — Eight km from the famous Vaishnavite pilgrim centre of Melkote, Jaggu Vakula Bhushana has 65 publications in Sanskrit and seven works in Kannada to his credit. He began his career as a teacher in the Sanskrit patashala of Melkote and served the patashala for 27 years. Even after retirement he has been pursuing his literary interests zealously.

Jaggu Vakula Bhushana has written many plays as preludes to dramas of well-known Sanskrit poet – dramatists of yore like Bhasa, Bhattanarayana, Vishakadatta and Kalidasa.

'Maniharana' is the prelude to Bhasa's "Oorubhanga", "Adbhutamśuka", epilogue to Bhattanarayana's "Venisamahra", "Pratigna Kautilya" again an epilogue to poet Vishakadatta's

"Mudrarakshasa", and "Prasanna Kasyapa", prelude to Mahakavi Kalidasa's "Shakuntala" and 'Veera Soubhadra' prelude to Bhasa's 'Doota Ghatodhgaja'. In all the compositions Vakula Bhushana is said to have recreated the same style as of those poets as though each is a continuation of the original theme and style of the respective authors.

He was awarded a gold medal by the then ruler of Mysore, His Highness Sri Krishna Raja Wodeyar for his play 'Pratigna Kautilya'. In 1936, the Sanskrit Sahitya Parishat honoured him with Samskrita Seva Sakta silver medal and he was conferred with the title 'Vidya Visharada' for his plays 'Prasanna Kasyapa' and 'Pratigna Kautilya'. In 1968 and in 1981 the Karnataka Government honoured him for his contribution to Sanskrit.

A few of his books had been prescribed by universities all over the country for degree and post-graduate classes.

Bangalore Staff Reporter.

TIMES OF INDIA, BANGALORE, FRIDAY, NOVEMBER 6,1992.
(ON THE EVE OF THE POET'S 90TH BIRTHDAY CELEBRATION)

LITERARY GENIUS

"........ Born into a poor but scholarly family of Sanskrit vidwans in Melkote's Kodekoppal village, Alwar Iyengar seemed destined to become a scholar himself. He grew up into the role effortlessly, surrounded as he was by eminent men of letters — his grandfather, Jaggu Shingriengar, a famous Sanskrit poet; his uncle and preceptor, Jaggu Venkatacharya, also a vidwan and author of several Sanskrit works. But Alwar was to surpass all expectations, making a niche for himself as a poet-dramatist of exceptional quality.

Young Alwar's life took shape in the devout ambience of Melukote, a holy place in Mandya district. Fearing his talents may wither in the small, nondescript hamlet, Alwar moved away and approached the Maharaja of Mysore. When the budding poet demonstrated his poetical prowess, the king honoured him. Later, the title 'Vidya Visharada' was conferred on him by Nālvadi Krishnaraja Wodeyar, and the latter's successor, Jayachamaraja Wodeyar, also presented the poet with a cash award and shawls. The state and central governments have also conferred honours on the Sanskrit scholar, the latest reward to come his way being the President's medal which carried a citation and a grant of Rs.10,000 per year.

The little boy from a remote hamlet and humble beginnings has come a long way. At 90, Alwar Iyengar, better known by his pen name, Vakula Bhushana, today ranks among the topmost of modern Sanskrit literateurs.

What makes his writings exclusive is the characteristic ease with which, the verses seem to emerge. Looking back on how he composed the epic poem Abhutadootam, The nonagenarian poet says that he often went to Dhanushkoti, a few miles from Melkote and, as he sauntered about in solitude, letting the quiteness of the place sink in, the verse seemed to flow into his mind. Upon returning home, he would jot them down. This became a routine event and the entire poem was composed in the same fashion, he recounts, with his endearing toothless smile. "This Mahakavya (Adbhutadootam)," writes Prof. K.T. Pandurangi, "can easily be ranked along with the mahakavyas of the early centuries."

A major chunk of his writing - 22 - are plays, ranging from short one act plays to full-fledged 10-act plays. Vakula

Bhushana's plays are said to combine rare qualities of being poetic, powerful and stageable.

Vakula Bhushana, who is celebrating his 90th birthday today, has just completed writing two plays based on the lives of Alwars (Tamil Vaishnava saints) - a testimony of an alert mind and ageless literary genius.

............."

B. Ranjitha

ಉದಯವಾಣಿ, ರವಿವಾರ, 30-9-1984

(ಸ್ವಾತಂತ್ರ್ಯೋತ್ಸವ ಸಂದರ್ಭದಲ್ಲಿ ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯ ಸೇವೆಗಾಗಿ ರಾಷ್ಟ್ರಪತಿ ಪ್ರಶಸ್ತಿ ಪಡೆದಾಗ...)

"........... ಹದಿಹರೆಯದಲ್ಲೇ ಇವರು ಕಾವ್ಯರಚನೆಗೆ ಆರಂಭಿಸಿದ್ದು ಒಂದು ದೈವಕೃಪೆ ಅಷ್ಟೇ ಎಂದು ಅವರು ಹೇಳುತ್ತಾರೆ. ಕಾವ್ಯರಚನೆ ಒಂದು ತಪಸ್ಸು. ಈ ತಪಸ್ಸು ಅನುವಂಶೀಯವಾಗಿ ಕೈಗೊಳ್ಳಲ್ಪಟ್ಟಿದೆ ಎನ್ನುತ್ತಾರವರು. ಅವರ ಕಾವ್ಯರಚನೆಗೆ ಮೇಲುಕೋಟೆಯ ವಾತಾವರಣ ಸ್ಫೂರ್ತಿದಾಯಕವಾಗಿತ್ತಂತೆ. ಜನ್ಮ ಭೂಮಿಯ ಬಗ್ಗೆ ಸಹಜವಾದ ಅಭಿಮಾನವನ್ನು ಅವರು ವ್ಯಕ್ತಪಡಿಸಿದರು.

ಅಂದಿನ ಕಾಲದ ವಿದ್ವಾಂಸರಿಗೆ ಪ್ರೌಢ ವ್ಯಾಸಂಗಮಾಡುವ ವಿದ್ಯಾರ್ಥಿಗಳನ್ನು ಚುಡಾಯಿಸುವುದೊಂದು ಹವ್ಯಾಸವಾಗಿತ್ತು. ಒಮ್ಮೆ ಇವರ ಸಮೀಪ ಬಂಧುವೊಬ್ಬರು ಇವರಿಗೆ ಸವಾಲು ಹಾಕಿದರು. ಶ್ಲೋಕದ ಅಂತ್ಯಪಾದವೊಂದನ್ನು ಕೊಟ್ಟು "ಐದು ನಿಮಿಷದಲ್ಲಿ ಮಿಕ್ಕ ಮೂರು ಪಾದಗಳನ್ನು ರಚಿಸಬೇಕು. ನಿನ್ನ ಸಾಮರ್ಥ್ಯ ನೋಡೋಣ!" ಎಂದರು.

ಅವರು ಕೊಟ್ಟ ನಾಲ್ಕನೆಯ ಪಾದ "ವಚನೇ ಕಾ ದರಿದ್ರತಾ" ಎಂದು. ವಕುಳಭೂಷಣರು ಅಷ್ಟು ವೇಳೆಯಲ್ಲಿ ಮೂರು ವಿಧವಾಗಿ ಮೂರು ಮೂರು

ಸಾಲು ಸೇರಿಸಿ ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ರಚಿಸಿ ಹೇಳಿದರಂತೆ. ಆ ಶ್ಲೋಕಗಳನ್ನು 82ರ ಈ ವಯಸ್ಸಿನಲ್ಲೂ ಸ್ಪಷ್ಟವಾಗಿ ಹೇಳುತ್ತಾರೆ. ಅದರಲ್ಲೊಂದು ಪದ್ಯ ತುಂಬ ರೋಚಕ:

ದಯಾಳೋ ರ್ಮೃದುತಾ ಕಸ್ಮಿನ್
ಮೌಕಳೇ: ಕೀದೃಶೋ ರವ: ।
ಅಲ್ಪಂ ಕರೋತಿ ಕಾ ಮರ್ತ್ಯಂ
ವಚನೇ ಕಾ ದರಿದ್ರತಾ ॥

ಈ ಸಮಾಸ್ಯಾ ಪಾದದಲ್ಲಿ ಮೂರು ಪದಗಳಿವೆ. ಇವನ್ನು ಪ್ರತ್ಯೇಕಿಸಿ ಒಂದೊಂದೇ ಪದ ಉತ್ತರವಾಗುವಂತೆ ಮೊದಲ ಮೂರು ಪಾದಗಳನ್ನು ರಚಿಸಿದ್ದಾರೆ. ದಯಾಳುವಿನ ಮಾರ್ದವ ಎಲ್ಲಿದೆ? ಎಂದರೆ ಅವನ ಮಾತಿನಲ್ಲಿ (ವಚನೇ). ಕಾಗೆ ಯಾವ ರೀತಿ ಶಬ್ದ ಮಾಡುತ್ತದೆ ? ಕಾ ಎಂಬ ಶಬ್ದ ಮಾಡುತ್ತದೆ (ಕಾ). ಮನುಷ್ಯನನ್ನು ಅಲ್ಪನನ್ನಾಗಿಸುವುದು ಯಾವುದು ? ದಾರಿದ್ರ್ಯ (ದರಿದ್ರತಾ).

ಈ ಕವಿತಾಸಾಮರ್ಥ್ಯವನ್ನು ಕಂಡ ಆ ಪಂಡಿತರು ಮೂಕವಿಸ್ಮಿತರಾದರಂತೆ. ಈ ಘಟನೆಯು ವಕುಳಭೂಷಣರಿಗೆ ಹಿರಿಯ ವಿದ್ವಾಂಸರು ತಲೆದೂಗುವಂತೆ ಕಾವ್ಯರಚನೆ ಮಾಡಬೇಕೆಂಬ ಛಲ ಹುಟ್ಟಿಸಿದ್ದಿರಬಹುದು.

ಹದಿನೆಂಟನೇ ವಯಸ್ಸಿನಲ್ಲಿ ''ಅದ್ಭುತಾಂಶುಕಂ'' ನಾಟಕ ರಚನೆಯೊಂದಿಗೆ ಸಾಹಿತ್ಯಸೇವೆ ಆರಂಭಸಿದ ಶ್ರೀಯುತರಿಗೆ ಕಾವ್ಯ ಅಥವಾ ನಾಟಕ ರಚನೆಯೇ ಉದ್ದೇಶವಾಗಿರಲಿಲ್ಲವಂತೆ. ಹಿಂದಿನ ಎಲ್ಲ ಕವಿಗಳಂತೆ ವಿಭಿನ್ನ ಚಮತ್ಕಾರದಿಂದ ವಿಷಯವನ್ನು ನಿರೂಪಿಸುವ ಆಸೆ ಉಂಟಾದ್ದರಿಂದ, ಹೆಸರಾಂತ ಹಿಂದಿನ ಕವಿಗಳ ಕಾವ್ಯ, ನಾಟಕಗಳನ್ನೇ ಆಧಾರವಾಗಿಟ್ಟುಕೊಂಡು, ಮೂಲ ಕೃತಿಗೆ ಪೂರಕವಾಗಿ ಉಪಸಂಹಾರದಂತೆ ಮತ್ತು ಪೀಠಿಕೆಯಂತೆ ಕಾವ್ಯ, ನಾಟಕಗಳ ರಚನೆ ಮಾಡಿದ್ದೇನೆನ್ನುತ್ತಾರೆ. ಇವರ ''ಮಣಿಹರಣಂ'' ಭಾಸನ ''ಊರುಭಂಗಂ''ಗೂ ''ಪ್ರಸನ್ನ ಕಾಶ್ಯಪಂ'' ಕಾಳಿದಾಸನ ''ಅಭಿಜ್ಞಾನ

ಶಾಕುಂತಲಂ'' ನಾಟಕಕ್ಕೂ ಉಪಸಂಹಾರ ರೂಪವಾಗಿದೆ ಮತ್ತು ''ವೀರ ಸೌಭದ್ರಂ'' ಭಾಸನ ''ದೂತ ಘಟೋತ್ಕಚಂ'' ಗೂ ''ಅದ್ಭುತಾಂಶುಕಂ'' ಭಟ್ಟನಾರಾಯಣನ ''ವೇಣೀ ಸಂಹಾರ'' ಕ್ಕೂ ''ಪ್ರತಿಜ್ಞಾ ಕೌಟಿಲ್ಯಂ'' ವಿಶಾಖದತ್ತನ''ಮುದ್ರಾರಾಕ್ಷಸಂ'' ನಾಟಕಕ್ಕೂ ಪೀಠಿಕಾ ರೂಪವಾಗಿವೆ. ಈ ಎಲ್ಲ ಕೃತಿಗಳಲ್ಲೂ ಮೂಲ ಕೃತಿಕಾರರ ಶೈಲಿಯನ್ನೇ ಬಳಸಿದ್ದೇನೆಂದು ಹೇಳುತ್ತಾರೆ. ಸ್ತೋತ್ರಗಳು, ಗದ್ಯ, ಪದ್ಯ, ಚಂಪೂ, ನಾಟಕ ಈ ಎಲ್ಲ ಪ್ರಕಾರಗಳಲ್ಲೂ ಕಾವ್ಯರಚಿಸಿರುವ ವಕುಳಭೂಷಣರು ನಾಟಕ ರಚನೆಯೇ ಕವಿತಾಸಾಮರ್ಥ್ಯದ ಗುಣಮಟ್ಟವನ್ನಳೆಯಬಲ್ಲ ಒರೆಗಲ್ಲು ಎನ್ನುತ್ತಾರೆ.

''ಅದ್ಭುತಾಂಶುಕಂ'' ನಾಟಕ ರಚಿಸಿ, ಹಿರಿಯರೊಬ್ಬರ ಸಲಹೆ ಮೇರೆಗೆ ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾಲಯದ ಪ್ರೊಫೆಸರ್ ಎಂ. ಹಿರಿಯಣ್ಣನವರಿಗೆ ತೋರಿಸಿದಾಗ, ಅದನ್ನೋದಿ ಮೆಚ್ಚಿಕೊಂಡು ಅದರ ಪ್ರಕಟಣೆಗೆಂದು ರೂ. 50 ನೀಡಿದರೆಂದೂ ''ಪ್ರಸನ್ನ ಕಾಶ್ಯಪಂ'' ಪುಸ್ತಕ ಓದಿ ''ಮತ್ತೋರ್ವ ಕಾಳಿದಾಸ'' ಎಂದು ಹೊಗಳಿದರೆಂದೂ ಇದರ ಪ್ರಕಟಣೆಗೆ ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯ ಆರ್ಥಿಕ ಸಹಾಯ ನೀಡಿತೆಂದೂ ಸ್ಮರಿಸಿಕೊಳ್ಳುತ್ತಾರೆ. ರಾಷ್ಟ್ರಪತಿ ಡಾ। ಎಸ್. ರಾಧಾಕೃಷ್ಣನ್‌ರವರು ''ಪ್ರಸನ್ನ ಕಾಶ್ಯಪಂ'' ಓದಿ, ಅಪೂರ್ಣವಾಗಿದ್ದ ''ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲಂ'' ಇದೀಗ ಪೂರ್ಣವಾಯಿತು ಎಂದು ಪ್ರಶಂಸಿಸಿದ್ದನ್ನು ಶ್ರೀಯುತರು ಸ್ಮರಿಸಿದರು.........''

ಸಂದರ್ಶನ : ಅಳಹರ್

जग्गूवकुलभूषणकविविरचिता ग्रन्थाः

गद्यकाव्यम्

१. जयन्तिका
(इयं बाणभट्टकृतकादम्बरीसदृशी)
२. यदुवंशचरितम् (हर्षचरितसदृशं)
३. उपाख्यानरत्नमञ्जूषा
(क्षेमेन्द्रकृतचारुचर्याव्याख्या)
४. भावकौमुदी

पद्यकाव्यम्

५. अद्भुतदूतं महाकाव्यम्
६. करुणरसतरङ्गिणी
७. पथिकोक्तिमाला
८. शृङ्गारलीलामृतम्
९. कलिकौतुकम्

चम्पूकाव्यम्

१०. यतिराजचम्पूः
११. भारतसङ्ग्रहः
१२. यात्रोदन्तचम्पूः
१३. गीतराघवम्

रूपकाणि

१४. अद्भुतांशुकम्
(वेणीसंहारस्य पूर्वभागः)
१५. प्रतिज्ञाकौटिल्यम्
(मुद्राराक्षसस्य पूर्वभागः)
१६. मञ्जुलमञ्जीरम् (रामायणकथा)
१७. बलिविजयम्
१८. अमूल्यमाल्यम्
१९. अप्रतिमप्रतिमम्
२०. मणिहरणम्
(भासकृतोरुभङ्गस्योत्तरभागः)
२१. यौवराज्यम्
२२. प्रसन्नकाश्यपम्
(अभिज्ञान शाकुन्तलस्योत्तरभागः)
२३. संयुक्ता
२४. प्रतिज्ञाशान्तनवम्
२५. नवजीमूतम्
२६. अनङ्गदाप्रहसनम्
२७. निघ्नतापसम्
२८. वकुलभूषणरूपकवितानम्
(मुग्धकुन्तलम्
प्रबुद्धप्रज्ञम्
कौमुदीयम्
वीरसौभद्रम्
(भासकृत दूतघटोत्कचपूर्वभागः)
व्रतफलम्
कलिकालुष्यम्
दाशरथिदर्शनम्
वितीर्णामृतम्
स्यामन्तकम्
मैरेयपारम्यम्)

लक्ष्मीस्तुतिमञ्जरी, अमृताधिरोहिणी
इत्यादि २४ स्तोत्राणि

Central Sanskrit University
CENTRAL LIBRARY
21025
Rajiv ...

VAKULABHŪṢAṆA

Śrī Jaggu Alwar Iyengar who writes under the pen name Vakula Bhūṣaṇa is a poet from Melukote, Karnataka. He is a prolific writer in Sanskṛt who has enriched modern Sanskṛt literature to a great extent. He is one of the most noted Sanskṛt poets of the 20th century.

His works include 1 Mahākāvya, 2 Gadya kāvyas, 22 plays, a few Campū kāvyas, innumerable stotras and a few compositions in Kannada.

He is the recipient of the state and central awards for his unique contribution to Sanskṛt literature. The prestigious honour 'The President's award' is also conferred upon him. Recently Bharatiya Bhāṣā pariṣat, Calcutta, has honoured the poet for his service to Sanskrit literature. In his early nineties the poet is still alert and continues to write.